# सागरिका

## त्रैमासिकीसंस्कृतशोधपत्रिका

**सागरिकासमितिः**

संस्कृतविभागः

डॉ. हरीसिंहगौरविश्वविद्यालयः, सागरम् (म.प्र.)

ISSN : 2229-5577

# सागरिका

**त्रैमासिकीसंस्कृतशोधपत्रिका**

अङ्क 49/2, विक्रमसंवत् 2075 (2018 ई.)
नवचत्वारिंशत् वर्षे द्वितीयोऽङ्कः

**संस्थापक संपादकः**
स्व. रामजी उपाध्यायः

**प्रधानसम्पादकः**
राधावल्लभत्रिपाठी

**सम्पादकः**
आनन्दप्रकाशत्रिपाठी

**प्रबन्धसम्पादकः**
शशिकुमारसिंहः

**सम्पादकमण्डलम्**
नौनिहालगौतमः, सञ्जयकुमारः, रामहेतगौतमः, किरण आर्या

**सागरिकासमितिः**
संस्कृतविभागः
डॉ. हरीसिंहगौरविश्वविद्यालयः, सागरम् (म.प्र.)

**ISSN : 2229-5577**

# सागरिका

**SAGARIKA**

Quarterly Research Journal in Sanskrit

Vol. 49 / 2

Four Issues Every Year-June-Sep.-Dec.-March

अङ्कप्रकाशनं प्रतिवर्षम् आषाढ-आश्विन-पौष-चैत्रमासेषु

**परामर्शदात्री समितिः**

1. प्रो. शशिप्रभाकुमारः
2. प्रो. अभिराजराजेन्द्रमिश्रः
3. डॉ. बलरामशुक्लः
4. डॉ. रमाकांतशुक्लः
5. प्रो. पी.के. मिश्रः

**पत्रव्यवहारसङ्केतः**

**प्रो. आनन्दप्रकाशत्रिपाठी**

अध्यक्षः, संस्कृतविभागः

डॉ. हरीसिंहगौरविश्वविद्यालयः, सागरम् 470003 (म.प्र.)

दूरभाष-फैक्स : 07582-264366

Email : sanskritsagar1946@gmail.com

**प्रकाशिका – सागरिकासमितिः**

संस्कृतविभागः, डॉ. हरीसिंहगौरविश्वविद्यालयः, सागरम् (म.प्र.)

**सदस्यताशुल्कम्**

वार्षिकम् - 100 रुप्यकाणि, आजीवनम् प्रतिव्यक्ति - 1000 रुप्यकाणि, आजीवनम् प्रतिसंस्थम् - 2000 रुप्यकाणि, प्रत्यङ्कम् - 25 रुप्यकाणि, अस्याङ्कस्य - 250 रुप्यकाणि

**आवरणं शब्दसज्जा च**

**अमन प्रकाशन,** नमकमंडी, कटरा, सागर (म.प्र.)

**मोबा.** : 9826434225

## पाठकविमर्शो नाम नूतनः स्तम्भः

**सम्मान्याः सुधीपपाठकाः!**

सुविदितमेव संस्कृतसाहित्यजगति सागरिकायाः सुदीर्घकालिकं शैक्षिकयोगदानम्। संस्कृते निरन्तरं प्रकाश्यमाना साम्प्रतं नवचत्वारिंशद्वर्षे वर्तमानेयं शोधपत्रिका सागरिका सामाजिक-शास्त्रगत-वैविध्यविषयानुस्यूता साहित्यजगति बहुप्रतिष्ठां भजते। अत्र साहित्यप्रेमिणां संस्कृते गवेषणामूलकानि शोधपत्राणि सामाजिकोपयोगिन आलेखाश्च प्रकाश्यन्ते।

प्रकाशितानामालेखानां शोधपत्राणाञ्च विमर्शाय 'पाठकविमर्श' इति नामक एकः नूतनः स्तम्भः प्रारब्धः। प्रकाशितवस्तुसन्दर्भे अस्त्यस्मिन् प्रकल्पे पाठकवर्याणां सहृदयानां वा विचारविमर्शाय शोभनावसरः। विचाराणां प्रकाशनमागामिन्यङ्के भविष्यति। तदर्थं नवीना विचाराः समुत्कृष्टशोधपत्राणि चामन्त्र्यन्ते।

(सर्वं सङ्गणक-यन्त्रटङ्कितं ईमेल द्वारा प्रेषणीयम्।)

**सम्पादकः**

**नवालेखा आमन्त्र्यन्ते .....**

**सम्मान्याः सुकवयः पाठकाश्च !**

इदानीम् अस्मिन् विश्वे संस्कृतस्य महानभ्युदयः पौनःपुन्येन विवर्द्धतेतराम्। तदर्थं विश्वस्मिन् नवोदीयमानसांस्कृतिकसामग्रीं प्रस्तोतुं सहचरितमस्माभिः। इदानीं पत्रपत्रिकाणां गरीयसी काचित् पङ्क्तिर्दरीदृश्यते संस्कृतजगति, तस्यां स्थितौ संस्कृतशोध-पत्रिका सागरिका अग्रिमपङ्क्तौ तिष्ठति। संस्कृतसाहित्या नुसन्धानरतानां विद्वज्जनानां साहित्यविदां नव्यालेखपुरस्सरं 'गागरे' इत्यस्मिन् सागरमिव सम्पूर्यमाणेयं राष्ट्रिया शोधपत्रिका नैरन्तर्यं समाजोदयाय शोधान् संवितनोति।

संस्कृतसाहित्ये स्वकीयावदानेन अधुनातनं यावदनया षोडशविशेषाङ्काः प्रकाशिताः। संस्कृतशास्त्रीयवैज्ञानिक-दार्शनिक-साहित्य-नाट्यादि-विषय-निगूढां शोधसामग्रीं विदुषां पुरतः परिवेशयन्तीयं कामपि वैश्विकीमधिमान्यताम-भिभजते। आगामिष्वङ्केषु परप्रकर्षसम्भावनां समाश्रित्य अपेक्ष्यते तावत् नवीना आलेखाः। अपेक्ष्यन्ते इदानीं समुत्कृष्ट-शोधपत्राणि यान्यस्मान् समितिञ्चोपकुर्युः। सागरिकासमितिः सी.डी. माध्यमेन, ईमेल द्वारा वा आलेखानां प्रेषणाय पाठकान् निवेदयति।

**धन्यवादाः**

## विशेषः

सम्मान्याः ग्राहकवर्याः।

सहर्ष सूच्यन्ते यत् सागरिकाया आजीवनसदस्यताङ्कृते 450 रुप्यकाणि अतिरिक्त-डाक-व्ययं प्रेषणे उपलब्धाः प्राचीना अङ्काः निःशुल्कं प्रदास्यन्ते।

# विषय-सूची


| | | | |
|---|---|---|---|
| 1. | महाकविभवभूतेः लोकचेतनायाः विमर्शः | - *डॉ. बालकृष्ण शर्मा* | 9 |
| 2. | अन्नंभट्ट-केशवमिश्रयोर्मते ज्ञानमीमांसा | - *डॉ. कृष्णपददासाधिकारी* | 19 |
| 3. | अनुमितिसाध्यतया ईश्वरस्य सिद्धिः सम्भवति? | - *डॉ. करुणानन्दमुखोपाध्यायः* | 30 |
| 4. | शक्तितत्त्व-विमर्शः | - *डॉ. पूर्णिमा केलकरः* | 34 |
| 5. | अभिनवगुप्तपादाचार्यस्य साहित्यिकं चिन्तनम् | - *डॉ. सुमनकुमारः झा* | 42 |
| 6. | धर्मशास्त्रसाहित्यस्य ऐतिह्यं क्रमविकासश्च | - *डॉ. सितान्शुभूषणपण्डा* | 53 |
| 7. | काव्यविभूषितमृग्वेदीयोषः सूक्तम् | - *डॉ. किरण आर्या* | 63 |
| 8. | वैदिकपरम्परायां चिकित्साविज्ञानस्य महत्त्वम् | - *डॉ. पूनम सिंह* | 68 |
| 9. | समकालिककवितासु चाय-प्रंशसा | - *डॉ. तारेशकुमारः शर्मा* | 77 |
| 10. | ब्राह्मणभागस्य वेदकत्वम् | - *डॉ. दानपतिः तिवारी* | 85 |
| 11. | हरिभद्रसूरिणो योगविषयकप्राकृत-साहित्यस्य समीक्षणम् | - *डॉ. धर्मचन्द्रः जैनः* | 90 |
| 12. | कालिकापुराणे ब्रह्मचर्यस्य निर्देशः कामस्य निन्दा च | - *डॉ. विवेक शर्मा* | 106 |
| 13. | नाट्यसर्गालोके उत्तररामचरित-स्यानुशीलनम् | - *डॉ. राघवेन्द्र शर्मा* | 113 |
| 14. | उत्तररामचरिते प्रतिपादितं जीवनदर्शनं : एकमनुशीलनम् | - *डॉ. तरुणकुमार शर्मा* | 118 |
| 15. | जानकीहरणमहाकाव्यस्य साहित्यविमर्शः | - *नीलकण्ठकरुआँ* | 125 |
| 16. | उपनिषत्सु मनोविज्ञानम् | - *डॉ. सत्येन्दु शर्मा* | 136 |
| ● | लेखक परिचय | | 142 |

# 1

# महाकविभवभूतेः लोकचेतनायाः विमर्शः

*डॉ. बालकृष्ण शर्मा*

लोकवृत्तानुकरणं नाट्यमिति नाट्यपरिभाषया नाटककारस्य लोकचेतनासम्पृक्तता सहजतयावगन्तुं शक्यते। नाटककारः कविर्वा लोकात् वृत्तं गृहीत्वा तत्र च रसालङ्कारयोजनां कृत्वा काव्यरचनां नाटकप्रणयनं वा करोति। येन तस्य काव्ये नाट्ये वा वृत्तनिबन्धने रसालङ्कारसंयोजने च लोकः व्याप्तः भवति। परिणामतः वक्तुं शक्यते यत् काव्यं लोकेन विना न सम्भवति। यथा मालायां सूत्रे पुष्पाणि पिनद्धानि भवन्ति तथैव काव्ये नाटके वा कथावृत्ते लोकः पिनद्धः भवति। अतएव काव्यशास्त्रनिबन्धेषु नाट्यशास्त्रग्रन्थेषु वा आचार्याः लोकमुपादाय प्रायः अनुशासनं कुर्वन्ति। तद्यथा -

लोकस्य चरितं नाट्यम्।[1]

अपि च

योऽयं स्वभावो लोकस्य नानावस्थान्तरात्मकः।
सोङ्गाद्यभिनयैर्युक्तो नाट्यमित्यभिधीयते।।[2]

महाकविः कालिदासोऽपि नाट्ये लोकचरितमेव प्रमुखतया पश्यति। तद्यथा -

त्रैगुण्योद्भवमत्र लोकचरितं नानारसं दृश्यते।
नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्।।[3]

काव्यादर्शकारः दण्डी काव्याङ्गानि वर्णयन् ब्रूते-

लोको विद्या प्रकीर्णं च काव्याङ्गानि।[4]

पुनः लोकं परिभाषते दण्डी काव्यादर्शे -

लोकवृत्तं लोकः।[5]

एवम्प्रकारेण प्रतिभाति यल्लोकव्यवहारस्य निबन्धनम्भवति प्राधान्येन काव्यस्य वा नाट्यस्य वा परमप्रयोजनम्। अतः सर्वे काव्यकाराः स्वस्वकाव्येषु इतिवृत्तनिबन्धनेन सह लोकस्य निबन्धनं कुर्वन्ति। एतस्मादेव कारणात् मम्मटाचार्यः काव्यहेतुनिरूपणप्रसङ्गे निपुणतायां लोकस्य समावेशं करोति। तद्यथा -

लोकस्य स्थावरजङ्गमात्मकलोकवृत्तस्य ..... विमर्शनाद् व्युत्पत्तिः।[6]

भामहाचार्यः काव्यालङ्कारे कवेः कृते ज्ञातव्येषु तत्त्वेषु लोकमपि गृह्णति। तद्यथा-

शब्दः छन्दोऽभिधानार्था इतिहासाश्रयाः कथाः।
लोको युक्तिः कलाश्चेति मन्तव्याः काव्यगैर्ह्यमी।।[7]

वक्रोक्तिजीवितकारः कुन्तकाचार्यः काव्ये लोकनिबन्धनमाहात्म्यं वर्णयन् वदति -

महतां हि राजादीनां व्यवहारे वर्ण्यमाने तदङ्गभूताः सर्वे मुख्यामात्यप्रभृतयः समुचितप्रातिस्विकर्तव्यव्यवहारनिणुतया निवध्यमानाः सकलव्यवहारिवृत्तोपदेशमापद्यन्ते।

ततः सर्वः क्वचित्कमनीयकाव्ये कृतश्रमः समासादितव्यवहार-परिस्पन्दसौन्दर्यातिशयः श्लाघनीयफलभाग् भवतीति।[8]

एवम्प्रकोरण काव्याशास्त्रिणां नाट्यशास्त्रिणां वा वचनैः नाट्ये काव्ये वा लोकस्य निबन्धनमावश्यकतत्त्वमिति प्रमाणितम्भवति। अतः कवीनां काव्येषु नाटकेषु वा लोकचेतना भवति सम्पृक्ता आद्योपान्तम्। अनया दृष्ट्या यदा संस्कृतसाहित्यस्य विभूतेः महाकविभवभूतेः रूपकेषु निबद्धायाः लोकचेतनायाः विमर्शः क्रियते तदा प्रतिभाति यत् महाकविभवभूतेः रूपकाणां तदितरव्यावर्त्तकतत्त्वमस्ति लोकचेतनानिबन्धनमेव। अयम्महाकविः लोकनाट्यपरम्परापोषकः नाटकारोऽस्ति भारतीयनाट्यशास्त्रमनुसृत्य एषः स्वरूपकेषु लोकचेतनां लोकधर्मं वा आसूत्रितवान्। यथा भरतः वदति- नानाशीलाः प्रकृतयः शीले नाट्यं प्रतिष्ठितम्।

तस्माल्लोकप्रमाणं हि विज्ञेयं नाट्ययोक्तृभिः।।[9]

अस्याः लोकचेतनायाः निर्णयं कर्तुं शास्त्रेण न शक्नोति कोऽपि बुधः। अतः भरतः वदति -

न च शक्यं हि लोकस्य स्थावरस्य चरस्य च।
शास्त्रेण निर्णयं कर्तुं भावचेष्टाविधिं प्रति।।[10]

अतः संस्कृतनाटककाराः शास्त्रैः सह लोकस्य परिशीलनं कृत्वा काव्यानि नाटकानि वा प्रणीतवन्तः। नाटककारो भवभूतिरपि तथैव करोति। वाल्मीकिरामाणीयरामकथायाः लोकस्वरूपस्य परिशीलनं कृत्वा कविः महावीरचरितम् उत्तररामचरिमिति नाट्यद्वयं रामकथाश्रितम्प्रणीतवान् लोककथामाश्रित्य च मालतीमाधवप्रकरणं रचितवान्। परिणामतः भवभूतेः रूपकेषु लोकचेतनायाः पदे पदे दर्शनम्भवति । अत्र कवेः रूपकेषु लोकचेतनायाः विमर्शः एकैकशः क्रियते।

**1. महावीरचरिते लोकचेतना -**

महावीरचरितमितिनाटकं भवभूतेः रामकथाश्रितम्प्रथमं रूपकमस्ति यत्र नायकस्य रामस्य पूर्वचरितं वीरसाश्रितं निबद्धमस्ति। अतः महावीरचरितम् इति नाम साभिप्रायम् अभिसन्धिमयं वा प्रतिभाति। अत्र कविः कथाविन्यासव्याजेन चरितचित्रणव्याजेन रसभावव्य जनामाध्यमेन अलङ्कारविन्यासव्याजेन च स्वकीयां लोकचेतनां चित्रयति। वाल्मीकिरामायणे निवद्धं रामचरितं वीरचरितमस्ति। लोकः वीरचरितमिदम् भगवच्चरितमिति स्वीकरोति। महाकविः भवभूतिः रामस्य वीरचरितं भगवच्चरितमिव निबध्नाति। यतो हि सः आत्मानं रामभक्तरूपेण प्रस्तौति।
तद्यथा -

प्राचेतसो मुनिवृषा प्रथमः कवीनां
यत्पावनं रघुपतेः प्रणिनाय वृत्तम्।
भक्तस्य तत्र समरंसत मेऽपि वाचस् -
तत्सुप्रसन्नमनसः कृतिनो भजन्ताम्।।[11]

अतः प्रमाणितम्भवति यद्भवभूतिः लोकचेतनाचमत्कृतहृदयः रामस्य वीरचरितं भगवच्चरितरूपेण स्वीकरोति 'रघुपतेः पावनं वृत्तम्' 'भक्तस्य मे' इत्येवं प्रकारेण चात्र स्वकीयाभिप्रायं प्रस्तौति। वाल्मीकिः स्वकीयरामकथायाः नामकरणं सीताचतिरम् इत्येवम्प्रकारेण करोति। लोकः अपि सीतारामयोः वृत्तं सीताचरितरूपेण स्वीकरोति।

वाल्मीकि वःदति -   काव्यं रामायणं कृत्स्नं सीतायाश्चरितं महत्।
पौलस्त्यवधमित्येवं चकार चरितव्रतः।।[12]

इत्थं रामचरितं पौलस्त्यवधम् सीताचरितम् इत्युभयोः रूपयोः लोके ख्यातमस्ति। अतः लोके पौलस्त्यवधकारणात् रामचरितं वीरचरितम् जातम् अस्ति, सीतायाः निर्वासनवृत्तस्य प्राधान्यात् च सीताचरितम् इति लोके उत्तरं रामचरितम् ख्यातमस्ति। महाकविः भवभूतिः लोकचेतनामेवाश्रित्य रामस्य पूर्वचरितम्महावीरचरितनाम्ना उत्तरचरितं सीता चरितं वा उत्तररामचरितनाम्ना प्रास्तौत्। अतः कवेः लोकचेतना एव कारणमस्ति। एवमेव लोकः रामचरिते लक्ष्मणचरितं परशुरामचरितं कैकेयीचरितम् मन्थराचरितं च पृथग् वैशिष्ट्येन स्वीकरोति। इमां लोकचेतनामेवाश्रित्य भवभूतिः स्वकीये महावीरचरिते लक्ष्मणचरितं परशुरामचरितं कैकेयीचरितं मन्थराचरितं च लोकपरम्परानुरूपं चित्रयति।

रामस्य चरितस्य अनुकरणं लोके प्रदर्श्यते तदेव च 'रामलीला' इति कथ्यते। अत्र 'लीला' शब्दः पारिभाषिको वर्तते। तद्यथा विश्वनाथः वदति -

अङ्गैर्वेषैरलङ्कारैः प्रेमिभिर्वचनैरपि।
प्रीतिप्रयोजितैर्लीलां प्रियस्यानुकृतिं विदुः।।[13]

दशरूपककारो धन जयोऽपि एवमेव स्वीकरोति। तद्यथा -

प्रियानुकरणं लीला मधुराङ्गविचेष्टितैः।[14]

वाल्मीकिरामायणरचनाकालादेव रामलीलायाः प्रचलनं जातम्। कुशीलवौ सर्वप्रथमं रामलीलां जगतुः। तद्यथा -

ऋषीणां च द्विजातीनां साधूनां च समागमे।
यथोपदेशं तत्त्वज्ञौ जगतुः सुसमाहितौ।।[15]

महाकविः भवभूतिरपि लीलापदस्य प्रयोगमस्मिन्नेवार्थे करोति। तद्यथा- रामः -

सखि वासन्ति पश्य-पश्य कान्तानुवृत्तिचातुर्यमपि शिक्षितं वत्सेन।
लीलोत्खातमृणालकाण्डकवलच्छेदेषु सम्पादिताः।[16]

महावीरचरितनाटके महाकविः भवभूतिः बहुत्र स्वकीयां लोकचेतनां चित्रयति। तद्यथा -

(1) भगवतः कालप्रियनाथस्य यात्रामहोत्सवे महावीरचरितनाटकस्य प्रयोगः।

(2) ताटकावृत्तप्रसङ्गे रामस्य कथने - भगवन् स्त्री खल्वियम्।

(3) गोदानसंस्कारस्योल्लेखे विवाहावसरे।

(4) मन्थरावृत्तान्तस्य निबन्धने कैकेयीवृत्तान्तस्य निबन्धने।

(5) परशुरामलक्ष्मणसंवादावसरे लक्ष्मणोक्तिषु परशुरामप्रयुक्तापशब्देषु च।

(6) सीतारामविवाहप्रसङ्गे कङ्कणमोचनपरम्परोल्लेखे।

(7) ओषधिविषयस्योपमानत्वेनोल्लेखे। तद्यथा -

यामोषधिमिवायुष्मन् विचिनोषि महावने।
सा सीता मम च प्राणा रावणेनोभयं हृतम्।।[17]

(8) कृष्णचतुर्दशीदिवसोल्लेखे पष्ठाङ्के त्रिजटामाल्यावतोः संवादप्रसङ्गे।

(9) लक्ष्मणस्य - हनूमान् हनूमान् इति महानयं वीरवादः इति कथने प चमाङ्के

(10) 'भुष्टीमुष्टि' 'कचाकचि' सदृशप्रयोगे।[18]

(11) 'चिकित्सितमनोरोगा त्रिलोकी प्रयोगे।[19]

एवम्प्रकारेण महावीरचरितनाटके भवभूतिः रामकथाव्याजेन सीतारामचरित्रनिबन्धनेन पदे पदे स्वकीयां लोकचेतनां प्रकटीकृतवान्।

**2. उत्तररामचरिते लोकचेतना -**

लोकचेतनाचमत्कृतहदयः नाटककारः भवभूतिः रामकथां नाट्यविधायां प्रणीतवान् तत्र च पूर्वचरितम् उत्तरचरितम् इति विभागद्वयं कृत्वा नाटकद्वयं रचितवान्। अत्र प्रेरकतत्त्वं मूलकारणं वास्ति केवलं लोकचेतना। लोकचेतनायाः चमत्कारकारणात् उत्तरे रामचरिते भवभूतिः विशिष्यते। लोकचेतनाकारणाद् उत्तररामचरितम् उत्तरमस्ति। अत्र लोकः एवं प्रधानतामावहति। तद्यथा कविः वदति रामव्याजेन -

स्नेहं दयां च सौख्यं च यदि वा जानकीमपि।
आराधनाय लोकस्य मु चतो नास्ति मे व्यथा।।[20]

अस्मिन् नाटके लोकः एव आद्योपान्तं निबद्धमस्ति। तद्यथा -

सर्वथा व्यवहर्तव्यं कुतो ह्यवचनीयता।
यथा स्त्रीणां तथा वाचां साधुत्वे दुर्जनो जनः।।[21]

अत्र 'जनः' इति पदेन लोकः एवं अभीष्टः कवेः । अपि च-

देव्यामपि हि वैदेह्यां सापवादो यतो जनः ।
रक्षोगृहस्थितिर्मूलमग्निशुद्धौ त्वनिश्चयः ।।[22]

अत्रापि 'जनः' इति पदेन लोकः एवाभिप्रेतः अस्ति । एवमेव -

कष्टं जनः कुलधनैरनुर जनीयः ।[23]

सतां केनापि कार्येण लोकस्याराधनं व्रतम् ।
यत्पूरितं हि तातेन मां च प्राणांश्च मु चता ।।[24]

त्वया जगन्ति पुण्यानि त्वय्यपुण्या जनोक्तयः ।
नाथवन्तस्त्वया लोकास्त्वमनाथा विपत्स्यसे ।।[25]

प्रत्येतु कस्तद्यदिदूरवृत्तम् ।[26]

अत्र 'कः' इतिपदेन लोकः एवाभीष्टः ।

रामः- लोको न मृष्यतीति ।[27]

राम :- हे भवन्तः पौरजानपदाः
न किल भवतां .... प्रसीदत रुद्यते ।[28]

क इह न गुणैस्तं राजानं जनो बहु मन्यते ।[29]

घोरं लोके विततमयशो या च वह्नौ विशुद्धि -
र्लङ्काद्वीपे कथमिव जनस्तामिह श्रद्दधातु ।
इक्ष्वाकूणां कुलधनमिदं यत्समाराधीनयः
कृत्स्नो लोकस्तदिह विषमे किं स वत्सः करोतु ।।[30]

अत्रापि 'जनः' 'लोकः' इति पदद्वयं भवभूतेः लोकचेतनां प्रमाणयति । एवमुत्तररामचरितनाटकं महाकविभवभूतेः लोकचेतनामाद्योपान्तं प्रकाशयति । वस्तुतः अस्मिन्नाटके कविः लोकचेतनाचित्रणाय रामस्य चरिते सीतायाश्चरिते च बहुविधं वैशिष्ट्याधानं कृतवान् । येन नाटकेऽस्मिन् कविः विशिष्यते । अत्र रामस्य लोकाराधकचरितं प्रस्तूय कविः स्वकीयां लोकचेतनां प्रास्तौत् । नाटके जनापवादवृत्तं सीतानिर्वासनवृत्तं मृतब्राह्मणबालकवृत्तं शम्बूकवधवृत्तं च प्रणीय कविः सम्पूर्णं नाटकं लोकचेतनाचमत्कृतं कृतवान् । रामः लोकस्य सम्मुखे स्वपीडाभिव्यक्तिं करोति लोकस्य प्रबलतां सूचयति च । येन नाटकमिदं लोकचेतनाचमत्कृतं लोकोत्तरं जातमस्ति ।

**3. मालतीमाधवे लोकचेतना -**

महाकविः भवभूतिः लोकविश्रुतं रामचरितं प्रणीतवान् एकत्र स्वकीयलोकचेतनाचित्रणाय अपरत्र च लोककथानकमाश्रित्य मालतीमाधवप्रणयकथां प्रणीय स्वलोकचरितविज्ञतां ख्यापितवान्। एकत्र कविः 'रामादिवद् वर्तितव्यं न रावणादिवद्' इत्युक्तिं मनसि निधाय रामचरितं पुरस्कृत्य नाटकद्वयं रचितवान् अपरत्र च लोकप्रचलितप्रणयकथां स्वकल्पितां वा प्रणयकथामाश्रित्य मालतीमाधवयोः चरितं प्रणीतवान् स्वकीयं वृत्तं च व्यजितवान्। तात्पर्यमिदं यत् लोकचेतनाभवितहृदयः भवभूतिः मालतीमाधवप्रकरणे पदे-पदे लोकचेतनासम्पृक्तानि तथ्यानि व्यञ्जितवान्। अस्मिन् एव प्रकरणे कविः आत्मानं प्रति लोकस्योपेक्षां मनसि निधाय स्वोद्गारं प्रकटीकृतवान्। तद्यथा -

ये नाम केचिदिह नः प्रथयन्त्यवज्ञां
जानन्ति ते किमपि तान्प्रति नैष यत्नः।
उत्पत्स्यते मम तु कोऽपि समानधर्मा
कालो ह्ययं निरवधिर्विपुला च पृथ्वी।।[31]

अस्मिन् पद्ये कविः स्वसमकालिकविदुषां व्यवहारं समालोच्य स्वकीयामभिव्यक्तिं लोकचेतनां च विन्यस्तीकृतवान्। वस्तुतः प्रकरणमिदं कवेः लोकचेतनायाः कृते साहित्यसंसारे प्रथितमस्ति। अस्य प्रकरणस्य सम्पूर्णं वृत्तं तदानीन्तनीं सामाजिकलोकचेतनामधिकृत्य निबद्धं प्रतिभाति। प्रकरणेऽस्मिन् स्थाने स्थाने सूत्रिता लोकचेतनात्र समासेन सूच्यते -

(1) मालतीमाधवप्रकरणे कविः कृष्णचतुर्दश्याः उल्लेखं स्थानद्वये कृत्वा कामपि तदानीन्तनीं घटनां लोकपरम्परां वा सूचयति। तद्यथा -

अवलोकिता - अद्य कृष्णचतुर्दशीति जनन्या समं मालती शङ्करपुरं गमिष्यति।[32]

अपि च -

लवङ्गिका - भगवति, कृष्णचतुर्दशीरजनीश्मशानस चारनिर्व्यूढविषम-व्यवसायनिष्ठापितप्रचण्डपाषण्डदोर्दण्डसाहसः साहसिकः खल्वेषः।[33]

न केलवं मालतीमाधवेऽपितु महावीरचरितेऽपि कृष्णचतुर्दश्या उल्लेखः प्राप्यते। तद्यथा -

त्रिजटा - कनिष्ठमातामह! अस्मिन्नेव कृष्णचतुर्दशीदिवसे चतुर्थमासः परिसमाप्तः।[34]

इत्थम्प्रमाणितं भवति यद् भवभूतिः कृष्णचतुर्दश्या उल्लेखेनावश्यमेव कामपि लोकपरम्परां सूचयति।

(2) मालतीमाधवप्रकरणे कविः तदानीन्तने काले प्रचलितस्य मदनमहोत्सवस्य उल्लेखं कृत्वा स्वकीयां लोकचेतनां सूचयति। तद्यथा -

अवलोकिता - माधवोऽपि कौतूहलमुत्पाद्य मया प्रवृत्तमदनमहोत्सवं मदनोद्यानं प्रभातेऽनुप्रेषितः।[35]

(3) महाकविः भवभूतिः मालतीमाधवप्रकरणे तदानीन्तने समये प्रचलितां नरबलिप्रथां महामांसविक्रयप्रथां चोल्लिखति। तद्यथा -

कपालकुण्डला- ....। कथितं हि मे गुरुणा- वत्से कपालकुण्डले भगवत्या करालया यन्मया प्रागुपयाचितं स्त्रीरत्नमुपहर्तव्यम् तदत्रैव नगरे विदितमास्ते इति।[36]

(4) अस्मिन् प्रकरणे एकत्र कविः कन्याजन्मजनितलोकजुगुप्साम् उल्लिख्य तस्मिन् कालेऽपि कन्यादयनीयस्थितिं सूचयति स्वकीयां लोकचेतनां प्रमाणयति च। तद्यथा-

लवङ्गिका- ....। येषां कृते स्त्रीजन्मलाभं जुगुप्सन्ते बान्धवाः।37

(5) एवमेवास्मिन् प्रकरणे कविः सूर्योपसनापरम्पराम् उल्लिखति कुत्रचित् शिवोपासनालोकपरम्परां वर्णयति च।

इत्थं ज्ञायते यन्महाकविभवभूतेः मालतीमाधवप्रकरणं लोकचेतना-चमत्कृतं प्रकरणमस्ति। अत्र स्थाने-स्थाने तदानीन्तने समये लोके प्रचलितानां परम्पराणामुल्लेखेन कविः आद्योपान्तं स्वकीयां लोकचेतनां सूचयति।

एवम्प्रकारेण भवभूतेः त्रयाणां रूपकाणां परिशीलनेन प्रमाणितम्भवति यत् कविरेषः लोकचेतनाचमत्कृतहृदयः कविरस्ति। असौ स्वसमये लोके प्रचलितानां प्रथानाम्परम्पराणां वा सूक्ष्मेक्षिकया निरीक्षणं कृत्वा यथास्थानं सूचयति। अस्य त्रिषु रूपकेषु स्थाने-स्थाने सूत्रितायाः लोकचेतनायाः परिशीलनं महत्कार्यमस्ति। अत्र समासेन स्थालीपुलाकन्यायेन च कवेः लोकचेतनायाः विमर्शो विहितोऽस्ति। सङ्क्षेपेण वक्तुं शक्यते यत यद्यपि सर्वे संस्कृतमहाकवयः लोकचेतनान्विताः प्रतिभान्ति तथापि अनया दृष्ट्या महान् नाटककारः भवभूतिः सर्वथा विशिष्टं स्थानं भजते। इतिशम्।।

**सन्दर्भग्रन्थाः -**


1. *नाट्यशास्त्रे 36/11.*
2. *तत्रैव 19/144*
3. *मालविकाग्निमित्रे 1/4*
4. *काव्यालङ्कारसूत्रे 1.3.1*
5. *तत्रैव 1.3.2*
6. *काव्यप्रकाशे 1.3 वृत्तौ*
7. *भामहकाव्यालङ्कारे 1.9*
8. *वक्रोक्तिजीविते 1/4 वृत्तौ*
9. *नाट्यशास्त्रे 25/123*
10. *तत्रैव 25/122*
11. *महावीरचरिते 1/7*
12. *वाल्मीकिरामायणे 1/4/7*
13. *साहित्यदर्पणे 3/98-99*
14. *दशरूपके 2/37*
15. *वाल्मीकिरामायणे 1/4/130*
16. *उत्तररामचरिते 3/16*
17. *महावीरचरिते 5/24*
18. *महावीरचरिते 6/31*
19. *तत्रैव 7/41*
20. *उत्तररामचरिते 1/12*
21. *तत्रैव 1/5*
22. *तत्रैव 1/6*
23. *तत्रैव 1/14*
24. *तत्रैव 1/41*
25. *तत्रैव 1/43*
26. *तत्रैव 1/44*
27. *तत्रैव 3/26 अनन्तरम्*
28. *तत्रैव 3/38*

*29. उत्तररामचरिते 5/29*

*30. तत्रैव 7/6*

*31. मालतीमाधवे 1/6*

*32. मालतीमाधवे तृतीयाङ्के*

*33. तत्रैव षष्ठाङ्के*

*34. महावीरचरिते षष्ठाङ्के*

*35. मालतीमाधवे प्रथमाङ्के*

*36. मालतीमाधवे प चमाङ्के*

*37. तत्रैव सप्तमाङ्के*

# 2

# अन्नंभट्ट-केशवमिश्रयोर्मते ज्ञानमीमांसा

*डॉ. कृष्णपददासाधिकारी*

**1.0. उपक्रमः-** न्यायवैशेषिकदर्शनयोरवलम्बनेन अन्नंभट्टेन (1500 AD) तर्कसङ्ग्रहग्रन्थः तर्कसङ्ग्रहदीपिकाख्या टीका च विरचिता। प्राचीनन्यायदर्शनमवलम्ब्य केशवमिश्रेण (1704 AD) तर्कभाषानामकः ग्रन्थः विलिखितः। उभयोः ग्रन्थयोः प्रमाणोपरि विचारोऽतीवोल्लेखयोग्यः। प्रमाणप्रकरणे एव ज्ञानमीमांसा आयाति। सर्वेषु स्तरेषु विषयस्यास्य गुरुत्वमुपलभ्य अस्मिन् प्रबन्धे अस्यालोचनं यथोक्तग्रन्थानुसारं क्रियते।

**2.0. ज्ञानोत्पत्तिः–** यद्यपि घनान्धकारे सहसा विद्युल्लतालोकेन कामिनीप्रत्यक्षज्ञानजनने आलोकस्य सातिशयत्वमुपपद्यते तथापि तत्र चक्षुरादिसामग्री विना ज्ञानं न कदापि जायेत। प्रत्यक्षे चक्षुष एव करणत्वात। 'आलोकेनाहं पश्यामि' इत्यादौ यद्यपि आलोकस्य करणत्वं प्रसिद्ध परं न्यायमते तद्गौणकरणत्वमेव। सकलव्यवहारस्य कारणं हि ज्ञानम्। तदात्मनि जन्यते नश्यति च। ज्ञानानन्तरमिच्छा, इच्छायाः सकाशात् कृतिः यत्नो वा, तदनन्तरं चेष्टा, ततः उत्पद्यते व्यवहारः क्रिया वा। अत एव श्रूयते

आत्मजन्या भवेदिच्छा इच्छा जन्या भवेत्कृतिः।
कृतिजन्या भवेच्चेष्टा चेष्टाजन्या भवेत्क्रिया।। इति।

प्रथमतः आत्मनि ज्ञानं जायते अनन्तरम् आत्मा क्रमानुसारम् इच्छावान् कृतिमान् चेष्टावान् क्रियावान् च भवति। इह मत्त्वर्थीयः आश्रयत्वार्थकः, अत एव आत्मा इच्छाश्रयः कृत्याश्रयः चेष्टाश्रयः क्रियाश्रयश्च। आत्मा अपि ज्ञानाश्रयः। ज्ञानेच्छाकृतयः आत्मगुणाः सविषयकाश्च। ज्ञानेच्छादीनामात्मा हि

समवायिकारणम्। आत्मनि समवेतत्वे सति जायमानात्। क्रिया च कर्मपदार्थे अन्तर्भूक्ता। क्रिया द्रव्याश्रिता। चेष्टा क्वचित् यत्नरूपा क्वचिच्च कर्मरूपा भवति। अत्रेदं स्पष्टं यत्प्रमाणद्वारैव ज्ञानमात्मनि उत्पद्यते। प्रमाणं च कारणसामग्रीसापेक्षम्। करणव्यापारौ कारणप्रकारौ। तत्र करणरूपं हि प्रमाणमिति तर्कसङ्ग्रहकारः अन्नंभट्टः।[1] प्रमाणफलं हि प्रमा (यथार्थज्ञानम्)। प्रमायां योऽसाधारणधर्मस्तिष्ठति सः प्रमात्वम्। 'प्रामाण्यम्' 'अर्थवत्त्वं' 'तद्वतितत्प्रकारकत्वम्' इत्येतानि नामानि भवन्ति प्रमात्वस्य।

**3.0. प्रमाणसङ्ख्या -** दार्शनिकेषु प्रमाणसङ्ख्याविषये मतानैक्यं दृश्यते। तत्र चत्वारि एव प्रमाणानि न्यायनये प्रसिद्धानि। तानि प्रत्यक्षानुमानोपमानशब्दाख्यानि। एतेभ्यश्चतुर्थ्यः न्यूनेन कृत्स्नं ज्ञानं न जायेत। नाप्येतेभ्यः अतिरिक्तेन प्रमाणेन अधिकं किमपि ज्ञानमुत्पद्यते, प्रत्यक्षानुमित्युपमितिशाब्दातिरिक्तानां प्रमाणां यथार्थानुभवानां वा अस्वीकारात्। चतस्रः एव प्रमाः। प्रमाणसङ्ख्याविषये मानमेयोदयकारस्य मतम -

चार्वाकास्तावदेकं द्वितयमपि पुनर्बौद्धवैशेषिकौ द्वौ
भासर्वज्ञश्च साङ्ख्यस्त्रियमुदयनाद्याश्चतुष्कं वदन्ति।
प्राहुः प्राभाकराः पञ्चकमपि च वयं तेऽपि वेदान्तविज्ञाः
षट्कं पौराणिकास्त्वष्टकमभिदधिरे सम्भवैतिह्ययोगात्।।
(श्लोकः-14, मानमेयोदयः-प्रमाणपरिच्छेदः)[2]

**4.0. ज्ञानलक्षणम् -** तर्कसंग्रहे अन्नंभट्टेनोक्तम् - ''सर्वव्यवहारहेतुर्गुणोबुद्धिर्ज्ञानम्। सा द्विविधा स्मृतिरनुभवश्च। संस्कारमात्रजन्यं ज्ञानं समृतिः। तद्भिन्नं ज्ञानमनुभवः।''[3] तर्कसंग्रहदीपिकायां विस्तारयति—''जानामीति अनुव्यवसा-यगम्यज्ञानत्वमेव लक्षणमित्यर्थः। स्मृतेर्लक्षणमाह—'संस्कारे'ति। भावनाख्यः संस्कारः। संस्कारध्वंसेऽतिव्याप्तिवारणाय 'ज्ञानमिति। घटादिप्रत्यक्षेऽतिव्याप्ति-वारणाय 'संस्कारजन्यमि'ति। प्रत्यभिज्ञायामतिव्याप्तिवारणाय 'मात्रे'ति। अनुभवं लक्षयति—'तद्भिन्नमिति। स्मृतिभिन्नं ज्ञानमनुभव इत्यर्थः।।''[4] इह मात्रपदेन अभिधेयार्थो न ग्राह्यः। तेन स्मृतिलक्षणेऽसम्भवदोषः स्यत्। स्मृतेर्भावकार्यपदार्थत्वात् केवलं निमित्तकारणेन तदनुत्पत्तेः।

स्मृतेरुत्पत्तौ संस्कारो निमित्तकारणम्, आत्मा समवायिकारणम्, आत्ममनःसंयोगोऽसमवायिकारणम्। वस्तुतः बहिरिन्द्रियाणां वारणाय मात्रपदप्रयोजनम्। एतेनापि प्रत्यभिज्ञायां नातिव्याप्तिः। प्रत्यभिज्ञोत्पत्तौ बहिरिन्द्रियाणामावश्यकत्वात्।

| Cause | Effect |
|---|---|
| (कारणम्) | (फलम्) |
| ज्ञानम् | व्यवहारः |

**5.0. ज्ञानस्वरूपम -** ज्ञानं प्रकाशस्वरूपम्। यथा सूर्यचन्द्रवढ्यादयः वस्तूनि प्रकाशयन्ति (illuminate) तथा ज्ञानमपि वस्तूनि अर्थान् वा प्रकाशयति। परंतु सूर्यालोक-ज्ञानयोर्मध्ये अयमेव प्रभेदः यत्-यदा आलोकः निर्विषयकस्तदा तु ज्ञानं सविषयकं भवति। उक्तं च तर्कभाषायां केशवमिश्रेण, ''अर्थप्रकाशो बुद्धिः।'' आत्मगुणत्वे सति अर्थप्रकाशः। अर्थप्रकाशो हि ज्ञानम्। अर्थः = पदार्थः। पदार्थविषयकप्रकाशो हि ज्ञानम्। अर्थात्, यो हि विषयरूपेण पदार्थं प्रकाशयति सो ज्ञानम्। ज्ञानाधीना वस्तुसत्ता। ज्ञानं भवति विषयि, पदार्थश्च विषयः। अतः अर्थज्ञानयोः विषयताविषयितासम्बन्धोऽस्ति। पुनश्च तत्रैवोक्तमस्ति– ''सर्वं ज्ञानं निराकारमेव (formless)। न तु ज्ञाने अर्थेन स्वस्याकारो जन्यते। सर्वं ज्ञानमर्थनिरूप्यं अर्थप्रतिबद्धस्यैव तस्य मनसा निरूपणात।''[5] ।।

**5.1. ज्ञानस्य करणत्वं** स्वीकृतं नैयायिकैः। केवलं च निर्विकल्पकज्ञानं विहाय अन्यत्सकलानां सविकल्पकादिज्ञानानां करणं हि ज्ञानम्। यथा सविकल्पके निर्विकल्पकज्ञानं, हानोपादानोपेक्षाबुद्धौ सविकल्पकज्ञानम्, अनुमितौ व्याप्तिज्ञानम्, उपमितौ सा–श्यज्ञानम्, शाब्दे पदज्ञानम्, अर्थापत्तौ कल्पना सर्वमेव ज्ञानं भवति।

**5.2. ज्ञानपूर्वकं शब्दव्यापारः।** व्यापारः = व्यवहारः। न्यायबोधिन्यां गोवर्धनेनोच्यते- ''व्यवहारः = शब्दप्रयोगः। ज्ञानं विना शब्दप्रयोगासम्भवात् शब्दप्रयोगरूपव्यवहारहेतुत्वं बुद्धेर्लक्षणम्।''

**5.3. ज्ञानमनित्यम्।** कृतकत्वात् कार्यत्वाद् वा घटवत्। साधारणतः त्रिक्षणस्थायि ज्ञानम्। केवलं च द्वित्वोत्पत्तौ अपेक्षाबुद्धेः स्वीकारात् चतुःक्षणस्थायि अपि भवति। आत्ममात्रवृत्तिः, न तु अन्तःकरणवृत्तिः। अव्याप्यवृत्तिश्च। ईश्वरीयज्ञानं तु नित्यम्। नित्यत्वात् तन्न अन्तःकरणमपेक्षते।

**5.4. सविशेषणं ज्ञानम् ।** ज्ञाने त्रयः विषयाः भवन्ति, त्रिषु विषयेषु तिस्रः विषयताः अपि भवन्ति-प्रकारताख्यविषयता, संसर्गताख्यविषयता, विशेष्यताख्यविषयता च। अत्र या प्रकारताख्यविषयता सा हि विशेषणं ज्ञानस्य। एवञ्च 'घटः' इत्युक्ते घटत्वाख्यप्रकारता-समवायाख्यसंसर्गता-घटाख्यविशेष्यताशालिज्ञानं स्वीक्रियते।

**6.0. ज्ञानभेदः**- तर्कभाषायां श्रूयते ''बुद्धिरुपलब्धिर्ज्ञानं प्रत्यय इत्यादिभिः पर्यायशब्दैर्यदभिधीयते सा बुद्धिः। अर्थप्रकाशो वा बुद्धिः। सा च संक्षेपतो द्विविधा–अनुभवः स्मरणं च। अनुभवो द्विविधः- यथार्थोऽयथार्थश्च। तत्र यथार्थोऽविसंवादी। स च प्रत्यक्षादिभिः प्रमाणैर्जन्यते। यथा चक्षुरादिभिरदुष्टैर्घटादिज्ञानम्। धूमादिलिङ्गज्ञानाद्वयादि ज्ञानम्। गोसा–श्यदर्शनाद्गवयपदवच्यताज्ञानम्। 'अग्निष्टोमेन स्वर्गकामो यजेते 'त्यादिवाक्यादग्निष्टोमस्य स्वर्गकामसाधनताज्ञानम्। अयथार्थस्तु अर्थव्यभिचारी अप्रमाणजन्यः। स त्रिविधः-संशयस्तर्को विपर्ययश्च। एकस्मिन् धर्मिणि विरुद्धनानाविमर्शः संशयः। यथा 'स्थाणुर्वा पुरुषो वा' । अनिष्टप्रसङ्गः तर्कः। स च सिद्धव्याप्तिकयोः धर्मयोप्प्याङ्गीकारे व्यापकप्रसञ्जनरूपः। यथा 'यद्यत्र घटोऽभविष्यत् तर्हि भूतलमिव अद्रक्ष्यत' इति। विपर्ययस्तु अतस्मिंस्तद्ग्रहः। भ्रम इति यावत। यथा पुरोवर्तिन्यरजते शुक्त्यादौ रजतारोप 'इदं रजतमि'ति। स्मरणमपि द्विविधं—यथार्थमयथार्थमिति। तदुभयं जागरे। स्वप्ने तु सर्वमेव ज्ञानं स्मरणमयथार्थं च। दोषवशेन तदिति स्थाने इदमित्युदयात।''

**7.0. ज्ञानोत्पत्तिप्रक्रिया**—आत्मा मनसा संयुज्यते, मनः इन्द्रियेण, इन्द्रियं चार्थेन, अर्थश्चालोकेन सह संयुक्तः सन् प्रथमतो निर्विकल्पकज्ञानमुत्पद्यते। यथा 'इदं किञ्चित्' इत्यस्मिन् स्थले नामजात्यादिरहितज्ञानमुत्पद्यते। ज्ञानोत्पत्तिप्रक्रियायाम् आत्मा उत्सः, तदात्मन एव सकाशात् इयं प्रक्रिया प्रारभ्यते ज्ञानोत्पन्नेन समाप्यते। इह यद्यपि चत्वारः संयोगाः यथा—आत्म मनःसंयोगः, मनः-इन्द्रिय-संयोगः, इन्द्रियार्थसंयोगः, अर्थालोकसंयोगः, आत्माद्यालोकान्तपदार्थाः कारणानि भवन्ति–तथापि दार्शनिकैः इन्द्रियार्थसंयोगस्य व्यापारत्वम्, इन्द्रियस्य च असाधारणकारणत्वमामनन्ति। अस्य कारणं स्यात्-आत्ममनसोः सकलेषु क्षेत्रेषु ज्ञानजनने साधारणत्वम् एकत्वात्, अथ च इन्द्रियाणां नानात्वात् दर्शनश्रवणास्वादनादिषु वैशिष्ट्यात् तस्यैव करणत्वम् (असाधारणकारणत्वं)

युक्तम्। यदीन्द्रियस्यासाधारणत्वं न स्यात् तदा नारिकेलभक्षणकाले आत्मना मधुरत्वं नानुभूयेत। इन्द्रियस्य करणत्वे तर्कभाषायांश्रूयते—''ननु प्रमायाः कारणानि बहूनि सन्ति, प्रमातृप्रमेयादीनि। तान्यपि किं करणानि उत नेति? उच्यते। सत्यपि प्रमातरि प्रमेये च प्रमानुत्पत्तेः। इन्द्रियसंयोगादौ सत्यविलम्बेन प्रमोत्पत्तेः। अत इन्द्रियसंयोगादिरेव करणम्।''[8] एवञ्च इन्द्रियार्थसंयोगस्य सन्निकर्षस्य वा 'तज्जन्यत्वे सति तज्जन्यजनकत्वात' व्यापारत्वम्। अर्थात्-संयोगादिसन्निकर्षस्य इन्द्रियेण जन्यत्वे सति इन्द्रियजन्यः यो संयोगादिसन्निकर्षः, तज्जन्यं (संयोगादिसन्निकर्षजन्यं) यत् निर्विकल्पकज्ञानं तस्य (निर्विकल्पकज्ञानस्य) जनकत्वेन इन्द्रियस्य ग्रहणात् इन्द्रियार्थसन्निकर्षः एव व्यापारः। इन्द्रियं च करणम्।

**7.1. ज्ञानजनने आत्मा समवायिकारणम्।** आत्ममनःसंयोगोऽसमवायिकारणम्। इन्द्रियमसाधारणं कारणम्। इन्द्रियार्थसंयोगः व्यापारः (व्यापारस्यापि कारणत्वम्)। अन्यत्सर्वं निमित्तकारणम्। अनया कारणसामग्र्या यज्ज्ञानमुत्पन्नं तद्भवति निर्विकल्पकज्ञानम्। विशेष्यशेषणसम्बन्धानवगाहि निष्प्रकारकं ज्ञानम्। एकविषयकं, केवल-विशेष्यताशालि अव्यपदेश्यं ज्ञानम् (वचनेन न प्रकाशयोग्यः) एव निर्विकल्पकज्ञानम्। निर्विकल्पकं ज्ञानं न प्रमा नाप्यप्रमा। किन्तु तर्कभाषाकारमते प्रमा एव। एकविषयतावत्त्वादिदं क्षुद्रतमं ज्ञानमस्ति। प्रत्यक्षे अपेक्षाबुद्धिरेव बृहत्तमं ज्ञानम्, चतुःक्षणस्थायित्वात्। अन्यत्सर्वं ज्ञानं त्रिक्षणस्थायि।

**7.2. निर्विकल्पकज्ञानानन्तरं सविकल्पकज्ञानं जायते।** निर्विकल्पकज्ञाने या या सामग्री यो यो क्रमोऽपेक्षितः स सर्वोऽपि सविकल्पकज्ञानोत्पादनेऽनुसरणीयः भवति। केवलञ्चात्र भेदः निर्विकल्पकज्ञानं यदा एकविषयतावत्त्वं तदा सविकल्पकज्ञानं त्रिविषयतावत्त्वम्। यथा 'घटोऽयमि' त्यादौ ''घटत्वप्रकारकं समवायसंसर्गकं घटविशेष्यकं'' सविकल्पकं ज्ञानं जायते। अपरः भेदः यदिदं ज्ञानं व्यपदेश्यम् अर्थात् वचनप्रकाशयोग्यम् (expressible through language)। निर्विकल्पकं तु न तथा। तर्कभाषाकारः अधिकं स्पष्टयति— ''यदा निर्विकल्पकरूपा प्रमा फलं तथा हि - आत्मा मनसा संयुज्यते, मन इन्द्रियेण, इन्द्रियमर्थेन, इन्द्रियाणां वस्तुप्राप्यप्रकाशकारित्वनियमात्। ततोऽर्थसन्निकृष्टेनेन्द्रियेण निर्विकल्पकं नामजात्यादियोजनाहीनं वस्तुमात्रावगाहि 'किञ्चिदिदम्' इति ज्ञानं जान्यते। तस्य ज्ञानस्येन्द्रियं करणम्। इन्द्रियार्थसन्निकर्षोऽवान्तरव्यापारः (छिदाकरणस्य परशोरिव

दारुसंयोगः)। निर्विकल्पकं ज्ञानं फलम् (परशोरिव छिदा)।---यदा निर्विकल्पकज्ञानानन्तरं सविकल्पकं नामजात्यादियोजनात्मकं 'डित्थोऽयम्', 'ब्राह्मणोऽयम्' 'श्यामोऽयम्' इति विशेषणविशेष्यावगाहि ज्ञानमुत्पद्यते, तदा इन्द्रियार्थसन्निकर्षः करणम्। निर्विकल्पकमेव अवान्तरव्यापारः। सविकल्पकं ज्ञानं फलम्। ---यदा उक्तसविकल्पकज्ञानानन्तरं हानोपादानोपेक्षाबुद्धयो जायन्ते तदा निर्विकल्पकं ज्ञानं करणम्। सविकल्पकज्ञानम् अवान्तरव्यापारः। हानादिबुद्धयः फलम्।''[10]

**7.3. अनुव्यवसायः-** सविकल्पकज्ञानानन्तरं पुनः ''घटत्वप्रकारक-समवायसंसर्गक-घटविशेष्यकज्ञानवान्'' इत्याकारकमनुव्यवसायात्मकं ज्ञानं जायेत। इदं च ज्ञानं न लौकिकसन्निकर्षणोत्पद्यते। अत्र आत्ममनसोः संयोगे सत्यपि मनसा सहैव सविकल्पकज्ञानस्य ज्ञानलक्षणप्रत्यासत्त्या जायते।

| **कारणानि** | | | | |
|---|---|---|---|---|
| **कार्यमात्रं प्रति कारणानि** | **असाधारणकारणानि** | **करणम् (व्यापारवदसाधारणकारणम्)** | **व्यापारः (तज्जन्यत्वे सति तज्जन्यजनकः)** | **फलम् (कार्यम्)** |
| **ईश्वरः ईश्वरज्ञानम्, ईश्वेच्छा, ईश्वरकृतिः, दिक्कालौ, अदृष्टः (धर्माधर्मो), प्रागभावः, प्रतिबन्धक-संसर्गाभावः (Total 10)** | (1) आत्मा, (2) मनः, (3) संयोगः, (4) इच्छा, (5) कृतिः, (6) चेष्टा, (7) इन्द्रियम्, (8) अर्थः, (9) आलोकः | इन्द्रियम् | इन्द्रियार्थसन्निकर्षः | निर्विकल्पकज्ञानम् |
| | | इन्द्रियार्थसन्निकर्षः | निर्विकल्पकज्ञानम् | सविकल्पकज्ञानम् |
| | | निर्विकल्पकज्ञानम् | सविकल्पकज्ञानम् | हानोपादानोपेक्षाबुद्धयः |
| | (1) आत्मा, (2) मनः, (3) संयोगः, (4) इच्छा, (5) कृतिः, (6) अर्थः | सविकल्पकज्ञानम् | ज्ञानलक्षणप्रत्यासत्तिः | अनुव्यवसायः |
| | (1) आत्मा---- (9) आलोकः, (10) हेतुदर्शनम् (अविच्छिन्नमूलां धूम[1] रेखां पश्यति। (11) साध्यसन्देहः | व्याप्तिस्मरणम् (यत्र धूमः[2] तत्र वह्निः) | परामर्शः डव्याप्तिविशिष्टहेतो[3] पक्षे (पर्वतादौ) वृत्तित्वज्ञानम्। व्याप्तिविशिष्टधूम[3] वान् अयमिति ज्ञानम् | अनुमितिः (पक्षः साध्यवान्) |
| | पूर्ववत् (1-9) तथा च (10) पिण्डदर्शनम्, (11) संज्ञासंज्ञिज्ञानम् | सा दृश्यज्ञानम् | अतिदेशवाक्यार्थस्मरणम् | उपमितिः |
| | पूर्ववत् (1-9) तथा च (10) आसत्तिज्ञानम्, | पदज्ञानम् | पदजन्यपदार्थस्मरणम् (न तु पदार्थस्मरणम्) | शाब्दबोधः/शाब्दः/ अन्वयबोधः/ |

| | | | | |
|---|---|---|---|---|
| | (11) योग्यताज्ञानम्,<br>(12) आकाङ्क्षाज्ञानम्,<br>(13) तात्पर्यज्ञानम्। | | | वाक्यार्थबोधः |
| | पूर्ववत् (1-9) तथा च<br>(10) पिण्डादिदर्शनम् | उपपाद्यज्ञानम्<br>(येन विना यद्नुपपन्नं तत्तत्रोपपाद्यम्) (रात्रिभोजनं विना पीनत्वमनुपपन्नमिति पीनत्वमेवोपपाद्यम्) | कल्पना | अर्थापत्तिः<br>(उपपादकज्ञानम्)<br>(यस्याभावे यस्यानुपपत्तिः तद्रूपपादकम्)<br>(रात्रिभोजनाभावे पीनत्वानुपपत्तिरिति रात्रिभोजनमेवोपपादकम्) |
| | हेतुदर्शनम् (दिवा अभुजानत्वे सति पीनत्वदर्शनम्',<br>(11) रात्रिभोजनसन्देहः।<br>अनुमानवाक्यम्--देवदत्तः रात्रौ भुङ्क्ते, दिवा अभुञ्जानत्वे सति पीनत्वात् | यत्र यत्र दिवा अभुञ्जानत्वे सति पीनत्वं दृश्यते तत्र तत्र रात्रिभोजनं दृष्टम् | यत्र यत्र दिवा अभुञ्जानत्वे सति पीनत्वं दृश्यते तत्र तत्र रात्रिभोजनं दृष्टम्-एतद्विशिष्टपीनत्ववान् देवदत्तः। | अनुमितिः -<br>देवदत्तः रात्रौ भुङ्क्ते |
| | आत्मा, मनः, संयोगः, इच्छा, कृतिः, इन्द्रियम्, अर्थः | सन्निकर्षः | भावनाख्यसंस्कारः | प्रत्यभिज्ञा |
| | आत्मा, मनः, संयोगः, इच्छा, कृतिः, मनः, अर्थः | अनुभवः | भावनाख्यसंस्कारः | स्मृतिः |
| | आत्मा, मनः, संयोगः, इच्छा, कृतिः, अर्थः | अनुभवः | अनुव्यवसायः | भावनाख्यसंस्कारः |
| | आत्मा, मनः, संयोगः, इच्छा, कृति, इन्द्रियम्, अर्थः | निर्दुष्टङ्कमाणानां करणम्<br>(इन्द्रिय-व्याप्तिज्ञानसा–दृश्यज्ञान-पदज्ञानानि) | निर्दुष्टप्रमाणानां व्यापारः | अनुभवः (यथार्थः) |
| | | दुष्टप्रमाणानां करणम्<br>(दुष्टइन्द्रिय-दुष्टव्याप्तिज्ञान-दुष्टसादृश्यज्ञान-दुष्टपदज्ञानानि) | दुष्टप्रमाणानां व्यापारः | अनुभवः (अयथार्थः) |

**8.0. प्रामाण्यवादोपसंहृतिः -** प्रमायाः भावः प्रमात्वम्। प्रमात्वमेव प्रामाण्यम्। अप्रमायाः भावोऽप्रमात्वम् अप्रामाण्यं वा। प्रमात्वं प्रामाण्यम् अर्थवत्त्वमिति पर्यायः। सामान्यतः एवं बोध्यम्-यस्मिन् ज्ञाने प्रमात्वधर्मः स्यात् सः प्रामाण्यः, पुनर्यत्र अप्रमात्वं स्यात्सोऽप्रामाण्यः इति। निर्विकल्पकप्रत्यक्षं न प्रमा नाप्यप्रमा विशेषणराहित्यात्। अतो न तत्र प्रामाण्यमप्रामाण्यं वाऽस्ति। सविकल्पके हि ज्ञाने

प्रमायाः अप्रमायाः वा सत्त्वात् अत्रैव प्रामाण्यविचारः क्रियते। तद्वति तत्प्रकारकं ज्ञानं प्रमा, अतः तद्वतितत्प्रकारकत्वमित्याख्यं यज्ज्ञानत्वं तदेव प्रामाण्यम्। ज्ञानत्वं न जातिः। संशय-सम्भावनादिषु प्रमाप्रमयोः सम्मिश्रणात् न ज्ञानानां किमपि समानाकारत्वमस्ति। अतः अनुगतप्रतीतेरभावान्न ज्ञानत्वसामान्यं सम्भवति। एवञ्च तदभाववति तत्प्रकारकत्वम् अप्रामाण्यम्। ननु प्रमायाः प्रमात्वं प्रामाण्यं वाऽस्तीति केन प्रकारेण ज्ञायते? तत्र चतुर्यु प्रमाणेषु केन प्रमाणेन वा तज्ज्ञातुं शक्यते इति चेत्? उच्यते। प्रथमं तावन्मीमांसकानां मतमालोच्यते। मीमांसकाः आहुः-यया सामग्र्या ज्ञानमुत्पद्यते तयैव सामग्र्या तज्ज्ञाननिष्ठं प्रामाण्यमप्युत्पद्यते। इदं च स्वतःप्रामाण्यमित्युच्यते। परंतु नैयायिकैरुच्यतेऽन। यया सामग्र्या ज्ञानमुत्पद्यते तयैव सामग्र्या तज्ज्ञाननिष्ठं प्रामाण्यं नैवोत्पद्यते। यतः प्रामाण्यं न स्वतःग्राह्यम्। स्वतःप्रामाण्यवादिषु मीमांसकेषु प्राभाकराणां मतं भवति–ज्ञानं स्वप्रकाशम्। तस्य प्रामाण्यमपि तथा। अर्थात् ज्ञानप्रामाण्यं ज्ञानेनैव प्रकाश्यते नान्यया सामग्र्या अस्य प्रकाशं जायते। प्रभाकरमते ज्ञानमात्रं यथार्थम्। अयथार्थज्ञानं नाम ज्ञानाभावः एव न कश्चन् भ्रमः संशयो वा। यथा आलोके न कापि मलिनता वर्तते, यथा वा आलोकः चिरभास्वरः स्वप्रकाशः, तथा ज्ञानमपि चिरनिर्मलं, चिरभास्वरं, स्वप्रकाशम्। ज्ञानमप्रमात्वकालिम्ना कदापि कलङ्कितं भवति। उत्पत्तिकाले ज्ञानं यथा तस्य विषयं प्रकाशयति तथा तदधिकरणमात्मानमपि किञ्च स्वं ज्ञानमपि स्वेन ज्ञानेन प्रकाशयति। आहोस्वित्, प्रामाण्यमपि प्रकाशयतीदं ज्ञानम्। 'घटमहं जानामी'त्यादौ घटज्ञानं घटज्ञानी घटविषयश्च एते सर्वेऽपि ज्ञानेनैव प्रकाशन्ते। प्राभाकराः एवंप्रकारेण त्रिपुटीज्ञानमामनन्ति। विपरीतख्यातिवादिभिः भाट्टैस्तु ज्ञानस्य स्वप्रकाशत्वं नैवाद्रीयते। एतन्मते ज्ञानमतिन्द्रियम् अर्थादनुमानगम्यम्। ज्ञानस्य मानसप्रत्यक्षत्वं (अनुव्यवसायत्वं) न सम्भवपरम्। ज्ञानं यद्यपि घटपटादिविषयं प्रकाशयति, किन्तु स्वं ज्ञानं ज्ञातुम् अनुमानेनैव ज्ञाततालिङ्गकानुमानेनैव शक्यते। विषयप्रकाशनं ज्ञानस्य कार्यम्। इदमेव कार्यं फलं वा ज्ञाततानाम्ना अभिधीयते। यदा प्रथमक्षणे 'अयं घटः' इति व्यवसायात्मकं ज्ञानमुत्पद्यते पश्चाच्च तस्मिन् ज्ञाने ज्ञातताख्यधर्मः जायते, तेनैव धर्मेण अर्थात् ज्ञातताख्यधर्मेण लिङ्गेन वा तज्ज्ञानस्य सत्त्वं ज्ञातुं पार्यते। अनुमानेनैव ज्ञानस्य ज्ञानं भवतीति भाट्टानामभिमतम्। मीमांसक मुरारी

मिश्रमते अनुव्यवसायेन ज्ञानमवबुद्ध्यते। चक्षुरादिसंयोगे सति 'अयं घटः' इत्याकारकं यज्ज्ञानं भवति तदेव व्यवसायात्मकं ज्ञानम्। परस्मिन् क्षणे इदं व्यवसायात्मकं ज्ञानं यस्य ज्ञानस्य विषयो भवति सोऽनुव्यवसायः। यथा 'घटविषयकज्ञानवान्'। अनेनानुव्यवसायेन प्रमात्वं प्रामाण्यं वा गृह्यते इति मिश्रपादाः। यद्यपि नैयायिकैः भाट्टप्राभाकराणां मतं नाद्रियते परं मुरारीमते नास्ति कापि विरोधिता। नैयायिकाः परतःप्रामाण्यवादिनः। मीमांसकास्तु स्वतःप्रामाण्यवादिनः। वस्तुतः न्यायमतं भवति-यया सामग्र्या ज्ञानमवबुद्ध्यते न तयैव सामग्र्या ज्ञानप्रामाण्यं गृह्यते। अर्थात् ज्ञानप्रामाण्यं न ज्ञानग्राहकसामग्रीग्राह्यम्। ज्ञानग्राहकसामग्री भवति अनुव्यवसायः। अनेनानुव्यवसायेन ज्ञानप्रामाण्यं नावगम्यते। ज्ञानप्रामाण्यं हि ज्ञानग्राहकसामग्र्यतिरिच्येन अन्यत्केनाप्युपकरणेन भवेत्। नैयायिकानामयं सिद्धान्तः 'परतःप्रामाण्यवादः' इति नाम्ना प्रसिद्धः। अस्मिन्मते (न्यायमते) ज्ञानप्रामाण्यम् अनुमानेनैव गृह्यते। अपि च प्रामाण्यमप्रामाण्यं चैतदुभयमपि परतः, अर्थात् अनुमानप्रमाणलभ्यमिति दिक्।

**सन्दर्भग्रन्थाः -**


1. *एवं सन्निकर्षषट्कजन्यं ज्ञानं प्रत्यक्षम्। तत्करणमिन्द्रियम्। तस्मादिन्द्रियं प्रत्यक्षप्रमाणमिति सिद्धम्।*
   *Tarkasamgraha of Annambhatta, Ed- Y-V- Athalye, Bhandarkar Oriental Researc Institute, Poona & 4, 1988, 2nd Ed-, P-32*
2. *नारायणद्वयीप्रणीतः मानमेयोदयः, हिन्दीव्याख्याकारः स्वामियोगिन्द्रानन्दः, चौखम्बा विद्याभवन, पो.बा.नं. 1069, वाराणसी 221001, 1978, पृ. 11*
3. *Tarkasamgraha of Annambhatta, Ed-Y-V- Athalye, Bhandarkar Oriental Research Institute] Poona -4, 1988, 2nd Ed-, P. 21.*
4. *Ibid-, P. 22.*
5. *श्री केशव मिश्र प्रणीता तर्कभाषा, हिन्दी व्याख्या, बदरीनाथ शुक्ल, मोतीलाल बनारसीदास, जबाहर नगर, दिल्ली, 110007, सप्तम पुनर्मुद्रण, 2017,पृ. 326।*
6. *Tarkasamgraha of Annambhatta, Ed- Y-V- Athalye, Bhandarkar Oriental Research Institute, Poona - 4, 1988, 2nd Ed-, P- 22-*

7. *श्री केशव मिश्र प्रणीता तर्कभाषा (English), सम्पादक, एस.आर., अय्यर, चौखम्बा ओरियण्टालिया, वाराणसी, 1979, पृ. 218*
8. *Ibid- P. 35.*
9. *साक्षात्कारिप्रमाकरणं प्रत्यक्षम्। साक्षात्कारिणी च प्रमा, सा एवोच्यते या इन्द्रियजा। सा च द्विधा सविकल्पकनिर्विकल्पकभेदात्। तस्याः करणं त्रिविधम्। कदाचित् इन्द्रियम्। कदाचित् इन्द्रियार्थसन्निकर्षः। कदाचिज्ज्ञानम्।---- यदा निर्विकल्पकरूपा प्रमा फलं तदेन्द्रियं करणम्।*

   *-श्रीकेशवमिश्रङ्कणीता तर्कभाषा (हिन्दी व्याख्या सहित), व्याख्याकारः बदरीनाथ-शुक्लः, मोतीलाल बनारसीदासः, दिल्ली, 110007, (सप्तम-पुनर्मुद्रणम्), 2017, पुटा 59 तथा 70*
10. *Ibid-, P. 70. Born on 12.03.1971 at the village Mahagab of Balasore District, Odisha, Dr. Krishnapada Das Adhikary, Nyāya Achārya (M.A with Gold Medal and Ph.D) has established himself as a Sanskrit scholar with traditional as well as modern background. He has studied at Shree Jagannath Sanskrit Vishvavidyalaya, Puri from H.Sc to Ph.D traditionally. As a distinctive scholar Dr. Das Adhikary has built up a prosperous academic career (1st class all through) beginning from school level to Doctoral level in his study. He has proved his excellence in editorial works in different capacities such as assistant editor, associate editor and editor in the academic and research institutes of national repute. He has been disciple of Prof. Keshab Chandra Dash, Prof. V.N. Jha and Prof. Ujjwala Jha. He has written more than 30 research papers and two books. He has worked in the (i) Sanskrit Dept., H.S Gour Univrsity, Sagar (MP) as Project Fellow under the UGC Major Research Project on "Vyutpattivāda; A Critical Study" in 2001, (ii) Resource Centre for Indian Language Technology Solutions (Oriya & Sanskrit), P.G. Dept. of Computer Science & Application, Utkal University, Bhubaneswar as Senior Project Fellow (Linguist) for 3 years (2002-2005) and (iii) Centre of Advanced Study in Sanskrit,*

*University of Pune, Pune as Research Associate in 2005. Dr. Das Adhikary has also completed "Navya Nyāya: Language & Methodology in 4 Levels" during 2011-2014 organized by the Asiatic Society, Kolkata. Presently, he is serving as Associate Professor & HOD in Sanskrit at Santal Bidroha Sardha Satabarshiki Mahavidyalaya, Goaltore, Paschim Medinipur, PIN - 721128.*

*He has undertaken the UGC Minor Research Project "Bhattojī Dīkṣita on the Concept of Kāraka" (2017-2018) as Principal Investigator by the financial assistance of University Grants Commission, ERO, Kolkata.*

# 3

# अनुमितिसाध्यतया ईश्वरस्य सिद्धिः सम्भवति ?

*डॉ. करुणानन्दमुखोपाध्यायः*

इदानीं भौतिकविज्ञानस्य प्राधान्यं सर्वत्र अनुभूयते। सर्वे जनाः आस्तिकाः नास्तिकाः वा भवन्तु, सर्वे भौतिकविज्ञानसिद्धान्तं प्रायषः स्वीकुर्वन्ति। परन्तु ईश्वरस्य अस्तित्वविशये सर्वे जनाः ज्ञातुं समुत्सकाः दृष्यन्ते, यतो हि ईश्वरस्य प्रत्यक्षं न भवति अस्मत्सदृषां कृते। ईश्वरः अतिसूक्ष्मः अतीन्द्रियश्च विद्यते, सः ब्रह्माण्डस्य उत्पत्तिस्थितिलयकारकः इति ईश्वरस्वीकर्तृणां मतम् अस्ति। सः नित्यः, सर्वज्ञः, सर्वशक्तिमान् सर्वत्र विद्यमानश्च अस्ति। सृष्टेः प्राक् सः ब्रह्माण्डं जनयति, उत्पत्त्यिनन्तरं सः अन्तर्यामीरूपेण ब्रह्माण्डं पालयति, अन्ते प्रलयणवेलायां स एव ब्रह्माण्डम् उपसंहरति। एतादृशस्य ईश्वरस्य सिद्धिः निश्चयात्मकम् अभ्रान्तं ज्ञानं कथं भवति? इति प्रश्नः प्राचीनकालतः मानवमनसि उदेति स्म, इदानीमपि स प्रश्नः समानरूपेण मानवचित्ते जागर्ति। न्यायदर्शनरीत्या एतस्य प्रश्नस्य समाधानम् अस्य आलेखस्य उद्देश्यं वर्तते।

न्यायदर्शने चत्वारि प्रमाणानि[1] स्वीक्रियन्ते, प्रत्यक्षम् अनुमानम् उपामानम् शब्दश्चेति। अतीन्द्रियतया स्वात्मभिन्नतया च प्रत्यक्षप्रमाणेन ईश्वरस्य ज्ञानं न सम्भवति। ईश्वरे सादृश्याभावात् उपमानेनापि तस्य ज्ञानं न सम्भवति। न्यायनये ईश्वरप्रणीतत्वेन वेदस्य प्रामाण्यात् प्राक् ईश्वरसिद्धेः वेदप्रमाणेन ईश्वरस्य सिद्धिस्वीकारे अन्योन्याश्रयप्रसंगात् वेदोऽपि प्रथमतया ईश्वरं साधयितुमसमर्थो [2]भवति। तस्मात् अनन्यगतिकतया अनुमानमेव शरणम् ईश्वरसिद्धौ। यत्र-यत्र अमुकः तत्र-तत्र ईश्वरः इत्यादिव्याप्तेरभावात् कथं अनुमानेनापि ईश्वरस्य सिद्धिः? सामान्यतोदृष्टानुमानेन[3] ईश्वरस्य सिद्धिः सम्भवति इति ब्रूमः। तथाहि यत्र सामान्यरूपेण व्याप्तिग्रहणम् विशेषरूपेण च साध्यस्य सिद्धिः भवति यस्याम्

अनुमानप्रक्रियायां सा अनमानप्रक्रिया एव सामान्यतोदृष्टानुमानम् उच्यते। प्रकृतम् अनुसरामः, यत्र-यत्र कार्यत्वं तत्र तत्र कर्तृजन्यत्वम्[4] यथा घटः इति व्याप्तिस्तु सर्वजनानुभवसिद्धः। एतद्व्याप्तिमाश्रित्य ईश्वरानुमानं प्रस्तूयते। तथाहि क्षितिः कर्तृजन्या कार्यत्वात् घटवत् इति अनुमानम्। अस्मिन्ननुमाने क्षितिः पक्षः, कर्तृजन्यत्वं साध्यम्, कार्यत्वं हेतुः, घटः दृष्टान्तः। सम्पूर्णानुमानप्रक्रिया -

(1) पक्षधर्मताज्ञानम् - क्षितिः कार्यत्ववती।

(2) व्याप्तिस्मरणम् - यत्र यत्र कार्यत्वं तत्र तत्र कर्तृजन्यत्वं यथा घटः।

(3) लिंगपरामर्षः - कर्तृजन्यत्वव्याप्यकार्यत्ववती इयं क्षितिः।

(4) अनुमितिः - क्षितिः कर्तृजन्यत्ववती।

एतेन अनुमानेन सामान्यतया क्षितौ कर्तृजन्यत्वं सिद्ध्यति। एतत्कर्तृत्वं अस्मदादीनां देवतादीनां च न सम्भवति इति अस्मदादिव्यतिरिक्ततया कस्यचन क्षितिकर्तृत्वमस्ति इति व्याप्तिबलात् सिद्धयति। स च कर्ता ईश्वर[5] इति।

प्रश्नोऽयम् उदेति यत् पर्वतो वह्निमान् इत्यस्मिन्ननुमाने वह्निः अनुमितिसाध्यतया सिद्ध्यति, तथैव किं ईश्वरस्य सिद्धिः अनुमितिसाध्यतया न भवति? उत्तरमिदं यत् पूर्वमेव उक्तम् यत् ''यत्र यत्र धूमः तत्र तत्र वह्निरितिवत् यत्र यत्र अमुकः तत्र तत्र ईश्वरः इति व्याप्तेरभावात् वह्निवत् ईश्वरः साक्षात् अनुमितिसाध्यतां नैव गच्छति, तथापि अनुमितिसाध्यकुक्षौ ईश्वरम् आनेतुं नैयायिकानां कश्चन सराहनीयः प्रयासः अत्र प्रस्तूयते।

तथाहि यत्र-यत्र कार्यत्वं तत्र-तत्र कर्तृजन्यत्वमिति व्याप्तौ साध्यकुक्षौ विद्यमानं यत् कर्तृपदम् तस्य अर्थोऽस्ति स्वोपादानगोचराऽपरोक्षज्ञानेच्छाकृतिमान्।[6] कर्तृस्वरूपप्रकाशनानन्तरं अनुमानप्रक्रियास्वरूपं भवति -

(1) पक्षधर्मताज्ञानम् - क्षितिः कार्यत्ववती।

(2) व्याप्तिस्मरणम् - यत्र-यत्र कार्यत्वं तत्र-तत्र स्वोपादानगोचराऽपरोक्ष-ज्ञानेच्छा-कृतिमज्जन्यत्वम्।

(3) लिंगपरामर्षः- स्वोपादानगोचराऽपरोक्षज्ञानेच्छाकृतिमज्जन्यत्वव्याप्प-कार्यत्ववती इयं क्षितिः।

(4) अनुमितिः- क्षितिः स्वोपादानगोचराऽपरोक्षज्ञानेच्छाकृतिमज्जन्यत्ववती।

सामान्यरूपेण एतया रीत्या लिंगपरामर्षेन जायमानायाम् अनुमितौ साध्यरूपेण स्वोपादानगोचराऽपरोक्षज्ञानेच्छाकृतिमज्जन्यत्वमेव सिद्ध्यति यत्

कुलालमादाय ईश्वरमादाय च समानमेव। आषयस्त्वयं यत् स्वोपादानगोचराऽपरोक्ष-ज्ञानेच्छाकृतिमवात्मकं कर्तृत्वं कुलाले, तन्तुवाये ईष्वरे च समानतया विद्यते। अतः वक्तुं न शक्यते यत् कर्तृस्वरूपप्रकाशनमात्रेण ईश्वर अनुमितिसाध्यकुक्षौ आगच्छति इति चेत्, सत्यम् ''साध्यघटकीभूतज्ञानस्य एकत्वे नित्यत्वे च लाघवम्'' इति लाघवतर्कः यदि परामर्षेन सह संयुज्यते तहि लाघवतर्कसहकृतेन लिंगपरामर्षेन या अनुमितिर्भवति, तस्यां ईश्वरस्य स्वरूपम् आगच्छति। तथाहि उक्तलाधव-तर्कसहकृतेन परामर्षेन अनुमितिभवति -

अनुमितिः- क्षितिः स्वोपादानगोचरनित्यैकाऽपरोक्षज्ञानेच्छाकृति-मज्जन्यत्ववती।

अस्मिन्ननुमाने साध्यम् अस्ति स्वोपादानगोचरनित्यैकाऽपरोक्षज्ञानेच्छा-कृतिमज्जन्यत्वम्, तस्मिन् घटकीभूतोऽस्ति नित्यैकाऽपरोक्षज्ञानवान्, एष एव ईश्वरः, यतो ईश्वरस्य ज्ञानं नित्यम् अस्ति, एकं सर्वविषयकमस्ति, अपरोक्षं चास्ति। जीवस्य ज्ञानं जन्यं किंचित्विषयकं परोक्षम् अपरोक्षम् उभयविधं भवति। तस्मात् वक्तुं शक्यते यत् यदा अनुमितिसाध्यघटकतया नित्यैकापरोक्षज्ञानवतः सिद्धिर्भवति तदा ईश्वर एव साध्यघटकीभूततया सिद्ध्यति इति।

एक प्रश्नः पुनः समुदेति यत् व्याप्तौ साध्यं यत् भवति तस्यैव लिंगपरामर्षेन अनुमितौ विधेयतया ज्ञानं भवति इत्यस्ति नियमः, तदनुसारेण यस्मात् व्याप्तौ स्वोपादानगोचरापरोक्षज्ञानेच्छाकृतिमज्जन्यत्वमस्ति साध्यम्, तस्मात् अनुमितौ अपि तदेव साध्यम् भवति, न तु स्वोपादानगोचरनित्यैकाऽपरोक्ष-ज्ञानेच्छाकृतिमज्जन्यत्वम् इति, तत्कथं साध्यघटकीभूतया अपि ईष्वरस्य सिद्धिर्भवति?

समाधानमस्ति इदम्- कारणेन सह [7]किंचित्संयोजनेन कारणाज्जायमाने कार्ये पार्थक्यम् आयाति।[8] यथा देवदत्तेन सह चक्षुःसन्निकर्शः उदबुद्धपूर्वसंस्कारसहकृतात् सामान्यप्रत्यक्षात्पृथक् सोऽयं देवदत्तः' इति प्रत्यभिज्ञानं जनयति, यथा वा लोभचाकचिक्यादिदोषसहकृतात् शुक्त्या सह चक्षुःसन्निकर्षः इदं रजतम् इति भ्रमज्ञानं जनयति, तथैव लाघवतर्कसहकृतात् लिंगपरामर्शेनापि जायमानायाम् अनुमितौ अपि साध्यस्वरूपं किंचिद्भिन्नतया ज्ञायते इति सर्वमनवद्यम्।

**सन्दर्भग्रन्थाः -**


1. *''प्रत्यक्षानुमानोपमानषब्दाः प्रमाणानि'', महर्शि गौतमप्रणीतं न्यायदर्शनम् । 1.1.3*
2. *नापि शब्दस्तत्र प्रमाणम्, द्यावाभूमी जनयन् इत्यादिश्रुतीनामीष्वरोच्चरितत्वेन प्रामाण्याद् ईश्वरस्यैव सन्दिग्धत्वेन तदुक्ततया श्रुतीनां प्रामाण्येऽपि सन्देहात्'' श्रीकृष्णवल्लभाचार्यविरचिता किरणावली, पृ.15, चौखम्भा संस्कृत संस्थान, वाराणसी 2006*
3. *''सामान्यतोदृष्टं नाम यत्र अप्रत्यक्षे लिंगलिंगिनोः सम्बन्धे केनचिदर्थेन लिंगस्य सामान्यादप्रत्यक्षो लिंगी गम्यते, यथा इच्छादिभिरात्मा, इच्छादयो गुणाः, गुणाश्च द्रव्यसंस्थानाः, तद् यदेशां स्थानं स आत्मेति।'' आचार्यवात्सायनकृतन्याय-भाष्यम्, 1.1.5*
4. *''एतेन ईश्वरे प्रमाणमपि दर्षितं भवति, तथाहि यथा घटादिकार्यं कर्तृजन्यं तथा क्षित्यंकुरादिकमपि'' आचार्य विश्वनाथ पंचानन भट्टाचार्य, न्यायसिद्धान्तमुक्तावली, पृ.15-16, चौखम्भा संस्कृत संस्थानम्, वाराणसी, पुनमुर्दितसंस्करण 2006*
5. *न्यायसिद्धान्तमुक्तावली पृष्ठसंख्या 21*
6. *श्रीकृष्णवल्लभाचार्यविरचिता किरणावली, पृष्ठसंख्या 17*
7. *''उच्यते कारणदोशः कार्यविशेषे तस्य शक्तिं निरुन्धन्नेव संस्कारविशेष-मप्युद्बोधयति, कार्यगम्यत्वात्कारणदोशषक्तेः। अयमेव च न्यायः प्रत्यभिज्ञानेऽपि।'' आचार्य पद्मपाद, पंचपादिका, पृष्ठ 94-98, श्रीदक्षिणामूर्ति मठ प्रकाशन, वाराणसी, द्वितीय संस्करण, 2009*

# 4

# शक्तितत्त्व-विमर्शः

*डॉ. पूर्णिमा केलकरः*

शक्त्यात्मदेवतारूपैर्विकल्पत्रयगोचरीम्।
कालरूपां महाकालीं जगतः जननीं नुमः।[1]

परमेशितुः विशिष्टा शक्तिरेव सृष्टिं रचयति, प्राणिजातं संवर्धयति, अखिलं जगतः नियमनं करोति। शक्तिमतः विधातुः शक्त्या सह तादात्म्यं वरीवर्ति। शक्तिमन्तरेण शक्तिमतः सत्तैव न संभवति। सामर्थ्यार्थकस्य शक् धातोः क्तिन् प्रत्यये (शक्-सामर्थ्ये) निष्पन्नोऽयं शक्तिशब्दः। शाक्तमतावलम्बिनः शक्तेरुपासनां विधत्ते। तन्मतानुयसारेण ह्रीम्, क्लीम् इति शक्तेर्बीजमन्त्रौ। शक्तेः नेन्द्रियप्रत्यक्षं भवति। न चास्याः पांचभौतिकं शरीरं संभवति। तेन अनुभवगम्येयं शक्तिः साधकैः समाधिदशायां अनुभूयते। आत्मैवास्याः अधिष्ठानं भवति, न तु शरीरम्। प्रतिदेहं न्यूनाधिकरूपेण विद्यमानापि तात्विक दृष्ट्या अखण्डितैव विराजते। जगति प्रतिवस्तु प्रतीयमानमस्याः वैभिन्यं औपाधिकमेव ज्ञेयम्।

पदार्थविज्ञानदृष्ट्या, भौतिकविज्ञानपद्धत्या वास्याः स्वरूपं विचार्य तत्त्वचिन्तनदृष्टिमेवानुहरति। शक्तिर्हि (Energy), ऊर्जा वा विश्वस्य सूत्रधारपदं विभूष्य विराजते, अखिलं ब्रह्माण्डं संचालयति। रसायनशास्त्रे यदा हाईड्रोजन वायोः परमाणुद्वयस्य विखण्डनं (Fusion) भवति, तदा महती सौर-ऊर्जा समुत्पद्यते। इयमेव शक्तिरूपेण सर्वत्र प्रसरति। ब्रह्माण्डे परमाणोः विखण्डनसमये तिस्रः शक्तयः ऊर्जारूपेण समुत्पद्यन्ते। इलेक्ट्रॉन (Electron), प्रोटान (Proton) न्यूट्रॉन (Nutron) च। अस्मच्छास्त्रकारैः एताः शक्तयः विश्वव्यापिन्यः अखिलं ब्रह्माण्डं नियमयन्ति। कालानुगतम् एतासां कार्याणि, तत्परिणामादीनि च विभज्यन्ते। तदुच्यते भर्तृहरिणा -

**तमस्य लोकयन्त्रस्य सूत्रधारं प्रचक्षते। प्रतिबन्धाभ्यनुज्ञाभ्यां तेन विश्व विभज्यते।**[2] (वाक्यपदीये पदकाण्डे कालसमुद्देशे 4 श्लोकः)

कालस्य द्विविधा शक्तिः। तयोः शक्त्योर्मध्ये प्रतिबन्धशक्त्या जगतो लयः विनाशो भवति, अपरया अभ्यनुज्ञया शक्त्या उत्पत्तिः संभवति। अनया नियामकशक्त्याभावात् सर्वत्र पौर्वापर्यं विनश्येत। जगति व्यवस्था-संकटो जायेत। अभ्यनुज्ञया शक्त्या पुष्पाणि विकसन्ति, ब्रीहियवादीनां बीजांकुरनालकाण्डादीनां यथा क्रममुत्पत्तिर्भवति। प्रतिबन्धशक्त्या पदार्थानां विनाशो भवति। चराचररूपाणां भावानां चयापचयाः कालशक्तिवशादेव जायन्ते। सत्यमुक्तं हरिणा -

**यदि न प्रतिबध्नीयात् प्रतिबन्धं च नोत्सृजेत्। व्यवस्था व्यक्तिकीर्येरन् पौर्वापर्यविनाकृताः।**[3] (वाक्यपदीये पदकाण्डे काल समुद् देशे 5 श्लोकः)

भारतीयपरम्परायां शक्त्युपासना हि आदिकालादेव प्रवर्तते। राष्ट्रमिदं धर्मप्राणजनानां तपोभूमिरिव आस्थायाः ईशोपासनायाः देवायतनमिव महत्वं धत्ते। शक्तीनामधिष्ठातृदेवतासु महालक्ष्मी-महासरस्वती-महादुर्गायाः आराधनं जनैः सश्रद्धं क्रियते। विद्यायाः देवता सरस्वती न केवलं ज्ञानस्य अधिष्ठात्री, अपितु वागधिष्ठात्री। इयं यदानुग्रहं करोति तदा जनाः देवत्वं प्रतिपद्यन्ते।

सरस्वतीं च तां नौमि वागधिष्ठातृदेवताम्।
देवत्वं प्रतिपद्यन्ते यदनुग्रहतो जनाः।[4]

लक्ष्मी हि धनधान्ययुतं वैभवं प्रदाय प्राणिनां जीवनं परिपुष्णाति, आनन्दयति। दुर्गा रूपं समासाद्य सैव देवी विपन्निवारणं करोति, विघ्नान् परिहरति। तदेवं सर्वाः इमाः शक्तिस्वरूपाः देव्यः लोकानामार्तिहराः सन्ति। वस्तुतः एतासु शक्तिषु आनन्दरूपिणी अपि एका अन्यतमा शक्तिरस्ति, या राधापदाभिधायिनी, कृष्णस्यानन्या सखीव भक्तानां आराध्या, साक्षात् भक्तिरिव हृदि विराजते। तत्त्वदृष्ट्या इयं राधाशक्तिरेव ऊर्जस्वला, शस्यश्यामला च भूमिरूपेण दृश्यमाना कृषियोग्या भवति। सैव अकृष्णापि (गौरवर्णापि) कृष्णा, श्यामा भवति। राधैव कृष्णीभवति। अतएव भगवद्भक्तानां कृते राधाकृष्णयोर्न कश्चिद् भेदः। अयमस्या परमार्थः। लोकदृष्ट्या हि भूमेः संस्कारानन्तरं कृषकाः कृषिकार्यं सम्पादयन्ति। भगवत्तत्त्वस्य वैज्ञानिकदृष्ट्या God Partical इत्यस्यानुभूतिरपि राधातत्त्वविवेकेन संभवति। शक्तिरियं सुतरामानन्ददायिनी वर्तते। किमुत ब्रह्मानन्दप्रदायिनी वर्तते। वेदान्ते पंचकोषात्मकशरीरे आनन्दमयकोषे इयमेव राधा

शक्तिरूपेण विराजते। योगिनां निर्विकल्पसमाध्यवस्थायामस्याः साक्षात्कारो जायते। अमृतवर्षिणीयं शक्तिः आचार्येण करपात्रिमहोदयेन राधा-सुधा नाम्नि ग्रन्थे विस्तरेण विचारिता।

महारासविषये किञ्चित् चिन्तनं कर्तव्यम्। रसानां समूहोऽयं महारासः राधाशक्तिमन्तरेण न संभवति। रसानन्दरूपोऽयं महारासः आनन्दस्य आह्लादस्य पराकाष्ठा प्राणिनां मनसि अपूर्वं किमपि धत्ते। परमार्थतः चुम्बकीयशक्तिरिव राधा कृष्णमाकर्षयति। कृष्णे या आकर्षण शक्तिरस्ति सा राधैव। हि राधया समन्वितः सन् कृष्ण आकर्षयति, अतएव कृष्णः कृष्णो भवति, नान्यथा। (कर्षतीति कृष्णः इति कृष्णशब्दस्य व्युत्पत्तिलभ्योऽर्थः) लौहचुम्बके यथा विपरीतध्रुवयोर्मध्ये आकर्षणं विद्यते, तथैव राधाकृष्णयोः परस्परमाकर्षणं जायते। अनेनाकर्षणेनैव जीवनमिदं पूर्णतां भजते।

भौतिकविज्ञानं हि न केवलं पदार्थविज्ञानमथवा जडपदार्थाश्रितं वर्तते। तत्रापि अनुभवज्ञानमावश्यकम्। सविज्ञानमस्य दर्शनम् इति वदता भासेन दर्शनं हि विज्ञानसहितमेव प्रामाणिकमस्तीति साधितम्।। रसायनविज्ञाने हाईड्रोजन ऑक्सीजन वाय्वोः संयोगेन जलस्य निर्माणं भवति। तत्रापि काचिद् रासायनिकी वैद्युत् शक्तिरपेक्षिता। विश्वस्य यावत् ज्ञानं कयाचित् दैवी-शक्त्या भवति। या दर्शनकारैः प्रमेत्युच्यते। इन्द्रधनुषिये सप्तवर्णाः दृश्यन्ते , तेषु केवलं श्वेत एवावशिष्यते। वर्णविक्षेपवशात् वर्णेषु वैविध्यं प्रतिभाति। शुभ्रवर्णे एव सर्वमन्तर्भवति। एतत् श्वेतत्वं साक्षात् सरस्वत्याः स्वरूपम्।

**या कुन्देन्दुतुषारहारधवला, या शुभ्रवस्त्रावृता।**
**या वीणावरदण्डमण्डितकरा, या श्वेतपद्मासना।**[5]

विज्ञाने यथा ईथरमाध्यमेन शब्दानामभिव्यक्ति भवति। ध्वनितरंगो हि केनचित् माध्यमेनैव प्रसारितो भवति, तथैव वाग्देव्या माध्यमेन तस्याः कृपाप्रसादेन जनाः वक्तुं प्रभवन्ति। ध्वनेः मापनं यथा डेसिबल माध्यमेन भवति, तथैव वाक्शक्तेः मापनं वाग्देव्याः कृपया निश्चीयते। सूर्यकिरणेषु श्वेत-कृष्ण रश्मयः भवन्ति। तत्र श्वेतरश्मिः शक्तिवर्णात्मिका कदाचित् दुर्गारूपेण संहारकारिणी भवति, महिषासुरस्य रक्तपानं करोति। देवीरूपं समासाद्य एण्टिजन, एण्टिबाडी इति रक्ततत्त्वाभ्यां समायुक्ता शक्तिरियं कदाचित् सर्वग्राहिणी, कदाचिच्च सर्वदात्री भवति।

वेदान्ते अज्ञानस्यापि शक्तिद्वयं वर्तते। एका आवरणशक्तिः अपरा च विक्षेपशक्तिः। अनेन शक्तिद्वयेन नकारात्मिका ऊर्जा समुत्पद्यते। यथा आवरण-शक्ति सर्वं ज्ञानमाच्छाद्य सर्वत्र अज्ञानान्धकारं वितनोति। यथा घनच्छन्नमर्कम् घनच्छन्नदृष्टिः यदा मन्यते निष्प्रभं चातिमूढः इति वदज्ञानं जनयति। विक्षेपशक्त्या ज्ञानमुच्छिन्नं भवति। विक्षिप्तो जनः कर्तुमकर्तुमन्यथा कर्तुमिवावस्थां गच्छति। न किमपि कर्तुं प्रभवतीत्यर्थः। साहित्यशास्त्रे अभिधा, लक्षणा, व्यंजनेति तिस्रः शक्तयः शाब्दबोधं कारयन्ति। शक्तिमन्तरेण न कस्यापि बोधो जायते। कथं केन प्रकारेण वा शक्तिग्रहो भवेदिति विषये शास्त्रकारैरुक्तम् -

**शक्तिग्रहं व्याकरणोपमान-कोषाप्तवाक्यात् व्यवहारतश्च।**[6]

**वाक्यस्यशेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः।**

वैयाकरणैः शब्दब्रह्मणोरैक्यं प्रतिपाद्य शब्दस्य ब्रह्मणा सह तादात्म्यं प्रतिपादितम्। अर्थप्रतिपादनक्षमः शब्द एव समर्थः। सामर्थ्यं नाम शब्दशक्तिः। सेयं शक्ति शब्देष्वेव वर्तते। अस्मिन् विषये तार्किकाणां मतमपि विचारणीयम्। तेषां मते अस्माच्छब्दादयमर्थो बोद्धव्यः, अथवा इदं पदमिममर्थं बोधयतु इति ईश्वरेच्छा शक्तिः। मञ्जूषाकारैः नागेशभट्टैस्तु पदपदार्थयोः सम्बन्धान्तरमेव शक्तिरिति प्रतिपाद्यते। सेयं शक्ति वाच्यवाचकभावापरपर्याया। पदपदार्थयोर्मध्ये तादात्म्यसम्बन्ध एव शक्तिरूपेण विराजते। अत एव शब्दस्य तदर्थस्य च सामानाधिकरण्यं संभवति। यथा लोके रामेति द्वयक्षरं नाम मानभंगः पिनाकिनः। अथवा ओमित्येकाक्षरं ब्रह्म इत्यादयः प्रयोगाः सम्भवन्ति।

शब्दशास्त्रे कदाचित् प्रकरणानुसारेणापि शब्दस्यार्थो बोद्धव्यः। यथा गुणशब्दस्य सामान्यतःलोके गम्यमानो योऽर्थः स शब्दशास्त्रे नाश्रीयते। तत्र स्वं रूपं शब्दस्य शब्दसंज्ञा इति नियमानुसारेण गुणशब्दः अदेङ् (अ,ए,ओ इति वर्णत्रयम्) इत्यस्य बोधकः। वाक्यपदीयकारेण भर्तृहरिणा शब्दब्रह्मणः तादात्म्यं स्पष्टीकृतम्। तदुच्यते -

**अनादिनिधनं ब्रह्म शब्दतत्वं यदक्षरम्।**

**विवर्ततेऽर्थभावेन प्रक्रिया जगतो यथा।7**

(वाक्यपदीये ब्रह्मकाण्डे प्रथमः श्लोकः।)

उत्पत्तिविनाशरहितं यदक्षरम्, तदेव ब्रह्म, बाह्यार्थवासनया अर्थरूपेण अविद्यारूपया घटादिरूपेण विवर्तते। समग्रमपि जगत् पश्यन्तीवाग्रूपं यद् ब्रह्म,

तस्यैव प्रपंचभूतम्। इदमेव शब्दब्रह्म वैखर्याः निमित्तमस्ति। अत्रेदमवधेयम् यत् शब्दे अर्थाभिव्यक्तिसामर्थ्यमस्ति तथापि गुडशब्दोच्चारणे मुखे माधुर्यापत्तिः स्यादिति न शंकनीयम्। यतो हि शब्दः बौद्ध, अर्थोऽपि बुद्धिस्थ एव वाच्यतां धत्ते। तथा च गुड शब्दस्य माधुर्यं नाम गुणः, न तु अर्थः। एवमेव वह्निशब्दोच्चारणे मुखे दाहापत्तिर्न भवति। वह्न्यादौ दाहादिशक्तिमत्वं नास्ति। अतएवोक्तम्-शब्दज्ञानानुपाती वस्तुशून्यो विकल्प इति। (मंजूषायां नागेशटभट्टः।) बुद्धिपरिकल्पितोऽर्थ एव ग्राह्य भवति। अन्यथा वन्ध्यासुतादिशब्दानां बाह्यार्थराहित्ये अर्थवत्वाभावात् प्रातिपदिकत्वं न सिद्ध्येत।

इदमपि विचारणीयम्-बौद्ध एवार्थः शक्यः पदमपि स्फोटात्मकं प्रसिद्धम् इति। अनयोः बुद्धिगतं तादात्म्यमवधेयम्। महाकविना कालिदासेन मंगलाचरणे प्रतिपादितम्-वागर्थाविव सम्पृक्तौ वागर्थपतिपत्तये। जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ। शब्दार्थयोरिव गुणगुणिनोरपि अभेदो भवति। यथा गुड शब्दोच्चारणे तन्निष्ठगुणस्य माधुर्यादेः तत्क्षणमेव अनुभूतिर्भवति। किन्तु सागरमन्थनप्रसंगे कालकूटविषस्य पानं कृत्वापि शिवस्य न कापि प्रतिक्रिया लक्षिता। रसायनविज्ञाने सर्वापि क्रिया प्रतिक्रियां जनयति। भगवतः शिवस्य विषये सेयं विषपानस्य प्रतिक्रिया शिवशक्त्या प्रतिरुद्धा। हृदयपर्यन्तमागत्य तस्य विषस्य प्रभावः निरुद्धः।

कालशक्तिप्रभावात् कालोऽपि स्थिरीक्रियते। ब्रह्मणः इयं कालशक्तिः उत्पत्ति-विनाशप्रभवा दृश्यते। परमाणूनां विखण्डने यथा परमाण्विकी ऊर्जा निर्मीयते। इयमूर्जा निर्माणकार्ये प्रयोक्तुं शक्यते, विनाशकार्ये वा। कालशक्त्यैव पृथिव्यां वर्ष-मास-दिनानि जायन्ते। पृथिव्यां या गुरुत्वाकर्षणशक्तिः दरीदृश्यते तत्र कालस्य प्रभावः स्पष्टं परिलक्ष्यते। यत्र गुरुत्वाकर्षणं नास्ति, तत्र कालस्यापि स्तम्भनं जायते। अंतरिक्षवैज्ञानिकः जयन्तनारळीकरः कथामाध्यमेन कालशक्तेः स्थैर्यं प्रतिपादयति। कृष्णविवरनाम्नि कथासंग्रहे एकः प्रसंगः चित्रीकृतस्तेन।

एकदा कश्चिद् वैज्ञानिकः मित्रस्य गृहं गतः। तत्र तस्य चतुः, पंचवर्षीयां बालिकां दृष्ट्वा परिहासपूर्वमवदत्-"अहो! सुरूपा खलु एषा बाला। यदि मम समवयस्का अभविष्यत् तर्हि अनया सह विवाहमकरिष्यम्। किन्तु नैतत् संभवति।" इत्युक्त्वा तन्मित्रमन्तरिक्षयानेन अन्तरिक्षमगच्छत्। अथ गच्छता कालेन तस्य यानं कस्मिंश्चित् अज्ञात-स्थाने प्राप्तम्। तत् स्थानं प्राप्य यानार्धं कृष्णविवर नाम्नि

अतिप्रचण्डगुरुत्वाकर्षणेन शक्तिमति विवरे बलादाकृष्टम्। अवशिष्टो यानार्धः निष्क्रियो भूत्वा अन्तरिक्षे समवर्तत। तस्य सर्वाः क्रियाः अवरुद्धाः। निश्चेष्टं तद्यानं निष्क्रियमवातिष्ठत्। पृथिव्याः कक्षे समानेतुं वैज्ञानिकैः बहुविधं प्रयतितम्। अन्ते द्वाविंशतिवर्षानन्तरं तद् यानं पृथिव्यामवातरत्।

एतावता पृथिव्यां द्वाविंशतिवर्षात्मकोऽवधिः समाप्तः। सैव सुरुपा बालिका पुनः तेन वैज्ञानिकेन दृष्टा। सा हि विवाहानुरूपं वयः प्राप्तवती। अंतरिक्षात् समागतः वैज्ञानिकस्तु तावन्मात्रमेव आयुष्मान् आसीत्। कथाः तात्पर्यमिदमेव यत् गुरुत्वाशक्तिमन्तरेण कालशक्तिरपि स्तम्भिता भवति। अनेके पौराणिकाः दृष्टान्ताः कालशक्तिविषये विज्ञानमिदं समर्थयन्ति। इदानीं वाक्शक्तिः कथं प्रभवतीति एकेनैव दृष्टान्तेन प्रतिपादयितुमिच्छामि। पुरा काले आकाशवाण्याः माध्यमेन अनेके प्रसंगाः सार्थक्यं भजन्ते स्म। अभिज्ञानशाकुन्तले दुर्वाससा शापिता शकुन्तला।

**(विचिन्तयन्ती यमनन्यमानसा तपोधनं वेत्सि न मामुपस्थितम्।**
**स्मरिष्यति त्वां न स बोधितोऽपि सन् कथां प्रमत्तां प्रथमं कृतामिव।)**[8]

कण्वाश्रमे प्रदत्तोऽयं शापः, राज्ञः दुष्यन्तस्य मनसि अविकलमेव प्रसृतः। अहो! केयं वाक्शक्तिः। भवभूतिरपि आह-लौकिकानां हि साधूनामर्थं वागनुवर्तते। ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति। ऋषिवचनं पूर्वमेव प्रयुज्यते, तदनन्तरं घटनाः घटयन्ति। घटनोत्तरं ऋषिवचनानां सार्थक्यं प्रतिभाति। वस्तुतः ऋषीणां तपः प्रभावात् वैखरी वाणी क्षणमात्रेणैवः अखिलब्रह्माण्डे प्रसरति। वस्तुतः ध्वनिप्रकाशयोर्मध्ये ध्वनेः गतिः अधिकतरा वर्तते। ध्वनितरंगाणां व्याप्तिः सुतरां भवति। शब्दगुणकमाकाशम् इति नियमात् यत्र अव्यवहितः आकाशो भवति, तत्र ध्वनिप्रसरणे न किंचिद् व्यवधानं भवति। कृष्णजन्मप्रसंगे योगमायया कृता आकाशवाणी-अये ! दुष्ट! कंस! तव हन्ता गोकुले अजायत। मम वधाय निरर्थकस्तव प्रयासः इति। अस्याः वाण्याः प्रयोक्ता यद्यपि दृग्गोचरी न भवति, तथापि कार्यं तु निष्पद्यत एवं अभिज्ञानशाकुन्तले चतुर्थांके कालिदासेन पुनः आकाशवाण्याः संकेतः कृतः। शकुन्तला-दुष्यन्तयोः गान्धर्वविवाहस्य सूचना आकाशवाण्या माध्यमेनैव महर्षिणा कण्वेन अधिगता। तच्छ्रुतम् -

दुश्यन्तेनाहितं तेजःदधाना भूतये भुवः।
अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव।[9]

शब्दशक्तिरिव शब्दाभावोऽपि शक्तो भवति। यथा शब्दे अर्थबोधन-सामर्थ्यमस्ति तथैव मौनमपि बहुतरमर्थ व्यनक्ति। मौने या शक्तिः सा ऊर्जस्विनी, प्रभावशीला च वर्तते। इयमूर्जा योगिनां, सिद्धपुरुषाणां तपस्विनां च दर्शनमात्रेणैव द्रष्टुः मनसि स्फुरति। दक्षिणामूर्तिस्तोत्रे आद्यशंकराचार्यः उद्घोषयति

चित्रं वटतरोर्मूले वृद्धाः शिष्याः गुरुर्युवा।
गुरोस्तु मौनं व्याख्यानं शिष्यास्तु च्छिन्नसंशयाः।[10]

गुरुपदस्य या प्रतिष्ठा न सा शब्दवाच्या। गुरुपदं हि न क्वचिदपि औपम्यं भजते। अनुपमं खलु गुरोः तेजः सामर्थ्यं वा। सत्यमुक्तं तत्र भवता।

दृष्टान्तो नैव दृष्टस्त्रिभुवनजठरे सद्गुरोः ज्ञानदातुः।
स्पर्शश्चेत् स कल्प्यः स नयति यदहो स्वर्णतामश्मसारम्।।
न स्पर्शत्वं तथापि श्रितचरणयुगे सद्गुरुः स्वीय शिष्ये।
स्वीयं साम्यं विधत्ते भवति निरुपमस्तेन वालौकिकोऽपि।।[11]

'शक्तिशक्तिमतोः सामानाधिकरण्यमस्ति। महाभारतयुद्धप्रसंगे भगवता कृष्णेन संजयाय दिव्यदृष्टिः प्रदत्ता। स हि तत्प्रभवात् युद्धस्य सकलमपि इतिवृत्तं धृतराष्ट्राय न्यवेदयत्। धृतराष्ट्राय न सा दिव्यदृष्टिः प्राप्ता। यतो हि दृष्टिविकलो राजा सर्वं दर्शनयोग्यं द्रष्टुं समर्थ आसीत्। संजयस्तु प्रतिकूलानुकूलयोः प्रसंगयोः अनुभूतिं कर्तुं क्षमः। चिकित्साविज्ञाने लेसरकिरणैर्यथा दृष्टिशक्तिर्नियम्यते। शिवस्य तृतीयनेत्रमिव इमानि लेसरकिरणानि दृष्टिशक्तिं वितनोति। सेयं दिव्यशक्तिः प्रतिकूलं संहरति, अपेक्षितं च घटयति। निगुणनिराकारापि इयं शक्तिः शक्तिमति पुरुषे आश्रिता भवति। सैव प्रयोगानन्तरं पदार्थरूपेण परिणमते। (Energy changes in to matter) भगवतः विश्णोः दशावतारेषु कच्छप-मत्स्यादिषु भिन्नाः शक्तयः तत्तत् युगानुरूपं कार्यं निष्पादयन्ति।

**परित्राणाय साधूनां विनाशाय च दुष्कृताम्**
**धर्मसंस्थापनार्थाय संभवामियुगे युगे।**[12]

याज्ञिकाः अरणिमन्थनादग्निं जनयन्ति। द्वयोः पाषाणयोः घर्षणादूर्जा समुत्पद्यते। अत्रायं संकेतः यत् वेदान्ते पंचीकरणानन्तरं सृष्ट्युत्पत्तिर्भवति। पंचभूतेषु प्रत्येकमन्येषां चतुर्णामष्टमांशेन संयुक्तः। तेन पृथ्वी-वाय्वोः घर्षणात् अग्न्युत्पत्तिः स्वाभाविकी। (द्विधा विधाय चैकेकं चतुर्धा प्रथमं पुनः। स्वस्वेतरद्वितीयांशैः पंचीकरणमुच्यते।)[13]

शक्तिर्यदा पदार्थरूपेण परिणमते, तदा रूप इति तन्मात्रायां शब्द-स्पर्शयोः तन्मात्रयोर्मेलनं भवति। घर्षणवशाद् द्वयोः पदार्थयोः स्पर्शो भवति एवं घर्षणरूपः शब्दः समुत्पद्यते। शकार-सकार-हकारादिषु उच्चारितेषु ऊष्मा उत्पद्यते। शरीरेषु प्रत्यंगं शक्तिः समाहिता। (Accu pressure) विधिना चिकित्सकाः तां शक्तिं विविच्य रोगाणां निदानं कुर्वन्ति।

**सन्दर्भग्रन्थाः -**


1. *वाक्यपदीये कालसमुद्देशे हेलाराजीयमंगलम्।*
2. *वाक्यपदीये कालसमुद्देशे चतुर्थः श्लोकः।*
3. *वाक्यपदीये कालसमुद्देशे पंचमः श्लोकः।*
4. *स्तोत्ररत्नावलीतः उद्धृतम्।*
5. *सुभाषित रत्नभाण्डागारः 3.13*
6. *न्यायसिद्धान्तमुक्तावलिः।*
7. *वाक्यपदीयम्, (ब्रह्मकाण्डम् 1.1)*
8. *शाकुन्तलम्, 4.1*
9. *शाकुन्तलम्, 4.4*
10. *आद्यशंकराचार्यस्य दक्षिणामूर्तिस्तोत्रम्।*
11. *आद्यशंकराचार्यस्य*
12. *श्रीमद्भगवद्गीता, 4.8*
13. *पंचदशी*

# 5

# अभिनवगुप्तपादाचार्यस्य साहित्यिकं चिन्तनम्

***डॉ. सुमनकुमारः झा***

संस्कृतवाङ्मयेऽभिनवगुप्तपादाचार्यस्याद्वितीयं स्थानमिति सुविदितमेव विदुषाम्। भारतीयविद्या-साहित्य-कला-दर्शन-संस्कृति- चिन्तनाध्यात्म-समालोचनाञ्च संवर्धने सम्पोषणे चैतेषामवदानमप्रतिमं महनीयञ्च वर्तते। काश्मीरशैवदर्शनं यत्प्रत्यभिज्ञादर्शननाम्ना त्रिक्दर्शननाम्नाक्षपि विज्ञायते, तस्य प्रतिष्ठापकाचार्यत्वेनास्ति प्रसिद्धिः भारतीयदर्शनशास्त्रेऽभिनवगुप्तपादाचार्यस्य। अनेन हेतुनैव महामहेश्वराचार्याभिनवगुप्तपादाचार्ययोगिनीभूप्रभृतिभिरुपाधिभि-र्विभूष्यते श्रीमानभिवनगुप्तः।

वस्तुतः प्रत्यभिज्ञादर्शन-त्रिक्शास्त्र-नाटशास्त्र-काव्यशास्त्र-तन्त्रागमविद्या-गीताप्रभृतीनां शास्त्राणामाधिकारिकाचार्यत्वेन तेषां ख्यातिर्विद्यते भारतीयसाहित्ये। किं बहुना, ते कारयित्री-भावयित्रीत्युभयविधप्रतिभान्विताः तादृशाः प्रकृत्यभूताः महनीयाचार्याः सन्ति यैर्विना भारतीयसाहित्य-दर्शन-साहित्यशास्त्राणाञ्च विमर्शोऽपूर्णः प्रतीयते। साहित्यशास्त्रे तु तेषां महदवदानं वर्तते। अभिनवगुप्तस्यानन्तरं नाट्यशास्त्रे काव्यशास्त्रे च तस्यैव चिन्तनं मतञ्च प्रमाणत्वेन स्वीक्रियते परवर्तिभिराचार्यैः समीक्षकैश्चेत्यत्र न काऽप्यतिशयोक्तिः। आचार्योऽयं प्राधन्येन शैवदार्शनिक एव, अयमेव हेतुर्यदस्य साहित्यशास्त्रविषयककृतिष्वपि शैवसिद्धान्तानां समन्वयो नितरामनुभूयते। साहित्यशास्त्रस्य विकासयात्रायां विशेषतो नाट्यस्य दार्शनिकं विवेचनं, शैवदर्शनमनुसृत्य नाटशास्त्रीयपदार्थानां लक्षणनिरूपणं, रससिद्धान्तस्य दार्शनिकं विवेचनं, ध्वनिसिद्धान्तस्य प्रतिष्ठापनं, व्यञ्जनावृत्तेरनिवार्यत्वं, रससूत्रव्याख्यानक्रमे भट्टलोल्लटस्योत्पत्तिवादं भट्टशङ्कुकस्यानुमितिवादं भट्टनायकस्य भुक्तिवादञ्च

पूर्वपक्षत्वेनोपस्थाप्य तत्तन्मतं प्रमाणपूर्वकं निराकृत्य साहित्यशास्त्ररीत्या रसाभिव्यक्तिवादस्य स्थापनं, रसतत्त्वस्य दार्शनिकरीत्या स्वरूपनिरूपणं, रसानुभूतिप्रक्रियासन्दर्भे सामाजिकेन सह सम्बन्धस्थापनाय साधरणीकरण-सिद्धान्तप्रतिपादनं, सर्वविधकाव्येषु शान्तरसस्य स्थापनञ्चेत्यादिनानासिद्धान्तानां स्थापने प्रतिष्ठापने चैतेषामवदानमुल्लेखनीयं वर्तते।

वस्तुतोऽभिनवगुप्तपादाचार्याणां महिमा अनेनापि ज्ञायते यदद्यावधि नाट्शास्त्र-रसनिष्पत्तिप्रक्रिया-ध्वनिसिद्धान्तविषयेषु त एव प्रमाणभूताः सन्ति। परवर्तिषु नाट्यशास्त्रग्रन्थेषु काव्यशास्त्रग्रन्थेषु च तेषामेव विचाराः प्रभूतरूपेण निष्कर्षरूपेण परिलक्ष्यन्ते। प्रायशः सर्वैः परवर्तिभिराचार्यैः विविधेषु प्रसङ्गेषु साहित्यशास्त्रीयतत्त्वानां विवेचनक्रमे तेषामेव वचनं मतञ्च सादरं सप्रमाणञ्चोपस्थाप्येते। वस्तुतोऽभिनवगुप्तस्य वचनमेव चरममिति द्रढीयानो विश्वासः साहित्यशास्त्राचार्याणाम्, अद्यापि सैव परम्परा सर्वथा नितराञ्च स्थापिताऽस्तीत्यहो तेषां वैलक्षण्यम्।

साहित्यशास्त्रे यद्यपि तैर्न कोऽपि मूलग्रन्थो विरचितः प्रत्युत भरतमुनिविरचितस्य नाट्यशास्त्रस्य नाट्यवेदविवृत्ति नाम्नी टीका या अभिनवभारतीनाम्ना भारतीयसाहित्ये विश्रुता प्रसिद्धा च सञ्जाता, अपि च कश्मीरप्रदेशस्यैव युगप्रवर्तकाचार्यस्यानन्दवर्धनस्य विश्वप्रसिद्धो ग्रन्थो ध्वन्यालोकः, येन ग्रन्थेन साहित्यदर्शनस्य दिक्परिवर्तनमेव जातं, तस्य ग्रन्थस्य ध्वन्यालोकलोचननाम्नी टीका च विरचिते। परमनयोष्टीकाग्रन्थयोर्माहात्म्यं वैशिष्ट्यञ्च तथा प्रकृष्टं वर्तते यत्तौ टीकाग्रन्थौ मूलग्रन्थापेक्षयाक्षपि विशिष्टौ महनीयौ प्रौढौ च सञ्जातौ। टीकयोर्वैदुष्यपूर्णत्वात् प्रौढत्वाच्च ते साहित्यशास्त्रमौलिकग्रन्थेभ्योऽप्यतितरां महनीये प्रतिष्ठापूर्णे च गण्येते। किं बहुना, एतौ द्वौ टीकाग्रन्थौ विरच्य ते स्वयशःकायेन अमराः सञ्जाताः संस्कृतसाहित्यशास्त्रस्येतिहासे। एतदतिरिक्तं काव्यकौतुकविवरणनामकः टीकाग्रन्थोऽपि तेन प्रणीतः। अभिनवगुप्तस्योपाध्यायो भट्टतौतः काव्यकौतुकाभिधानं साहित्यशास्त्रग्रन्थमरचयत्। अभिनवगुप्तेन तस्य ग्रन्थस्य 'विवरण' नाम्नी टीका विरचिता। परं दौर्भाग्यादधुना नाऽप्ययं ग्रन्थः समुपलभ्यते, न च सा टीका। ग्रन्थस्याऽस्तित्वस्य प्रमाणानि ध्वन्यालोक लोचनेऽभिनव भारत्याञ्च तत्तत् प्रसङ्गेषु प्राप्तोद्धारणैः सम्प्राप्यन्ते।

साहित्यशास्त्रं विहायापि विविधविद्यासु विशालं साहित्यं व्यरचयदभिनवगुप्तः। तेन शैवदर्शन-तन्त्रशास्त्र-स्तोत्रसाहित्येषु च विपुलं साहित्यं प्रणीतम्। तेन विशालो ग्रन्थः 'तन्त्रालोकः' विरचितः, यः त्रिकशास्त्रस्य तन्त्रशास्त्रस्य वा विश्वकोशरूपेण प्रसिद्धो जातः। ग्रन्थोऽयं सप्तत्रिंशदाह्निकेषु विभक्तोऽस्ति, अभिनवगुप्तस्य नाट्यशास्त्रीयं चिन्तनं काव्यशास्त्रीयञ्च चिन्तनमवबोधाय ग्रन्थोऽयं नितरामुपयोगी वर्तते। वस्तुतोऽभिनवगुप्तेन शैवदर्शनरीत्या यत्साहित्यशास्त्रतत्त्वानां विवेचनमकार्षीत्, विशेषतो रसतत्त्वस्य रसाभिव्यक्तिवादस्य काव्यरचनाप्रक्रियायाश्च तस्य मूलं तन्त्रालोकग्रन्थे एवं प्राप्यते। ईश्वरप्रत्यभिज्ञाविमर्शिनी ईश्वरप्रत्यभिज्ञाविवृतिविमर्शिनी तन्त्रसारः परात्रिंशिकाविवरणं, मालिनीविजयवार्तिकं परमार्थसारः भैरवस्तोत्रं क्रमस्तोत्रं परमार्थचर्चास्तोत्रं, रहस्यपञ्चदशिकास्तोत्रमनुभवनिवेदनस्तोत्र मनुत्तराष्टिकास्तोत्रं गीतार्थसङ्ग्रहटीका चैतेषामन्याः कृतयः सन्ति।

अभिनवगुप्तेन संस्कृतेन साकं प्राकृतभाषायामपि बहूनि पद्यानि विरचितानि सन्ति। लोचनटीकायामभिनवभारतीटीकायाञ्च तद्विरचितानि नैकानि संस्कृत-प्राकृतपद्यानि समुपलभ्यन्ते। अनेन प्रतीयते यदसौ संस्कृतेन साकं प्राकृतभाषायामपि काव्यं विरचितवान् स्यात् यदधुना न प्राप्यते।

भारतीयसमीक्षाशास्त्र-सौन्दर्यमीमांसा-नाट्यकला-साहित्यदर्शनेषु अभिनवगुप्तस्य प्रभावः स्पष्टरूपेण परिलक्ष्यते। भारतीयज्ञानचिन्तनपरम्परायाः सम्पोषणे संवर्धने चास्यावदानमनुपमम्। अभिनवगुप्तस्य चिन्तनस्य प्रभावः पाश्चात्यविचारकेष्वपि दृश्यते। क्रोञ्चेमहोदयस्याभिव्यञ्जनावादः, टी. एस. इलियटप्रवर्तितो निर्वैयक्तिकसिद्धान्तश्च दृष्टान्तरूपेण द्रष्टुं शक्यते। किं बहुना, आचार्योऽयं महान् दार्शनिकः काव्यमर्मज्ञः सङ्गीतशास्त्रनिष्णातो नाट्यरसिकः सहृदयकविः साहित्यशास्त्रवेत्ता शिवस्यानन्योपासकः शिवभक्तश्चाऽऽसीत्। परमशैवत्वात् जगदिदं शिव-शक्त्यात्मकं मन्यते तेन। तन्मते सम्पूर्णं जगत् यथा शिवस्य परिस्पन्दनरूपं तथैव काव्यमपि रससिद्धकवेरन्तर्दर्शनं परिस्पन्दनरूपञ्च। अभिनवगुप्तस्य कृतिषु शिवतत्त्वस्य विविधरूपाणामद्भुतं निदर्शनं प्राप्यते।

ध्वन्यालोकलोचनटीकायाः मङ्गलपद्ये कविसहृदयाख्यातं काव्यतत्त्वं सर्वोत्कृष्टतममिति प्रदर्शितं तेन। यथा-अपूर्वं यद्वस्तु प्रथयति विना कारणकलां।

**जगद्ग्रावप्रख्यं निजरसभरात्सारयति च।**
**क्रमात्प्रख्योपाख्याप्रसरसुभगं भासयति तत्**
**सरस्वत्यास्तत्त्वं कविसहृदयाख्यं विजयते।।**

कविः साहित्यदृष्टा, कृतिश्च तस्य सृष्टिः। अस्याः सृष्टेः रहस्यवेत्ता आस्वादकश्च भवति सहृदयः। कविभिः स्व-प्रतिभया व्युत्पत्तिसामर्थ्येण कल्पनाशक्त्या च साहित्यसर्जनं क्रियते, परं काव्यस्य काव्यत्वं तु सहृदयैरेवावगम्यते। सहृदय एव काव्यस्य वास्तविक आस्वादकः काव्यमर्मवेत्ता च । स एव वस्तुतः साहित्यस्याधिकारी प्रमाता च। तेनोक्तम्- अधिकारी चात्र विमलप्रतिभानशाली सहृदयः इति। कविकर्म एव काव्यसर्जनं, तत्र यद्दर्शनं विद्यते, तस्यावबोधनं विमर्शनञ्च सहृदयस्य कर्म इति। वस्तुतः कविसहृदययोर्मध्येऽवस्थितं भवति काव्यम्। शब्दार्थमयेन काव्येनैव कविसहृदयोर्मिथो हृदयसंवादो जायते। हृदयसंवाद एव तादात्म्यमुच्यते। सहृदयस्य लक्षणमित्थं क्रियते तेन- येषां काव्यानुशीलनाभ्यासवशाद्विशदीभूते मनोमुकुरे तन्मयीभवनयोग्यता ते स्वहृदयसंवादभाजः सहृदयाः। काव्येषु वर्णितैः विषयवस्तुभिः साकं ऐक्यं संस्थाप्य, कविहृदयेन सह स्वहृदयसंवादस्थापक एव साहित्ये सहृदयः कथ्यते।

**कविप्रतिभा -** साहित्यशास्त्रे कविप्रतिभा सविशेषेण प्रतिपादिता आचार्यैः। वस्तुतः काव्यसर्जनं प्रतिभयैव जायते। 'काव्यं तु जायते जातु कस्यचित्प्रतिभावतः' इति भामहाचार्यवचनम् । 'नैसर्गिकी च प्रतिभा' इति दण्डिनो वचनम्। इयं प्रतिभा 'शक्तिः' पदेनापि कथिताऽस्ति साहित्यशास्त्रे। मम्मटाचार्येण- 'शक्तिः कवित्वबीजरूपः संस्कार विशेषः' इत्युक्तम्। रुद्रटाचार्येणापि -

**मनसि सदा सुसमाधिनि विस्फुरणमनेकधाभिधेयस्य।**
**अक्लिष्टानि पदानि च विभान्ति यस्यामसौ शक्ति।। इत्युक्तम्।**

अभिनवगुप्तेन प्रतिभातत्त्वमित्थं परिभाषितम्- 'प्रतिभा अपूर्ववस्तु निर्माणक्षमा प्रज्ञा, तस्या 'विशेषो' रसावेशवैशद्यसौन्दर्यं काव्यनिर्माणक्षमत्वम्।' अर्थात् अपूर्ववस्तुनिर्माणसमर्था प्रज्ञा एव प्रतिभा कथ्यते। 'प्रज्ञा-नवनवोन्मेषशालिनी प्रतिभा मता' इति भट्टतौतस्य मतम्। अभिनवस्य तु मतं विद्यते यत्प्रतिभाविशेषेणैव महाकवित्वगणना सम्पद्यते। कविसहृदययोः प्रतिभा समाना भवति। कविषु कारयित्रीप्रतिभा सविशेषेण दृश्यते तु सहृदयेषु भावयित्रीप्रतिभा, अत एव साधारणीकरणसिद्धान्तो घटते। इयमेव

प्रख्योपाख्यारूपेण कथिता अभिनवगुप्तेन। अभिनवगुप्तः प्रतिभां नमस्कुर्वता उवाच- यस्याः स्फुरणेन समग्रं विश्वं स्फुरितं भवति, तां प्रतिभां शिवां प्रणमामि। यथा -

**यदुन्मीलनशक्त्यैव विश्वमुन्मीलति क्षणात्।**
**स्वात्मायतनविश्रान्तां तां वन्दे प्रतिभां शिवाम्।।**

अभिनवगुप्तमते प्रतिभा शिवस्य शक्तिर्विद्यते। प्रतिभोन्मेषेण कवित्वशक्तिः समुल्लसति। सा प्रतिभा सर्वकामदुधा कथिता। प्रतिभैव शिवस्य विमर्शकारिणी शक्तिः। तन्त्रालोकग्रन्थे तेन प्रतिभायाः माहात्म्यमित्थं प्रदर्शितम्-

**चिन्वन्ति प्रतिभां देवीं सर्वज्ञत्वादिसिद्धये।**
**आद्योद्रेकमहत्त्वेऽपि प्रतिभात्मनि निष्ठिताः।।**
**ध्रुवं कवित्व-वक्तृत्वशालितां यान्ति सर्वतः।।**
**गुरुशास्त्रप्रमाणादेरप्युपायत्वमञ्जसा।**
**प्रतिभा परमेवैषा सर्वकामदुधा यतः।।**

अभिनवगुप्तपादाचार्येण शैवदर्शनमनुसृत्यात्र प्रतिभारूपा शिवाख्या पराशक्तिः वन्दिता। शैवदर्शनानुसारं परमशिवः कूटस्थतत्त्वमस्ति, किन्तु तं कूटस्थतत्त्वमायतनविश्रान्ता पराशक्ति एव स्वोन्मीलनशक्त्या झटित्यैव विश्वमुन्मीलयति। साहित्ये अस्या अयमर्थोऽभिव्यज्यते यत् कविप्रतिभैव नवनवोन्मेषशालिनी प्रज्ञाऽस्ति, सैव शिवास्वरूपा वर्तते, या महाकविषु रससिद्धकविषु वा निवसति अपि च स्वोन्मीलनशक्त्या साहित्यसंसारमुन्मीलयति, प्रकाशयति च।

निष्कर्षतः तन्मतमित्थं विद्यते- चरमसत्ता तु परमशिव एव। सिसृक्षाकाले परमतत्त्वमिदं द्विधा विभज्यते- शिवतत्त्वं शक्तितत्त्वञ्च। प्रथमं प्रकाशरूपं तु द्वितीयं विमर्शस्वरूपमस्ति। विमर्शदर्पण एव प्रकाशतत्त्वं स्वाहमभावं बोधयति। अस्मात् कारणादेव नाट्यशास्त्रस्याभिनवभारतीटीकायां प्रत्यध्यायं शिवतत्त्वं शिवातत्त्वञ्च प्रणम्येते तेन। यथा -

**षट्त्रिंशकं भरतसूत्रमिदं विवृण्वन्वन्दे शिवं श्रुतितदर्थविवेकि धाम।**
**विश्वबीजप्ररोहार्थं मूलाधारतया स्थितम्। धर्तुशक्तिमयं वन्दे धरणीरूपमीश्वरम्।।**

लोचनटीकायामपि शैवी दृष्टिरियं सर्वत्र व्याप्ता दरीदृश्यते। तन्मते सारस्वततत्त्वं नाम कविसहृदयाख्यम्। तत्त्वमिदं प्रख्योपाख्याभ्याम्;

दर्शनावर्णनाभ्यां, अपूर्वं पदार्थं सर्जयति, प्रस्तरसदृशनीरससृष्टिमपि सरसं करोति, तथैव भासयत्यपि।

वस्तुतोऽभिनवगुप्तेन कविप्रतिभां शिवाशक्तिञ्चैकरूपत्वमङ्गीकृत्य स्वचिन्तनमुपस्थापितम्। विश्वसृष्टि-शैवीसृष्ट्योः प्रक्रिया-परिणत्योरैक्यञ्च संकेतितम्। सा शिवा वन्दनीयाऽस्ति, या निरन्तरं स्वीये स्वरूपे एव विश्रान्ता तिष्ठति। विश्रान्तिरेव तु आनन्दः, अस्याः शक्त्या उच्छलनमेव विश्वमिदम्। काव्यसर्जनेऽपि इयमेव प्रक्रिया प्रवर्तते, तया शक्त्यैव कवयः काव्यसर्जनं कुर्वन्ति। काव्यसन्दर्भे, काव्यसर्जनसन्दर्भे सैव शक्तिः प्रतिभा नाम्ना सक्रिया भवति। सैव प्रतिभा कविहृदयेषु निरन्तरं वासनारूपत्वेन विद्यमाना भवति प्रतिभेयं शिवा, रसावेशवैवद्यसुभगा च वर्तते। प्रतिभेयं वर्णनीयवस्तुनिष्ठा प्रज्ञाविशेषा इति अपरनाम्ना ज्ञायते। अस्या उन्मीलने तदनुरूपं विश्वाभासोऽनुभूयते, परिलक्ष्यते च।

लोचनटीकायाः प्रत्युद्योतं प्रारम्भेऽन्ते चेयं प्रतिभादेवी या शिवा शक्तिस्वरूपाऽस्ति, तस्याः निरूपणं प्राप्यतेऽथ चानेनैव परा-पश्यन्ती-मध्यमा-वैखरीरूपां वाणी अपि प्रणम्यते। सन्दर्भेऽस्मिनभिनवगुप्तेन शक्ति-व्युत्पत्योरपि परिभाषा कृता। यथा-

**शक्तिः प्रतिभानं वर्णनीयवस्तुविषयनूतनोल्लेखशालित्वम्।**
**व्युत्पत्तिस्तदुपयोगिसमस्तवस्तु पौर्वापर्यपरामर्शकौशलम्।।**

अर्थात् वर्णनीयविषयवस्तुसंबन्धे किमपि नूतनं कथ्यनिरूपणं, नवीनञ्च तथ्यप्रदर्शनमेव शक्तिः, सैव प्रतिभा। तेषां वर्णनीयानां समस्तविषयवस्तुनां पौर्वापर्यपूर्वकं परामर्शकौशलमेव व्युत्पत्तिः। परवर्तिनि काले साहित्यशास्त्रेऽभिन-वगुप्तप्रतिपादितं प्रतिभास्वरूपं सर्वथा स्वीकृतम्। लावण्यमित्थं निरूप्यते तेन-लावण्यं हि नामावयवसंस्थाना- भिव्यङ्ग्यमवयवव्यतिरिक्तं धर्मान्तरमेव। अर्थात् लावण्यं तु धर्मविशेषो यदवयवानां संघटनेनाभिव्यज्यते, परमवयवेभ्यः पृथगेव भासते। एवमेव मुक्तकं लक्षयता तेनोक्तम्- पूर्वापरनिरपेक्षेणापि हि येन रसचर्वणा क्रियते तदेव मुक्तम्' इति।

प्रत्यभिज्ञा- अभिनवगुप्तपादाचार्यमते प्रत्यभिज्ञादर्शनस्य संबन्धे मनुष्यमात्रेण सह वर्तते। ध्वन्यालोकस्य- यत्नतः प्रत्यभिज्ञेयौ तौ शब्दार्थौ महाकवेः इत्यस्य व्याख्याप्रसङ्गे लोचनटीकायां प्रत्यभिज्ञानशब्दस्य विशिष्टा व्युत्पत्तिः प्राप्यते। महाकविभ्यः तादृशौ शब्दार्थौ प्रत्यभिज्ञेयौ, याभ्यां प्रतीयमानार्थोऽभिव्यज्यते। यद्यपि

ज्ञातस्य वस्तुनः पुनर्ज्ञानमेव प्रत्यभिज्ञानं कथ्यते तथाप्यत्र ज्ञानस्य विशेषरूपेणानुसन्धानमेव प्रत्यभिज्ञानमित्यनेन बोध्येत्। लोकव्यवहारे शब्दार्थयोः सामान्यरूपं दृश्यते, किन्तु काव्ये प्रयुक्त एव तयोः सीमा-सामर्थ्यविस्तरेणापूर्वमेव स्वरूपं प्रकाश्यते परिलक्ष्यते च। अतः ज्ञातस्य ज्ञानमेव नापितु ज्ञातस्य पुनः पुनरनुसन्धानरूपविशेषनिरूपणं प्रत्यभिज्ञानं वा कुर्यादिति। कथ्यमिदं महाकवि-सहृदयाभ्यां समानरूपेणापेक्ष्यते। आध्यात्मिकक्षेत्रेऽपि एवमेव सञ्जायते-ईश्वर आत्मनोऽभिन्नत्वेऽपि स्ववैभवं न प्रकटयति, स्वस्य विशेषरूपेण प्रत्यभिज्ञानाभावात्। काव्यसर्जनेऽपि शब्दार्थयोः प्रयत्नपूर्वकं प्रत्यभिज्ञानमपेक्षितं भवति। अभिनवगुप्तपादाचार्याः प्रत्यभिज्ञादर्शनस्य प्रतिष्ठिता आचार्याः सन्ति अतः स्वाभाविकमेव यत्तेषां साहित्यिकचिन्तनेषु दार्शनिकसिद्धान्तस्य प्रभावो भवेत्-तेनज्ञातस्यापि विशेषतो निरूपणमनुसन्धानात्मकमत्र प्रत्यभिज्ञानं, न तु तदेवेदमित्येतावन्मात्रम्।

## रससिद्धान्तोऽभिनवगुप्तश्च-

साहित्यशास्त्रस्य विवेच्यतत्त्वेषु रसतत्त्वं सर्वप्रधानमित्यत्र नास्ति काऽपि विप्रतिपत्तिः। रसो न केवलं नाट्स्यापितु काव्यस्यापि आत्मतत्त्वरूपेण समादृतो वर्तते। रसस्वरूपनिरूपण-रसानुभूति-रसनिष्पत्तिप्रक्रियाष्वभिनवगुप्तस्याभिमतं यथा समादृतं तथैव तन्निरूपिता प्रक्रियाऽपि परवर्तिभिराचार्यैः साहित्यसमीक्षकैश्चाभिनन्दिता स्वीकृता समादृता च। रसनिष्पत्तिप्रक्रियासन्दर्भे तन्निरूपितो रसाभिव्यक्तिवादो न केवलं भारतीयसाहित्येऽपितु विश्वसाहित्येऽपि समानरूपेण समादृतः प्रतिष्ठितश्च। परवर्तिनि काले रसाभिव्यक्तिवादमाश्रित्यैव साहित्यसमालोचनायाः प्रक्रिया प्रवर्तिता प्रतिष्ठिता च। साम्प्रतमपि भारतीयसाहित्यसमीक्षायाः प्रमुख आधारोऽभिव्यक्तिवाद एव स्वीक्रियते। तदनुसृत्यैवाधुनाऽपि साहित्यसमीक्षा प्रवर्तते।

अभिनवगुप्तः शैवदर्शनस्यालोके काव्यरसं रसनिष्पत्तिप्रक्रियां च विवेच्य, तं रसतत्वं, रसानुभूतिप्रक्रियां च चरमां प्रतिष्ठां प्रदत्तवान्। आनन्दवादिना तेन मन्यते यत्काव्यं तु वस्तुतो रसमयमेव, रसस्यैव वस्तुतः काव्यात्मत्वात्। पूर्णताया अपरं नाम आनन्दः। पूर्णता एव विश्रान्तिः, अतो यावदस्या परामर्शो न विधीयते, तावन्न भवति रसमयता। एतदर्थमपूर्णतायाश्चैतन्यस्य मुक्तिरनिवार्या। मुक्तिः विषयभूमिकायां भावभूमिकायाम् उत वा उभयातीतस्वरूपस्य भूमिकायां भवतु।

शैवदर्शनानुसारं संविद्विश्रान्तिरेव आनन्दस्य मूलम्। यदा चित्तं विगलितपरिमितप्रमातृ भाववशोन्मिषिते वेद्यान्तर सम्पर्कशून्यं भूत्वा विश्रान्त्यवस्थां तिष्ठति तदैव आनन्दानुभूतिः संभाव्यते। अनया दृष्टया परमानन्द-काव्यानन्द-विषयानन्देषु स्वरूपतो न किमपि पार्थक्यं प्रतीयते परं प्रक्रियाविश्रान्त्योर्मात्रात्मकं पार्थक्यं नूनमेव तिष्ठति। विषयानन्दे विषयव्यवधानं दृश्यते, काव्यानन्दे तेषां साक्षात् व्यवधानं तु न भवति परं तेषां संस्काराणां प्रभावो तु भवत्यैव, किन्तु ब्रह्मानन्दे तु शुद्धसंवेदनरूपता एवानुभूयते, स्वतन्त्रचित्तस्य पूर्णपरामर्शो जायते, अतोऽयमेव परमानन्दः, वास्तविकी निर्वृत्तिश्च।

काव्यानन्दो विषयानन्दाद्विलक्षणो भवति विगलितवेद्यान्तरत्वात्। विषयानन्दे चेतना परविषयान्मुखी भवति, काव्यानन्दानुभूतौ न तादृशी स्थितिः संलक्ष्यते। तत्र न कस्यापि विषयस्यार्जनविसर्जनयोर्वार्त्ता। अत एव इयमनुभूतिः 'वीतविघ्ना' कथ्यते, अत्र प्रकाशतत्वस्यापेक्षया हृदयतत्त्वं प्रधानं भवति। परमानन्दे विषयतायाः स्पर्शोऽपि न भवति शुद्धसंवेदनरूपत्वात्। पूर्णस्वात्मपरामर्श एव परमानन्दरूपता। अतोऽभिनवगुप्तमते इयं संविद्विश्रान्तिरेवानन्दस्य मूलम्। विश्रान्तेरस्याः प्रयोजिकाऽस्ति आत्मपरामर्शरूपता। आत्मपरामर्शेण संविद्विश्रान्तिरियं विभिन्नासु भूमिकासु भवितुं शक्नोति-विषयभूमिकायां,भावस्य भूमिकायां निज-चित्तस्वभावभूमिकायां च। एतासु भावभूमिकायां जायमाना संविद्विश्रान्तिरेव काव्यरसोऽस्ति।

इत्थमभिनवगुप्तमते भावभूमिकायाम् आत्मपरामर्शत्वेन या संविद्विश्रान्तिर्भवति सैव रसः। तन्मते आनन्दमयज्ञानरूपमात्मन एव रसरूपेणास्वादनं जायते। आत्मा आनन्दरूपं वर्तते रसश्चाप्यानन्दरूपमास्वाद्यत्वात्। ईश्वरप्रत्यभिज्ञाविवृतिविमर्शिनीग्रन्थे तेनोक्तम्- स्वरूपस्य स्वात्मनः परिपूर्णनिजस्वभावप्रकाशनमेव परामर्शमयतादद्यदानन्द इत्युच्यते- यत्रापि अत्यन्तमन्यथाभावमतिक्रम्य सुखमास्वाद्यते अर्जनादिसंभाव्यमान-विध्नान्तरनिरासाद् वैषयिकानन्दविलक्षणशृंगारादौ नाट्यकाव्यादिविषये तत्र वीतविघ्नत्वादैव असौ रसनाचर्वणा निर्वृत्तिः प्रतीतिः प्रमातृताविश्रान्तिरेव।

तन्मते रस एव काव्यमस्ति- 'रस एव नाट्यं नाट्यमेव रसो वा। काव्यरसं परोक्षप्रायं नाट्य रसञ्च प्रत्यक्षमिति द्वयोर्मध्ये पार्थक्यमपि परिलक्ष्यते। सन्दर्भेऽस्मिन् तन्त्रालोकग्रन्थे तेन सविस्तरेण विवेचितम्।

**अभिव्यक्तिवादः-** भरतरससूत्रस्य चतसृषु सुप्रसिद्धासु व्याख्याष्वभिनवगुप्तपादाचार्यस्य व्याख्याऽभिव्यक्तिवादनाम्ना ज्ञायते। तन्मते रसो व्यङ्ग्यः, विभावानुभावव्यभिचारिणश्च व्यञ्जकाः सन्ति। रससूत्रे समागता 'निष्पत्तिः' इत्यस्य पदस्यार्थोऽस्ति- अभिव्यक्तिः। संयोगपदेन व्यङ्ग्यव्यञ्जकभावसम्बन्धश्च ज्ञायते। अभिव्यक्तिवादानुसारं सामाजिकहृदये वासनारूपेणावस्थिताः रत्यादिस्थायिभावाः विभावादिभिव्यङ्ग्यव्यञ्जकभावेनाभिव्यज्यन्ते। वैयक्तिकरागद्वेषादीनां लोपात् साधारणीकरणेनैव रसानुभूतिर्भवति। एकेनैव व्यञ्जनाव्यापारेण साधारणीकरणमपि सम्पद्यते, रसास्वादनप्रक्रियाऽपि निष्पद्यते।

वस्तुतोऽभिनवगुप्तपादाचार्येण स्वपूर्वर्तिनामाचार्याणां मतानि संशोध्य परिशुद्धं मतं स्थापितम्। यथा-चोच्यते तेन -

**ऊर्ध्वोर्ध्वमारुह्य यदर्थतत्त्वं धीः पश्यति श्रान्तिमवेदयन्ती।**
**फलं तदाद्यैः परिकल्पितानां विवेकसोपानपरम्पराणाम्।।**
**चित्रं निरालम्बनमेव मन्ये प्रमेयसिद्धौ प्रथमावतारम्।**
**सन्मार्गलाभे सति सेतुबन्धपुरप्रतिष्ठादि न विस्मयाय।।**
**तस्मात् सतामत्र न दूषितानि मतानि तान्येव तु शोधितानि।**
**पूर्वप्रतिष्ठापितयोजनासु मूलप्रतिष्ठाफलमामन्ति।।**

अभिनवभारत्यामभिव्यक्तिवादेन सह भट्टलोल्लटस्योत्पत्तिवादस्य, भट्टशङ्कुकस्यानुमितिवादस्य भट्टनायकस्य भुक्तिवादस्यापि व्याख्यानं सविस्तरेण प्राप्यते। मम्मटादिभिराचार्यैरभिनवभारतीमाधृत्यैव रससूत्रस्य चतुर्धा व्याख्याः काव्यप्रकाशादिग्रन्थेषु निरूपिताः, सिद्धान्तरूपेण स्वीकृतश्चाभिव्यक्तिवादः।

इत्थमिदं स्पष्टरूपेण प्रतीयते यत् रसानुभूतिप्रक्रियासन्दर्भेऽभिव्यक्तिवाद एव रसनिष्पत्तिमवबोधयितुं सर्वोत्तमा वैज्ञानिकी पद्धतिर्वर्तते, या समग्रभारतीयसाहित्ये साहित्यसमीक्षकानां चिन्तने चानुस्युताऽस्ति।

काव्यप्रकाशस्य सङ्केतटीकाकारेण माणिक्यचन्द्रेणाभिनवगुप्तपादाचार्यस्याभिनन्दनमित्थं क्रियते- न वेत्ति यस्य गाम्भीर्यं गिरितोऽपि लोल्लटः।

**तत्तस्य रसपाथोधेः कथं जानातु शङ्कुकः।**
**भोगे रत्यादिभावानां भोगं स्वस्योचितं ब्रुवन्।**

**सर्वथा रससर्वस्वमभाङ्क्षीत् भट्टनायकः।।**
**स्वादयन्तु रसं सर्वे यथाकामं कथंचन।**
**सर्वस्वं तु रसस्यात्र गुप्तपादा हि जानते।।**

अभिनवगुप्तस्यैका अन्या च महत्वपूर्णा स्थापना विद्यते- साहित्यशास्त्रे शान्तरसस्य प्रतिष्ठापनम्। तैः सप्रमाणं शान्तरसः सर्वविधकाव्येषु मूलरसरूपेण स्थापितः। तन्मते शन्तरसः सर्वेषु रसेषु श्रेष्ठः, परमपुरुषार्थमोक्षनिष्ठत्वात्। यथा-मोक्षफलत्वेन चाऽयं परमपुरुषार्थनिष्ठत्वात् सर्वरसेभ्यः प्रधानतमः। तन्मते शान्त एव प्रकृतिरसोऽन्ये च तस्यैव विकृतयः। अत एव तेन शान्तो रसो मूलरसरूपेण प्रोक्तः। भारतीयसंस्कृतेः भारतीयजीवनदर्शनस्य च पर्यालोचनेन मतमिदं सर्वथा समुचितं प्रतीयते। परवर्तिभिराचार्यैरभिनवगुप्तस्य शान्तरसविषयकावधारणा पूर्णरूपेणाङ्गीकृता। मम्मटविश्वनाथजगन्नाथप्रभृतिभिराचार्यैः काव्यनाट्योरुभयत्र शान्तरसस्य सत्ता स्वीकृता।

इत्थमनेन परिशीलनेन निर्णीयते यत् संस्कृतसाहित्यं साहित्य-शास्त्रञ्चाभिनवगुप्तपादाचार्यस्य विचारेण पल्लवितं पुष्पितञ्च वर्तते। साहित्यशास्त्रे तेषामवदानस्य निरूपणमेकस्मिन् शोधपत्रे दुष्करमेव, तथापि संक्षेपेणात्र तन्निरूपितं साहित्यशास्त्रीयं चिन्तनमुपस्थापितम्। भारतीयसाहित्यस्य श्रीवृद्धौ अभिनवगुप्तपादाचार्याः सूर्यसदृशाः देदीप्यमानाः सन्ति, येषां विचाररूपिणः किरणाः भारतीयसाहित्यं साहित्यशास्त्रञ्च सदैव प्रकाशयिष्यन्ति।। इत्यलम्।।

**सन्दर्भग्रन्थाः -**


1. *ध्वन्यालोकलोचनम्, 1 पृ.-40*
2. *काव्यालङ्कार, 1/15*
3. *लोचनटीका, 1 पृ.-94*
4. *तत्रैव, 1 पृ.-172*
5. *तन्त्रालोक, 10/210*
6. *तत्रैव, 11/78, 79*
7. *तत्रैव, 11/156*
8. *अभिनवभारती-प्रथमोऽध्यायः, 2,3*
   *संसारनाट्यजननधातृबीजलताजुषीम्।*

*जलमूर्तिं शिवां पत्युः सरसां पर्युपास्महे। -द्वितीयोऽध्यायः।*
*स्वविलासैरिदं विश्वं यो दर्शयति सन्ततम्।*
*समीरमूर्तिं तं वन्दे गिरिराजसुताप्रियम्।। चतुर्थोऽध्यायः*
*संसारनाटयनिर्माणे याऽवकाशविधानतः।*
*पूर्वरङ्गायते व्योममूर्तिं तां शाङ्करीं नुमः।। - पञ्चमोऽध्यायः।*

9. *या स्मर्यमाणा श्रेयांसि----स्तुवे शिवाम्।।*
*प्राज्यं प्रोल्लासमात्रं----पश्यन्तीं तामिदं जगत्।।*
*स्मरामि स्मरसंहार-----हरन्ती परमेश्वरीम्।।*
*आसूत्रितानां भेदानां-----वन्दे मध्यमां परमेश्वरीम्।।*
*कृत्यपञ्चक निवहि-----तां नौमि शाङ्करीम्।*
*स्फुटीकृतार्थवैचित्र्य------वन्दे प्रत्यक्षार्थनिदर्शिनीम्।।*
10. *लोचनटीका, तृतीय उद्योतः-पृ.-346*
11. *अभिनवभारती, षष्ठोऽध्यायः-पृ. 650-651*
12. *सङ्केतटीका, चतुर्थ उल्लासः-पृ.-240*
13. *द्रष्टव्यम्, मम समीक्षाग्रन्थः, संस्कृतसाहित्ये साहित्यशास्त्रे च शान्तरसविमर्शः - संजयप्रकाशनम्, प्र.संस्करणम्-2016*

# 6

# धर्मशास्त्रसाहित्यस्य ऐतिह्यं क्रमविकासश्च

*डॉ. सितान्शुभूषणपण्डा*

सुविदितमस्ति तत्रभवतां धर्मधुरीणानां धार्मिकजनानां यत् परमपवित्रभूतोऽस्माकमयं भारतदेशः बहुप्राचीनकालादारभ्य धर्मप्रधानः धर्मप्राणश्चेति। परम्पराप्रचलिता अत्रत्या संस्कृतिरपि अतीव महनीया भवति। संस्कृतेरस्याः संरक्षणं भारतीयशिक्षायाः परमं चरमं चोद्देश्यं भवति। यतो ह्यस्माकं भारतवर्षे संस्कृतिसंस्कृतयोः प्रतिष्ठा सर्वादावेव महामनीषिभिः विहिता ।

भारतीया संस्कृतिः सर्वात्मना संस्कृतमेवाश्रयते । अतः संस्कृतस्य सुरक्षायै एव तत्संस्कृतिः सुरक्षिता स्यादिति नास्त्यत्र सन्देहलेशः। सांस्कृतिकमैतिह्यं सांस्कृतिकचेतना सांस्कृतिकजागरणं च देशं सर्वथा गौरवान्वितं विदधाति। जातीयसंस्कृतिपोषकस्य भारतीयप्राणकेन्द्रस्य संस्कृतस्य संरक्षणदायित्व-मितरापेक्षया अतीव महत्त्वपूर्णमेव। तदनुशीलनाभावाद् देशस्य महती क्षतिः समुत्पद्यते।

संस्कृतमेव भारतं भारतमेव संस्कृतमिति भारतसंस्कृतयोः प्राचीना परिचितिः। यत्र भारते 'स्वतः प्रमाणं परतः प्रमाणं कीराङ्गना यत्र गिरो गिरन्ति' इत्यनेन पक्षिणोऽपि भाषन्ते, तत्र मनुष्याणां का कथा। भारतीयसंस्कृतसंस्कृत्योः प्रतीकस्वरूपो वेद एव भारतीयानां प्राणकेन्द्रः, संस्कृति–साहित्य–कला–विज्ञानानामाधारभूतश्च। तदनुसारमेवास्माकं पुण्यभारतदेशस्य सभ्यता संस्कृतिरुज्जीविताऽस्ति। तं परिहाय एतत्सर्वं तमसि निमज्जेत।

धर्मार्थ काम मोक्षाख्य पुरुषार्थ चतुष्टय निष्पत्तिर्हि सर्वाभीप्सिता। विविध विद्या पठन पाठनैकबद्ध परिकराणां पण्डित मण्डली मण्डना-यमानानां विदितचरमेवात्र तत्रभवतां भवतां यन्निखिलेऽपि संसारे अतीतानेक जन्म

समुपार्जित पुण्य पाप सत्तायै जनानां खलु जनुषः सार्थकता। वेदेषु पुरुषार्थ चतुष्टयस्योपरि सम्यक् वर्णनमुपनिबद्धमस्ति। चतुर्षु पुरुषार्थेषु धर्मस्य प्राधान्यं प्राथम्यं च स्वीक्रियते। तदनुरोधेनैवान्येषां प्राप्तिर्भवति। वेदस्य जीवातुभूतोऽस्ति खलु धर्मः।

धर्मार्थकाममोक्षाख्येषु चतुर्षु पुरुषार्थेषु धर्मः प्रधानः। धर्मप्रतिपादकं शास्त्रं धर्मशास्त्रमुच्यते। धर्मशास्त्रं मुख्यतः पुरुषार्थ चतुष्टयं प्रतिपादयति। तेषु सर्वेषु पुरुषार्थेषु मनुष्यजीवनस्य मार्गप्रवर्तूतकरूपेण तथा नियन्त्रकरूपेण धर्मस्य प्राधान्यं स्वीक्रियते। जीवनस्य सर्वेषु कालेषु धर्मस्य प्रभावः साक्षात् परम्परया वा वर्तते। पुरुषार्थेषु पुरुषस्य प्रवृत्तिः सुखास्यैव भवति। जीवमात्रस्य सुखमत्यन्ताभीष्टम्। तस्माद् धर्मार्थकामाः पुरुषार्थाः प्रथमत आहरणीयाः। अनन्तरं स्वतः एव मोक्षः सिद्धयति। अर्थः यद्यपि अनर्थस्य कारणं तथापि धर्मेणोपार्जितोऽर्थः मनुष्यं सर्वविधानन्देन संयोज्य परवर्तितजीवनमपि सुखमयं करोति।

मनुयाज्ञवल्क्यादिभिः महर्षिभिः प्रणीतमिदं धर्मशास्त्रं समाजस्योपकारायैव प्रवर्तते। अतोऽस्य शास्त्रस्य महानादरः परिलक्ष्यते। सर्वेषां धर्मशास्त्रग्रन्थानां प्रवर्तनं धर्ममार्गस्य प्रतिपादनार्थमेव। अतः प्रतिवेदं प्रतिशाखां प्रतिप्रान्तमपि धर्मशास्त्राणि विरचितानि सन्ति। धर्मशास्त्रस्य वाङ्मयः विशालं रूपं धारयति।

**'धर्मो रक्षति रक्षितः'** इति मनुवचनं धर्मपालनार्थं घर्मरक्षाणार्थं च सर्वदोपदिशति। धर्मपालनस्यावश्यकतामनुभूय प्राचीनश्चाग्रगण्यः स्मृतिकारः मनुः स्वस्मृतौ धर्मपालकं धर्मरक्षकं च सर्वदा वैशिष्ट्यं प्रददाति। धर्मः धर्महन्तारं घातयति, धर्मरक्षकं सर्वात्मना पाति, आश्रयं च ददाति।

धर्मशास्त्रोक्ताः निखिलाः विषयाः श्रुत्यनुमापकत्वेन प्रमाणभूताः भवन्ति। ते सर्वे विषयाः प्रवृत्तिधर्मं निवृत्तिधर्मं चोपदिशन्ति। भगवान् वेदोऽपि धर्मस्य वृषस्वरूपं प्रतिपादयति। स च धर्मपालकस्याभिलषितफलप्रदानान्मन्वादिभिः वृष इति उच्यते। तस्यैव धर्मवृषस्य त्रयः पादाः आचारव्यवहारप्रायश्चित्तकाण्डत्रय-रूपाः भवन्ति। तदनुसारं धर्मशास्त्रस्य विषयाः आचारव्यवहार-प्रायश्चित्तभेदेन त्रिधा विभज्यन्ते।

धर्मशास्त्रे धर्ममाधारीकृत्य मोक्षादीनां पुरुषार्थानां प्राप्तिः प्रतिपादिता। धर्मः श्रौतस्मार्तभेदेन द्विधा विभक्तः। स्मार्तधर्मः धर्मशास्त्रस्य विषयीभूतः। धर्मशास्त्रे सज्जनैः क्रियमाणाः सकलधर्मार्जन विधयस्तथाऽधर्म निवारणाय प्रतिषेधा अपि प्रतिपदिताः सन्तिः। धर्मस्य तत्त्वं मानवस्य समग्रजीवनमभिव्याप्योपदिष्टम्। स्मार्तधर्मः षड्विधो भवति। षड्विधेषु स्मार्तधर्मेषु चतुर्ण्णां प्रतिपादनमाचारकाण्डे भवति। धर्मज्ञानां शिष्टानामाचरणमाश्रित्य धर्मे आचारस्य प्रामाण्यं स्वीक्रियते। आचार परिपालन मेव भारतीयधर्मस्य परमं वैशिष्ट्यम्।

वेदस्य निखिलभागस्य धर्मप्रतिपादकत्वेन तस्यैव शास्त्रत्वे प्रामाण्यम्। सर्ववेदद्रष्टत्वेन च मनुरेव प्रमाणम्। अन्येषां वेदाङ्गानां मीमांसादीनामपि वेदैः परम्परया सम्बन्धानां न धर्मशास्त्रवत् प्रत्यक्षसम्बन्धः। मन्वादिप्रणीतान्येव शास्त्राणि धर्मशास्त्राणीति आर्यजनपरम्पराप्रसिद्धानि। वेदान्तर्गतानां निखिलविषयाणां प्रतिपादकत्वाद् धर्मशास्त्रं भारतीय धार्मिक साहित्ये वैशिष्ट्यं धारयति। वेदानन्तरं धर्मप्रामाण्ये स्मृतेरेव मान्यतायाः स्वीकृतत्वात् श्रुतेश्च विप्रकीर्णत्वेनालब्धत्वात् सनातनीये धर्मे धर्मशास्त्रग्रन्थानां मौलिकं महत्त्वं विद्यते।

वैदिककालादाराभ्य अस्यां भारतभूमौ धर्मशास्त्रस्यास्य सुमहती परम्परा प्रचलति। धर्मशास्त्रस्य चर्चा मुनिभिः प्रचलिता। वेदरचनानन्तरं धर्मशास्त्रस्य विकाशः क्रमेण जातः। मानवजीवनस्य साफल्यार्थं मुनिभिर्धर्मग्रन्थे धर्मोपदेशाः प्रदत्ताः। ते धर्मोपदेशाः मानवानाम् आचारविचाररीतिनीतिकार्याणि नियन्त्रितानि कुर्वन्ति। धर्मशास्त्रेषु बहवो ग्रन्थाः वैदिककालादाराभ्य इदानीं यावत् विद्वद्भिः विरचिताः। धर्मशास्त्रविद्भिरेतेषां ग्रन्थानां श्रेणीविभागः चतुर्धा कृतः, सूत्र-स्मृति-भाष्य-निबन्धभेदैः।

**सूत्रसाहित्यम्**

सूत्रं नाम संक्षिप्ता भाषा। तल्लक्षणं चोक्तम्–अल्पाक्षरमसन्दिग्धं सारवद् विश्वतोमुखम्।

अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः।।[1]

सूत्रग्रन्थानां रचना उत्तरवैदिककाले अभूत्। तस्मिन् समये सर्वाण्येव शास्त्राणि सूत्रनिबद्धान्यासन। यथा- वेदान्ते ब्रह्मसूत्रं, सांख्ये सांख्यसूत्रं,

पूर्वमीमांसायां जैमिनीसूत्रं, न्याये वैशेषिकसूत्रं गौतमसूत्रञ्च, व्याकरणे पाणिनीयसूत्रं, साहित्ये भरतनाट्यसूत्रं, वामनकृता काव्यालङ्कारसूत्रवृत्तिश्च। तद्वत् वेदस्य षडङ्गेषु यः कल्पभागः सोऽपि सूत्रनिबद्धः आसीत्। कल्पस्य अर्थं स्पष्टीकृत्य विष्णुमित्रेण ''कल्पो वेदविहितानांकर्मणामानुपूर्वकेण कल्पनाशास्त्रम्'' इति प्रत्यपादि।[2] अर्थात् वेदविहितानां कर्मणां क्रमपूर्वक व्यवस्थित क्रियमाणं शास्त्रम्। अयमेव कल्पभागो धर्मशास्त्ररूपेण ख्यातम्। इदमेव कल्पसूत्रं वेदस्य शाखाभेदेन भिन्नं भिन्नं भवति। यथा महादेवेन हिरण्यकेशीसूत्रटीकायां ''तत्र कल्पसूत्रं प्रतिशाखं भिन्नमपि क्वचित् शाखा भेदादध्ययनभेदात् वा सूत्रभेदाद् वा आश्वलायनीयं कात्यायनीयं च सूत्रं हि भिन्नाध्ययनयोः द्वयोर्द्वयोः शाखयोरेकैकमेव। तैत्तिरीयके च समाम्नाये समानाध्ययने नानासूत्राणि। इह अनेन च सूत्रभेदे शाखाभेदः शाखाभेदे च सूत्रभेदः इति परस्पराश्रयः इति वाच्यम।''

इदमेव कल्पसूत्रं बहुधा विभज्यते। तद् यथा -

1. श्रौतसूत्रम्
2. धर्मसूत्रम्
3. गृह्यसूत्रम्
4. शुल्वसूत्रम्

**श्रौतसूत्रम्**

आलोच्यते तत् श्रौतसूत्रम्। तदपि शाखाभेदेन विभिन्नं भवति। तत्र ऋग्वेदस्य आश्वलायनश्रौतसूत्रं तथा शांखायनश्रौतसूत्रम्। शुक्लयजुर्वेदस्य कात्यायनश्रौतसूत्रम्, कृष्णयजुर्वेदस्य बौधायन- आपस्तम्ब- हिरण्यकेशी- भारद्वाज-वाराह-श्रौतसूत्राणि च। सामवेदस्य लाट्ट्यायनं श्रौतसूत्रं, द्राह्यायणश्रौतसूत्रं, जैमिनीयश्रौतसूत्रं च। अथर्ववेदस्य वैतानश्रौतसूत्र मित्यादि प्रामुख्यं भजन्ते।

**धर्मसूत्रम्**

धर्मसूत्रे आचारविधिना क्रियासंस्काराणां च वर्णनं मुख्यरूपेण प्राप्यते। विषयवस्तुद्रष्ट्या गृह्यसूत्रेणसम्बन्धो यद्यपि बहुशः प्राप्यते, तथापि धर्मसूत्रे धर्मस्य उपादानं, वर्णानामाचाराः, कर्त्तव्याकर्त्तत्यानि, जातिभेदः, आश्रमाणां नियमाः, व्यवहारः, राज्यशासनं, पुत्रभेदः, दायभागः, स्त्रीधनं, प्रायश्चित्तानां उल्लेखः प्राप्यते।धर्मसूत्रेषु गौतम बौधायना पस्तम्बहिरण्य केशीवसिष्ठ विष्णु हारीतशंख लिखितादीनां प्रणीत धर्मसूत्रणं प्रान्धान्यं सर्वैरङ्गीक्रियते। एतदतिरिक्तं धर्मसूत्रकाराणां मध्ये अर्त्युशनः- कण्व-कश्यप-गार्ग्य-दैवल-पैठीनसि-बुध-बृहस्पति-भारद्वाज-शातातपा-सुमन्तु-प्रभुतयोमुख्या भवन्ति।

**गृह्यसूत्रम्**

गृहे भवो गृह्यः। तत्र गृह्यो नाम वैवाहाग्निः। अस्य प्रमाणं खादिरगृह्यसूत्रे यत् ''यस्मिन्नग्नौ पाणिं गृह्णीयात् स गृह्यः''[3]। परन्तु पारस्कराचार्येण ''दायाद्यकाले एकेषम्''[4] इत्युक्त्वा गृह्यशब्दस्य पाणिग्रहणमुपलक्षणं लक्षितम्। अतो गृह्यशब्दः अग्नि परिधिः तदग्निसाधककर्मसु रूढः। ततो गृह्याग्निना क्रियमाणोपनयन- विवाहादिसंस्काराणां यज्ञादीनां वर्णनं गृह्यसूत्रे प्राप्यते। श्रौत सूत्रधर्म सूत्रवेदवत् गृह्यसूत्रमपि प्रतिवेदं दृश्यते। यथा–बहुवृतानाम् आश्वलायनगृह्यसूत्रं सांख्यायनगृह्यसूत्रमित्यदिः। छान्दोग्यानां गोभिलखदिरादीनि। अथर्वाणां कौशीतकी, तैत्तिरीयाणाम् आपस्तम्ब- बौधायन- सत्याषाढ- मानव- भारद्वाज- बाधूत- काठक- वारह- लौंगाक्षिगृह्यसूत्रादीनि भवन्ति। तथा शुक्लयजुर्वेदस्य पञ्चदशशाखानामपि पारस्करगृह्यसूत्रमेकमेव।

**शुल्वसूत्रम्**

शुल्वं नाम मापक्रिया। इदं सूत्रमेव भारतीयज्यामितिशास्त्रस्य प्रवर्तकम्। विभिन्नेषु यज्ञेषु यज्ञवेदीनां निर्माणविधिः शुल्वसूत्रेभ्यः प्राप्यते।

**स्मृति साहित्यम्**

''श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः''[5] इति मनुवचनानुसारं स्मृतिर्भवति धर्मशास्त्रम्। वेदानुमापकत्वेन ह्यस्य शास्त्रस्य प्रामाण्यम्। प्राचीनकाले श्रुतिग्रन्थाः स्वल्पा आसन्। परन्तु परवर्तिकाले स्मृतिग्रन्थानां बाहुल्यं जातम्। बौधायनानुसारं कात्यायन- औपर्जघनि-काश्यप-प्रजापति-मुद्गल-हारीतप्रभृतयो धर्मशास्त्रकाराः आसन्। वसिष्ठस्तु गौतम-प्रजापति-यम-हारीतादीनां स्मृतिकाराणां नामानि उद्धरति। आपस्तम्बस्तु स्मृतिकारत्वेन कुणिक-पुष्करादि-दशकुलान् स्मरति। याज्ञवल्क्यस्मृतौ तु मन्वादीनां विंशतिस्मृतिकाराणां नामानि वर्तन्ते। तद्यथा–

मन्वत्रिविष्णुहारितयाज्ञवल्क्योशनोऽङ्गिराः। यमापस्तम्बसंवर्ताः कात्यायनबृहस्पती।।

पराशरव्यासशङ्खलिखिता दक्षगौतमौ। शतातपो वसिष्ठश्च धर्मशास्त्रप्रयोजकाः।।[6]

पराशरेण तु बृहस्पति-यम-व्यासादीनां नामानि नैव स्वीकृतानि। परन्तु काश्यप-गार्ग्य-प्रचेतादीनां नामानि गृहीतानि।

पैठीनसी स्मृतीनां नामानि लिखिति। अपरार्कमतानुसारं भविष्यपुराणेऽपि 36 स्मृतीनां नामानि प्रतिपादितानि वर्तन्ते। कमलाकरभट्ट-नीलकण्ठभट्टयोर्मतेन स्मृतीनां संख्या 100 भवन्ति। एतैः सर्वैरपि भिन्नत्वेन उपस्मृतिनां कल्पना कृता। एतासां संख्याऽपि क्वचित् स्मृतिसंख्यया सह समाना भवति।

**भाष्यसाहित्यम्**

अस्माकं धर्मशास्त्र साहित्य शास्त्रे भाष्यकाराणां नाम अन्यतममस्ति। मनु-याज्ञवल्क्य-पराशरादीनां प्रमुख स्मृति ग्रन्थानां बहवो भाष्यकाराः सन्ति। तत्रादौ मनुस्मृतेः नवभाष्यकाराः सन्ति। तेषां भाष्याणामपि नामानि परिगणितानि वर्तन्ते। तद्यथा

**मनुस्मृतेः -**

1. मेघातिथेः मनुभाष्यम, 2. गोविन्दराजस्य मनुटीका, 3. कुल्लकस्य मन्वर्थमुक्तावली, 4. सर्वज्ञनारयणस्य मन्वर्थनिबन्धः, 5. नन्दनस्य मनुव्याख्यामन्, 6. रामचन्द्रस्य मनुभावार्थचन्द्रिका, 7. माणिरामस्य मन्वर्थबोधिनी, 8. भारुचेः भारुचिटीका, 9. राघवानन्दसरस्वत्याः मन्वर्थचन्द्रिका चेति ।

याज्ञवल्क्यस्मृतेरपि सप्तभाष्यकाराः सन्ति। यथा - 1. विश्वरूपस्य बालक्रीडा 2. विज्ञानेश्वरस्य मिताक्षरा 3. शूलपाणेः दीपकलिका 4. अपरार्कस्य अपरार्कयाज्ञवल्क्यधर्मशास्त्रनिबन्धः 5. मित्रमिश्रस्य वीरमित्रोदयः 6. बालभट्टस्य बालम्भट्टी 7. विज्ञानेश्वरकृत- मिताक्षरोपरि अपि प्रमिताक्षरा प्रतिताक्षरा वा नन्दपण्डितेन विरचिता। विश्वेश्वरभट्टेनाऽपि मिताक्षरायाः उपरि सुबोधनीटीका प्रणितायातु विद्यापीठेऽस्मिन् प्रकाशिता अस्ति।

पराशरस्मृतेरपि पराशरमाधवीयनाम्ना सुप्रसिद्धा सुप्रख्याता च टीका अस्ति। अस्याः प्रणेता माधवाचार्यः। नारदस्मृतेरपि असहायटीका समुपलभ्यते।

गौतमधर्मसूत्रस्य पञ्चटीकाः सन्ति। यथा – 1. हरदत्तस्य मिताक्षरा 2. मस्कराचार्यस्य मस्करी टीका 3. पण्डितकुलमणि- मिश्रस्य सूक्ष्मा 4. असहायस्य असहायटीका 5. भर्तृयज्ञस्य भर्तृयज्ञटीका च। आपस्तम्बधर्मसूत्रोपरि हरदत्तस्योज्ज्वला नामाऽपि टीका अस्ति।

धर्मशास्त्रस्य साहित्यचतुष्टये निबन्धसाहित्यस्य स्थानं सर्वोत्तमस्ति। सूत्र-स्मृत्यादिबृहद्ग्रन्थानां भाष्यप्रणयने यदा विदुषामनादरो जातस्तदानीमेव धर्मशास्त्र निबन्ध साहित्यस्य अभ्युदयोऽभूत्। धर्मशास्त्र निबन्धास्तु विभिन्नेभ्यः प्रामाणिकग्रन्थेभ्यः प्रमाणवचनानि संगृह्य तत्र स्थलविशेषेषु स्वमतपरिपोषणेन स्मृतिनिबन्धग्रन्थान् रचिताः। अत्र निबन्धकाराः क्वचित् वर्द्धयन्ति। क्वचित् वर्द्धितं संक्षेपयन्ति, क्वचित् परमतखण्डनपूर्वकं स्वमतमुपस्थापयन्ति इत्यत्रेदमेव वैशिष्ट्यम्। अस्यैव स्मृति निबन्धसाहित्यस्य कालः प्रायशः सप्तम् शतकादारभ्योनविंश- शतकावधिपरिव्याप्तो वर्तते। एषु स्मृति निबन्धेषु केचन् दाक्षिणात्याः अन्ये वंगीयाः, अपरे उत्कलीयाः, इतरे मैथिलाश्च भवन्ति। एषु च केषाञ्चन मतानि निखिलेऽपि भारतदेशे समाद्रीयन्ते। अन्येषां केषाञ्चन मतानि निखिलेऽपि भारते साद्रीयन्ते। अन्येषां केषाञ्चन मतानि स्थान विशेषेष्वेवाङ्गीक्रियन्ते। प्रदेश भेदेष्वेतेषु पूर्वोक्तेषु धर्मशास्त्रनिबन्धेषु शतानन्दशम्भुकरवाजपेयि- विद्याकरवाजपेयि- नरसिंहवाजपेयि- प्रतापरुद्रदेव- विप्रमिश्र- वृहस्पति- दिव्यासिंह– रघुनाथ- गदाधरप्रभृतयः उत्कलीयाः, हेमाद्रि-माधवाचार्यप्रभृतयः दाक्षिणात्याः, जीमूतवाहन-रघुनन्दन-शुलपाणिप्रभृतयो वङ्गीयाः, लक्ष्मीधर-श्रीदत्तोपाध्याय-चण्डेश्वरादयश्च मैथिल्याः स्मृतिनिबन्धारो भवन्ति। एषु स्मृतिनिबन्धेषु शतानन्दस्यशतानन्द संग्रहः, शम्भुकरस्य शम्भुकरपद्धतिः, विद्याकरस्य विद्याकरपद्धतिः, नरसिंहमिश्रवाजपेयिनः चयन प्रदीप प्रतिष्ठा प्रदीपादयो ग्रन्थाः, प्रतापरुद्रदेवस्य सरस्वतीविलासः, विप्रमिश्रस्य श्राद्धप्रदीपः, विश्वनाथस्य स्मृतिसारसंग्रहः, बृहस्पतेः कृत्यकौमिदी, दिव्यसिंहस्य कालदीप-श्राद्धदीपादयो ग्रन्थाः, रघुनाथ-दासस्य कालनिर्णय-श्राद्धनिर्णयप्रभृतयो ग्रन्थाः, गदाधरराजगुरोः गदाधरपद्धति-श्चेत्येते धर्मशास्त्रनिबन्धग्रन्थाः प्रमुखाः भवन्ति। हेमाद्रेश्चतुर्वर्गचिन्तामणिः, माधवाचार्यस्य कालमाधवः, जीमूतवाहनस्य कालविवेक- दायभागादयो ग्रन्थाः, रघुनन्दनस्य स्मृतितत्त्वं, शूलपाणेः प्रायश्चित्तविवेकः, लक्ष्मीधरस्य कृत्यकल्पतरुः, श्रीदत्तोपाध्यायस्य धर्मसिन्धुः, चण्डेश्वरस्य स्मृतिरत्नाकरश्चेति।

एतैः धर्मनिबन्धृभिः विविधाः श्रुति-स्मृति-पुराणवचनानि संगृह्य देशाचारकुलाचारादीन् अनुसृत्य प्रकृष्टयुक्तिश्चावलम्ब्य विविधसन्दिग्धविषयाणां

विशिष्टविवेचनं विधाय स्थलविशेषेष्वपि निजनिष्कर्षो निरूपितः, येन धर्मजिज्ञासूनां विदुषां महानुपकारोऽजायत।

धर्मशास्त्रीय सूत्र साहित्याकाशे ये ये विषयाः प्रतिपादिताः सन्ति ते प्रायशः संक्षिप्तरूपेण सूत्राकारेण च विवेचिताः दृश्यन्ते। स्मृतिसाहित्ये तेषामेव विषयाणां किञ्चिद्विस्तृतरूपेण विवेचनं स्मृतिकारैः कृतम्। भाष्यसाहित्ये भाष्यकारैः बहुप्रमाणिक धर्मशास्त्र काराणां मतानि संगृह्य तेषां सम्यग्विवेचनं च कृत्वा विषयाणां व्याख्या विहिता। परन्तु स्मृतिनिबन्धसाहित्याकाशे स्मृतिनिबन्धृणां स्मृतिनिबन्धरचनायां तदपेक्षया व्यतिक्रमो दृश्यते। स्मृतिनिबन्धकारेषु विभिन्नेभ्यः प्रामाणिक-ग्रन्थेभ्यः कोशेभ्यः पुराणेभ्यश्च प्रमाणवचनानि संगृह्य तेषां सम्यग्विवेचनं च विधाय स्मृतिनिबन्धग्रन्थाः विरचिताः। अस्य कालस्य प्रथमो भागो प्रसिद्ध स्मृति भाष्यकाराणां सुवर्णयुगमित्युच्यते।

वस्तुतः ख्रीष्टीयद्वादशतकादारभ्य स्मृतीनां धार्मिक सिद्धान्त आधारणे स्वतन्त्ररूपेण स्मृति निबन्धग्रन्थान् लिखितुं धर्मशास्त्रविदां महती प्रवृत्तिर्जाता। स्मृतिसूत्रे च येषां येषां विषयाणां विवेचनं संक्षिप्तेनैव स्मृतिकारैः सूत्रकारैश्च विहितं, तेषां तेषां विषयाणां विस्तृतविवेचनं पृथक् पृथग्रूपेण ग्रन्थकारैः स्मृतिनिबन्धृभिः च कृतम्। उदाहरणार्थं केषाञ्चन स्मृतिनिबन्धृणां नामानि तत्प्रणीतस्मृति निबन्ध- ग्रन्थनामानि चाधः प्रस्तूयन्ते। यथा –

**(क) लक्ष्मीधरस्य ''कृत्यकल्पतरुः''** 1. व्रतकाण्डः, 2. शुद्धिकाण्डः, 3. व्यवहारकाण्डः, 4. ब्रह्मचारीकाण्डः 6. नियतकालकाण्डः, 6. गृहस्थकाण्डः, 7. दानकाण्डः, 8. तीर्थकाण्डः, 9. राजधर्मकाण्डः, 10. मोधकाण्डश्चेति।

**(ख) देवणभट्टस्य ''स्मृतिचन्द्रिका'' -** 1. संस्कारः, 2. आह्निकः, 3. व्यवहारः, 4. श्राद्धम्, 5. अशौचंचेति।

**(ग) चण्डेश्वरस्य ''स्मृतिरत्नाकरः''–** 1. कृत्यारत्नाकरः, 2. दानरत्नाकरः, 3. व्यवहाररत्नाकरः, 4. शुद्धिरत्नाकरः, 5. पूजारत्नाकरः, 6. विवादरत्नाकरः, 7. गृहस्थरत्नाकरश्चेति।

**(घ) विश्वरभट्टस्य ''मदनपारिजातः''–**1. ब्रह्मचर्यम्, 2. गृहस्थधर्मः, 3. आह्निककृतम्, 4. संस्कारः, 5. आशौचम्, 6. द्रव्यशुद्धिः, 7. दायभागः, 8. श्राद्धम्, 9. प्रायश्चित्तञ्चेति।

(ङ) **शूलपाणेः ''स्मृतिविवेकः''**– 1. एकादशीविवेकः, 2. तिथिविवेकः, 3. दत्तविवेकः, 4. दुर्गोत्सवप्रयोगविवेकः, 5. दोलयात्राविवेकः, 6. प्रतिष्ठाविवेकः, 7. प्रायश्चित्तविवेकः, 8. रासयात्राविवेकः, 9. व्रतकालकविवेकः, 10. शुद्धिविवेकः, 11. श्राद्धविवेकः, 12. संक्रान्तिविवेकः, 13. सम्बन्धविवेकश्चेति।

(च) **वाचस्पतिमिश्रस्य ''चिन्तामणिः''** – 1. आचारचिन्तामणिः, 2. शुद्धिचिन्तामणिः, 3. कृत्यचिन्तामणिः, 4. तीर्थचिन्तामणिः, 5. दत्तचिन्तामणिः, 6. विवादचिन्तामणिः, 7. नीतिचिन्तामणिः, 8. व्यवहारचिन्तामणिः,
9. शुद्धाचारचिन्तामणिश्चेति।

(छ) **रघुनन्दनस्य ''स्मृतितत्त्वम्''** – 1. तिथितत्त्वम्, 2. श्राद्धतत्त्वम्, 3. आह्निकतत्त्वम्, 4. प्रायश्चित्ततत्त्वम्, 5. ज्योतिषतत्त्वम्, 6. मलमासतत्त्वम्, 7. संस्कारतत्त्वम्, 8. एकादशीतत्त्वम्, 9. व्रतत्त्वम्, 10. दायतत्त्वम्, 11. व्यवहारतत्त्वम्, 12. शुद्धितत्त्वम्, 13. वास्तुयागतत्त्वम्, 14. कृत्यतत्त्वम्, 15. यजुर्वेदीयश्राद्धतत्त्वम्, 16. देवप्रतिष्ठातत्त्वम्, 17. जलाशयोत्सर्गतत्त्वम्, 18. छान्दोग्यवृषणोत्सर्गतत्त्वम्, 19. स्त्रीपुरुषोत्तमतत्त्वम्, 20. दिव्यतत्त्वम्, 21.मठप्रतिष्ठादितत्त्वम्, 11. शूद्रकृत्यविचारणतत्त्वम्, 23. यजुर्वेदीय-वृषोत्सर्गतत्त्वम्, 24. दीक्षातत्त्वम्, 25. श्रीदुर्गाचञ्चनपद्धतिः, 25. तीर्थतत्त्वम्, 27. यात्रतत्त्वञ्चेति।

(ज) **मित्रमिश्रस्य ''वीरमित्रोदयः''**– 1. परिभाषाप्रकाशः, 2. संस्कारप्रकाशः, 3. आह्निकप्रकाशः, 4. पूजाप्रकाशः, 5. लक्षणप्रकाशः, 6. राजनीतिप्रकाशः, 7. तीर्थप्रकाशः, 8. व्यवहारप्रकाशः, 9. श्राद्धप्रकाशः, 10. समयप्रकाशः, 11. भवितप्रकाशः, 12. शुद्धिप्रकाशश्चेति।

(झ) **नरसिंहवाजपेयिनः प्रदीपग्रन्थाः** – 1. चयनप्रदीपः, 2. भक्तिप्रदीपः, 3. वर्षप्रदीपः, 4. प्रायश्चित्तप्रदीपः, 5. श्राद्धप्रदीपः, 6. प्रतिष्ठाप्रदीपः, 7. शावरभाष्यप्रदीपः, 8. प्रतीमाप्रदीपः, 9. शान्तिप्रदीपः, 10. समयप्रदीपः, 1. व्यवस्थाप्रदीपश्चेति

(ङ) **गदाधरराजगुरोः ''गदाधरपद्धतिः''**– 1. आचारसारः, 2. कालसारः, 3. दानसारः, 4. व्रतसारः, 5. विवाहसारः, 6. शुद्धिसारः, 7. स्नानसारः, 8. संस्कारसारश्चेति।

(ट) **नीलकण्ठस्य द्वादशमयूखात्मको भगवन्तभास्करः** - 1. संस्कारमूखः, 2. आचारमयूख, 3. कालमयूखः, 4. श्राद्धमयूखः, 5. नीतिमयूखः, 6. प्रायश्चितमयूखः, 7. व्यवहारमयूखः, 8. दायमयूखः, 9. उत्सर्गमयूखः, 10. प्रतिष्ठामयूखः, 11. शुद्धिमयूखः, 12. शान्तिमयूखश्चेति।

एवं प्रकारेण बहूनां स्मृतिनिबन्धृणां बहवो स्मृतिनिबन्धग्रन्थाः वर्तन्ते। एतेषु बहवो ग्रन्थाः मुद्रिताः प्रकाशिताश्च, स्वल्पसंख्याकग्रन्थाः अप्रकाशितावस्थायां मातृकारूपेण संस्थिताः दृश्यन्ते।

**सन्दर्भग्रन्थाः -**


*1. ल.सि.कौ–पृ.1*

*2. आ.ध.सू.भू - प.11*

*3. खा.गृ.सू - 1/5/1*

*4. पा.गृ.सू -1/2/2*

*5. म.स्मृ - 2/10*

*6. या.स्मृ - 1/4-5*

# 7

# काव्यविभूषितमृग्वेदीयोषः सूक्तम्

*डॉ. किरण आर्या*

**नतज्ज्ञानं न सौन्दर्यं न सा विद्या न सा कला।**
**नासौ योगो न तत्कर्म वेदेऽस्मिन् यन्न दृश्यते।।**

संस्कृते भारतीयकलायाः यान्यपि तत्त्वानि , सौन्दर्यस्य च यानि तत्त्वानि आदितः अद्यावधि येषु संस्कृतमयेषु काव्येषु, काव्यग्रन्थेषु, नाट्येषु, नाट्यग्रन्थेषु, गीतिषु, कवितासु दृश्यते, तस्य सकलस्य मूलस्रोतास्तु वेदा एवेति निश्चप्रचम्, विदुषाञ्चेहैकमत्यम्, वेदकाव्यानां सृष्ट्यादौ प्रवर्तमानत्वात् - 'पश्य देवस्य काव्यं न ममार न जीर्यति' (अथर्व. 10.8.32) इति स्वयं वेदभगवता प्रोक्तत्वाच्च। अतः 'सर्वज्ञानमयो हि सः'(मनु.) इत्युक्तत्वात् नातिशयोक्तिरिदं वर्तते यत् वेदाः एव काव्यस्योद्भावकाः काव्यतत्त्वस्य च परिचयदायकाः सन्ति। यतोहि - 'वाक्यं रसात्मकं काव्यम्' (सा. द.) विश्वनाथस्य समुचितमिदं लक्षणं वयं काव्यलक्षणं स्वीकुर्मश्चेत् वेदा अपि सरसाः सन्तः काव्यत्वं धारयन्ति। यथा चोक्तम् -उत्कर्षहेतवः प्रोक्ता गुणालंकाररीतयः, अतः रसमयोत्कर्षकरूपाः रीतिगुणालंकारादयः एव काव्यतत्त्वानि सन्ति। तथा चैतेषां प्रचुरता अपि वेदेषु दृश्यते एव। नाट्यशास्त्रस्य तु रचना एव वैदिकसंवाद-सूक्तानि चाधिकृत्य वर्तते। यतोहि वेदोक्त-विश्वामित्रनदीसंवाद (नद्यःसूक्तं), पुरुरवा-उर्वशीसंवादा एव नाट्यस्थसंवादानां आदर्शाः प्रेरणादायकाश्च सन्ति। अर्थात् वेदेभ्यः एव दृश्यश्रव्योभयकाव्ययोरुत्पत्तिः इत्यत्र न कश्चित् सन्देहः।

सौन्दर्यमित्युच्यमाने सति सुन्दरस्य भावः सौन्दर्यम्। सुन्दरमिति शब्दः हलायुधकोशानुसारेण - सुष्ठु उनत्ति आर्द्रीकरोति चित्तमिति शब्दार्थं द्योतयति। व्याकरणशास्त्रस्य प्रकृति-प्रत्ययनुसारेण सु + उन्द् + अरन् = सुन्दरम्, यत्

सुष्ठुतया आर्द्रयति। सुन्द + रा + आदाने= सुन्दरम्, यत् सौन्दर्यं ग्राहयति। सु + द्रव् + अप्= सुन्दरः, यः चित्तं द्रवयति, तदुच्यते सुन्दरम्। संस्कृतस्य लब्धप्रतिष्ठैः विख्यातैः काव्यशास्त्रिभिः वामनभामहादिभिः सौन्दर्यस्य सम्बन्धः व्याकरणेनैव मन्यते, अत एव वामनः - 'सौन्दर्यमलंकारः' इत्युदीर्य अलंकारस्य, कालिदासः -'किमिव मधुराणां मण्डनं नाकृतीनाम्' पद्येन नैसर्गिकसौन्दर्यबोधस्य, माघः -'क्षणे-क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः' प्रोच्य नितनूतननवीनतायाः, आनन्दवर्धनश्च -'अलंकारो हि चारुत्वहेतुरुच्यते' इत्युक्त्वा अलंकारसौन्दर्यस्य महत्त्वं वर्धयन् चित्तद्रवीभावमेव प्रस्तौति। वेदेषु स्वस्तिशब्देनापि सौन्दर्यस्य तत्त्वं परिभाषितमस्ति, स्वस्तिशब्दः सु अस्ति इति शब्दद्वययोगेन संयुक्तः। सु इत्यस्य अर्थः सुन्दरम्, अस्ति इत्ययं च शब्दः सत्तायाः द्योतकः, अतः स्वस्तिशब्दस्य तात्पर्यं भवति सुन्दरं सत्यम्। सौन्दर्यसाधनस्य एषा प्रवृत्तिः वाङ्माध्यमेन वैदिकऋचासु, कर्ममाध्यमेन हवनपूजादिरूपेषु व्यक्ता भवति।

वेदेषु उपमानानाम्, अलंकाराणां, रसानां सौन्दर्यं यत्र तत्र सर्वत्र विद्यते परं ऋग्वेदस्य उषस्-सूक्तमतिशयेन काव्यात्मकसौन्दर्येण मण्डितं प्रतिभाति। स्वयं उषसः सर्जना, वैदिक-ऋषीणां सौन्दर्यभावनायाः अप्रतिमसर्जनाऽविद्यत। उषसः वर्णनमाध्यमेन ऋग्वेदस्य कवयः निजालौकिकप्रतिभा- मभिव्यंजयन्ति, तस्याः देव्याः अनुपमं सौन्दर्यं न कश्चिद्देवः देवी वा आप्नोति सकलेऽपि वैदिकसाहित्ये।

'वस् दीप्तौ' धातुना निष्पन्नः 'उषा' शब्दः - प्रकाशमाना देवी, दीप्तिमती देवी इत्यर्थमवगमयति। प्रकाशस्य च सौन्दर्यच्छटा अलौकिकमेव बोधवीति। नर्तकी इव सुभूषिता, देदीप्यमानानि वासांसि धारयन्ती सा सौन्दर्यशालिनी उषा निजचित्ताकर्षकं रूपं प्रतिदिवसं प्रकटयति। आपृथिव्याः द्युलोकं यावत्तस्या एव सौन्दर्यं दरीदृश्यते -

**अव स्यूमेव चिन्वती मघोन्युषा याति स्वसरस्य पत्नी।**
**स्वर्जनन्ती सुभगा सुदंसा आन्तात् दिवः पप्रथ आ पृथिव्याः।।**

वक्तीयमृक् यत् सा उषा काचिल्लावण्यमयी सुरूपवती स्त्रीसमाना प्रतिप्रातः पूर्वस्यां दिशि अतो विराजते यद्वयं तस्याः अलौकिसौन्दर्यस्य दर्शनं कुर्याम। उदीयमाना सुन्दरी उषा आत्मसौन्दर्यविस्तारलालसया स्वप्रकाशवस्त्राणि सर्वत्र तनाति। सोऽयमुषःकालः सर्वेषां कृते सौभाग्यत्वजनकः दौर्भाग्यत्वापसारकश्च भवति अत एवर्षीणामियमाशा भवति यन्नक्षत्रणामुषसां चास्तंगते सति अस्माकं सर्वं दुर्भूतमप्यस्तंगच्छेदिति -

अपवासे नक्षत्रणामपवास उषसामुत। अपास्मत् सर्व दुर्भूतमपक्षेत्रियमुच्यते।।

वेदार्थद्रष्टारः ऋषयः उषसः वर्णनकाले तस्याः दैविकं भौतिकं मानवीयं च स्वरूपं वेदार्थेषु परिपश्यन्ति। सद्याःस्नातेयं नर्तकीसदृशा उषा यदा प्राक्क्षितिजे उदिता भवति तदा सा प्राचीनापि नित्यमनोहरसौन्दर्यान्विता सती 'पुराणी' (ऋ. 3. 61.1) शब्देनालंकृता भवति, स्वरूपेण सर्वं जगन्मोहयन्ती, धारयन्ती सा 'पुरन्धिः' (ऋ. 3.61.1) विशेषेण सुभूषिता, ऐश्वर्यशालिनी सती 'ऋतावरी' (ऋ. 3.61.6) विशेषेण मण्डिता, सर्वस्य चित्तमाकर्षयन्ती 'रोचना' (ऋ. 3.61.5), प्रकाशदानशीला, सौभाग्यदानशीला सती 'मघोनी' (ऋ. 4.51.3), सुभगा (ऋ. 3. 61.4), आकाशादुत्पन्नत्वात् 'दुहितः दिवः' (ऋ. 4.51.10), अखिलैः प्राणिभिः वरणीयत्वात् 'विश्ववारा', प्रकृष्टज्ञानसमन्वितत्वात् 'प्रचेताः', अपि च अश्वा (शीघ्रव्यापनस्वभावा), चित्र, अरुषी, अश्वावती, गोमती, वसुप्रदायिनी, सूनरी, गृहणी इत्यादिभिरनेकाभिः सुमनोहराभिरुपमाभिः सम्मानिता भवति वेदेषु। नैतावदेव सा सुन्दरी उषा युवतिः सूर्यस्य भार्यारूपेण वर्णिता विद्यते वैदिकसाहित्ये - कन्येव तन्वा शाशदाना एति देवि देवमियक्षमाणम्।

**संस्मयमाना युवतिः पुरस्ताद् आविर्वक्षांसि कृणुते विभाती।।**[2]

सा सुन्दरी कन्या उषा सूर्यं पतिं प्रापणाय आतुरा प्रेमिका संस्मयमाना वक्षस्थलमाविष्कृण्वती विभाती देवं सूर्यं पुरः एति। एषा उषा न केवलं पत्नीरूपेण वेदेषु चित्रिता अपितु - 'उत सखास्यश्विनोरुत माता गवामसि' (ऋ. 4.52.3) असावुषा अश्विनोः = दिवसरात्रयोः मित्रतुल्यं सखा, तथा गवाम् = किरणानां जनयित्री माता इति पदवीमपि लभते। यथा गृहेषु नार्याः जागृते सति सर्वे निद्रापगताः दैनन्दिकृत्ये संलग्नाः भवन्ति तथैव तस्याः धरित्र्यामागमनं कर्मणः प्रेरकत्वं विद्यते -

**सो चिन्नु भद्रा क्षुमती यशस्वत्युषा उवास मनवेस्वर्वती।**[3]

यथा अभिनयमंचे कस्याश्चिद् सौन्दर्यवत्याः आयाते सति सर्वे दर्शकाः दत्तचित्ताः, दत्तदृष्टियुताः सावधानमनसा तत्रैव दर्शनकर्मणि निमग्नाः भवन्ति तथैव एतस्याः सुरूपवत्याः उषादेव्याः आगमनानन्तरं सर्वे प्राणिनः जाग्रति तस्याः लालिमां सौन्दर्यं च निहारयन्तः स्व-स्वकर्मणि प्रवृत्ताः भवन्ति -

**उषा उच्छन्ती समिधाने अग्ना उद्यन्त्सूर्य उर्विया ज्योतिरश्रेत्।**[4]
**देवो नो अत्र सविता न्वर्थं प्रसावीद् द्विपत्प्र चतुष्पदित्यै।।**

अर्थात् यदा उषायाः आगमनं भवति तदा अग्नौ समिधः प्रज्वाल्यन्ते, सर्वे च द्विपात्-चतुष्पात्-प्राणिनः, अर्थम् इत्यै= स्व-स्वप्रयोजनसिद्ध्यर्थं कर्तव्यान्विताः भवन्ति।

भारतीयसंस्कृतौ देवानामाह्वानेन, आराधनेन, ध्यानेन वा ऋषयः मानवाश्च तान् देवान् प्रत्यक्षमनुभवन्ति स्म, तदनु आध्यात्मिक-भौतिकोभयदृष्ट्या उषस्-देवताया अपि सुन्दरनारिकल्पनया तस्याः प्रत्यक्षत्वं प्राकट्यं कुर्वन्ति कारयन्ति च। देवतानां मानवानां चैषः उपकार्योपकारभावसम्बन्धः उषस्सूक्तेषु सृष्टेः कल्याणाय एव परिकल्पितः विद्यते। ऋग्वेदे उषस्-देव्याः अतिशयेन सौन्दर्यवर्णनेन तस्याः माहात्म्येन च इति तु स्पष्टं भवति यत् देवीषु उषसः स्थानमग्रगण्यं सर्वाधिकं कल्याणदं महत्त्वपूर्णं च वर्तते। अत एव उषस्-विषयान्विताः सौन्दर्याभिव्यंजकाः ऋचस्तत्र संख्याधिक्येन विद्यन्ते। नानागुणयुतेयमुषा ऋक्षु 'उषसः' इति बहुवचनान्तप्रयोगेण आद्रियते -

**क्व स्विदासां कतमा पुराणी मया विधाना विदधुर्ऋभूणाम्।**[5]

**शुभं यच्छुभ्रा उषसश्चरन्ति न विज्ञायन्ते सदृशीरजुर्याः।।**

एताः शुभ्राः उषसः सर्वदा शुभमेवाचरन्ति तासु न ज्ञायते कतमा पुराणी इति, ताः सर्वाः ऋभवः=प्रकाशवत्यः रश्मयः सन्ति। सा सद्यःस्नाताऽलंकृता रमणी इवोषा पुनःपुनः प्रतिदिनं जायमाना नित्या युवतिरस्ति। साऽजराऽमरा सती सर्वेषां प्रणिनां कृते प्राणरूपा, प्राणदायिनी विद्यते, अतस्तामेवालोकयितुं सर्वं जगत् लालायितं भवति, आगतायां तस्यां नतमस्तकं भवति, प्रणमति तां चेति तात्पर्यम् -

**विश्वस्य हि प्राणनं जीवनं त्वं वि यदुच्छसि सूनरि।।**[6]

उषादेवी अपि तेभ्यः दर्शनसमुत्सुकेभ्यः आत्ममोहिनीं छविं अनावृतं करोति -

**अधिपेशांसि वपते नृतूरिवापोर्णुते वक्ष उस्रेव वर्जटम्।।**[7]

द्युलोकपुत्री उषा रूपगर्विता, लावण्यमयी नारी, शोभनस्वभावा प्रिया इव विद्यते या सरोवरात् सद्यः स्नात्वा बहिरागतास्तीति अस्यामृचि उच्यते -

**एषा शुभ्रा न तन्वो विदानोर्ध्वेव स्नाती दृशये नो अस्थात्।**

**अपद्वेषा बाधमाना तमांस्युषा, दिवो दुहिता ज्योतिषागात्।। (ऋ.)**

वैदिकमनीषिणां विचारेण वेदेषु आध्यात्मिक-आधिदैविक-आधिभौतिक-दृष्टिरपेक्षितास्ति। देवेषूक्तरूपत्र्यं सम्भाव्यम्। तत्र उषसूदेव्याः भौतिकं स्वरूपं,

सौन्दर्यं प्रत्यक्षतः ज्ञायमानमस्ति। तस्याः उषायाः प्रादुर्भूते एव यज्ञाग्निः प्रज्वाल्यते, सर्वे जागृताः भवन्ति, सर्वे प्राणिनः स्व-स्वकर्मणि निरताः भवन्ति, सकला सृष्टिः विकसिता देदीप्यमाना दृश्यते। एतदेव उषसः भौतिकं रूपम्। अपि च 'देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवतीति वा' इति यास्कप्रमाणानुसारेण एषा उषा सौभाग्य-प्रकाश-स्वास्थ्यादिप्रदानात्, स्वयं दीप्तिमत्वात्, विश्वं च विश्वं स्वदेदीप्यमानदीप्त्या प्रकाशयतीत्यस्मात्, द्यौरेव च तस्याः निवासस्थानमतः इयं देवी, दिव्यस्वरूपा देवतासु अग्रगण्या विद्यते, एतत्तस्याः आधिदैविकं रूपम्, सौन्दर्यम्। एतस्याश्च आध्यात्मिकं सौन्दर्यं वैदिक-ऋषयः, मनीषयः आर्षचक्षुषा ददृशुः, पश्यन्ति च, तस्यानन्दानुभूतिं चक्रुः, कुर्वन्ति च। सौभाग्यप्रदा एषा ज्योतिषां ज्यातिरुषा देवी असतः सतं प्रति नयति, कर्म प्रति प्रेरयति, अमृतं पाययति।

एवं च वयं वक्तुं शक्नुमः यत् ऋग्वेदे वर्णितम् उषस्-सूक्तं काव्यसौन्दर्य-स्याद्भुतमुदा। हरणमस्ति। तस्य सौन्दर्यविषयकशब्दावली च चित्ताकर्षिका विद्यते। जगति नारी एव सौन्दर्यस्य प्रतीकरूपा भवति। कोमलत्वं सौन्दर्यस्य वैशिष्ट्यम्, तत्र नारी स्वनाम्नैव कोमला मंजुला विद्यते। तस्याः मधुरा ध्वनिः सौन्दर्यबोधस्य उपकरणं भवति। तस्याः शरीरे समस्तललितकलानां विन्यासो भवति। रूप-रंग-समता-सापेक्षता-माधुर्य-लावण्यादिदृष्ट्या नार्यः सौन्दर्यमप्रतिमं भवति, अत एव वैदिक-ऋषयः उषसे नारीरूपं प्रदाय तस्याः सौन्दर्यवर्णनं कृत्वा काव्यसौन्दर्यानुभूतेः प्रथमं निदर्शनं कारयन्ति।।

**सन्दर्भग्रन्थाः -**


1. *ऋग्वेदे, 3/6/4*
2. *तत्रैव, 1/123/10*
3. *तत्रैव, 10/11/3*
4. *तत्रैव, 1/124/1*
5. *तत्रैव, 4/51/6*
6. *तत्रैव, 1/48/10*
7. *तत्रैव, 1/62/4*

# 8

# वैदिकपरम्परायां चिकित्साविज्ञानस्य महत्त्वम्

*डॉ. पूनम सिंह*

प्रस्तुतेऽस्मिन् लेखे वैदिकचिकित्सायाः स्वरूपस्य, प्रभावस्य, च महत्त्वमुक्तमस्ति। यस्मिन् भैषज्ययज्ञः, ज्वरचिकित्सा, क्षयरोगचिकित्सा, उन्मादचिकित्सा, गर्भदोष- चिकित्सा, सूर्यचिकित्सेति मुख्यरूपेणोपवर्णितं अस्ति। कथं मन्त्रेण रोगाः विनष्यन्ति? यज्ञैः रोगोपशमनं कथं भवतीत्यादि विशयालोचिताः विद्यन्ते।

अस्माकं मुनिभिः महर्षिभिश्च आरोग्यलाभाय विविधरोगनिवारणाय च विविधा उपाया निर्दिष्टाः सन्ति। अथर्ववेदस्योपवेदभूते आयुर्वेदशास्त्रे आरोग्यप्राप्त्युपाया रोगनिवृत्तयुपायाश्च सर्वतो भावेन वर्णिताः सन्ति। आयुर्वेदे वर्णिता विभिन्नचिकित्साविधाः स्वस्वविशेषताभिः परिपूर्णाः सन्ति। पूर्वजन्मकृतैः पापैः व्याधयो भवन्ति तथा च रोगजनितचिह्नानि प्रकटीभवन्ति। किन्तु जपादिदैव्यपाश्रयचिकित्सया तेषामुपशमोऽपि कर्तुं शक्यते। यथोक्तम् -

**पूर्वजन्मकृतं पापं नरकस्य परिक्षये।**
**बाधते व्याधिरूपेण तस्य जप्यादिभिः शमः**[1] ।।

चरकसंहितायाः सूत्रस्थाने वैदिकचिकित्साया अधो निर्दिश्टानि साधनानि प्रतिपादितानि सन्ति[2] ।

यथा- 1. मन्त्रः 2. औषधधारणम् 3. मणिधारणम् 4. मंगलपांगः 5. बलिः 6. उपहारः 7. होमः 8. नियमः 9. प्रायश्चित्तम् 10. उपवासः 11. दानम् 12. स्वस्त्ययनपांगः 13. प्रणिपातः 14. तीर्थागमनं चेति। अनेनैव प्रकारेण आचार्यो वाग्भट्टोऽपि व्रत-यम-त्याग- सेवामैत्रीभावगुरूपूजादीन्यपि वैदिकचिकित्सान्तर्गते स्वीकरोति[3] ।

मन्त्रैको ओजस्करो ध्वनिः विद्यते, यस्योच्चारणेनोजस उत्पत्तिः सम्पद्यते। मन्त्राणाम् उच्चारणेन मनुष्याणां विविधा रोगा प्रशान्ता भवन्ति। मन्त्रः साक्षात् विविधरोगहारका भवन्ति। प्रतिदिनं मन्त्रणामुच्चारणेन मनष्येषु रोगा एव नायान्ति। अत आयुर्वेदचिकित्साग्रन्थेषु मन्त्राणां प्रयोगो नैकेषु स्थलेषु प्रस्तुतो दृश्यते। यथा उन्मादचिकित्साप्रकरणे आचार्येण विविधानां मन्त्राणां माध्यमेन रोगाणां चिकित्साया वर्णनं कृतमस्ति। सम्यगवबोधनार्थं ग्रन्थस्य अवलोकलन परिशीलनं च उपेक्षते।

वर्तमानकाले रोगनिवारणार्थम् विविधानि चिकित्साविज्ञानानि समुपलभ्यन्ते। आयुर्वैदिक-होम्योपैथिक-एलोपैथिक- प्राकृतादीनि चिकित्साविज्ञानानि प्रसिद्धानि सन्ति, किन्तु तेषु यज्ञचिकित्साविज्ञानं महत्त्वपूर्णं सुलभं श्रेठं च कथमित्यस्माभिः ज्ञेयम्।

यज्ञचिकित्साविज्ञानेनोत्तमस्वास्थ्यस्य प्राप्तिसंम्भवाऽस्ति। पुराकाले अस्माकम् ऋषिमहर्षयः तेन साफल्याच्चिकित्सापि कुर्वन्ति स्म। कारणमिदं यत् तदानीं समये रोगनिवारणे बृहद्यज्ञाः बभूवुः। जनता च तैः आरोग्यलाभाः कुर्वन्ति स्म। एते भैषज्ययज्ञाः कथ्यन्ते ऋषिभिः। ये ऋतुसन्धिशुप्रयुज्यन्ते यतः ऋतुसन्धिषु वै व्याधिर्जायते -

भैषज्ययज्ञाः वा एते यच्चातुर्मासनि। तस्मात् ऋतुसन्धिषु प्रयुज्यन्ते। ऋतुसन्धिषु वै व्याधिर्जायते ।।

भैषजगुणानां ज्ञाता ब्रह्मा भवति। इत्थं भैषजकृतोऽयं यज्ञः, यज्ञेऽस्मिन् ''प्राणाय स्वाहा, अपानाय स्वाहा, व्यानाय स्वाहा'' इत्यादयः मन्त्राः उच्चार्यन्ते। एतेषां मन्त्राणामुच्चारणं कृत्वा आहुतयः प्रदीयन्ते याज्ञिकैः। अनेन सिद्धं भवति यत् औषधिविशेषज्ञः ब्रह्मा ऋतुसन्धिषु समुत्पन्नानां रोगाणां निवारणार्थं तत्तदगुणविशिष्टानां औषधीनां चयनं करोति। गुरुच-सोमलता-गुगुल-शतावर-जटामासी- शिखामयूर- इन्द्रजौ-पद्मादयः ओषधयः अग्निना सूक्ष्मीभूय सहस्त्रगुणशक्तिं प्राप्य जलवायुं शुद्धं कुर्वन्ति, अयं च ओषधीयप्रभावः वातावरणं प्रदूषणात् निवृत्य जनानां स्वास्थ्यलाभे साहाय्यं करोति। एतेषु भैषज्ययज्ञेषु कास-क्षय-दन्त-नेत्र-शिरपीड़ा-चेचकादीनां रोगाणां सामूहिकरीत्या निवारणानि भवन्ति।

**यज्ञेन व्याधिवारणम्**

यज्ञेन रोगनिवारणस्योल्लेखः चरकसंहिता बृहन्निघण्ट्वादिषु आयुर्वेदीयेषु महत्त्वपूर्णेषु ग्रन्थेषु अस्ति। होमयज्ञेन ज्ञाताज्ञातानां दुःसाध्यानां सर्वेषां रोगाणां निवारणं भवितुमर्हति। केचित् रोगाः एतादृशः भवन्ति येषां निदानं संभवन्नास्ति अथवा येभ्यः उपचारेभ्यः उपयुक्ताः ओषधयः उपलब्धाः न सन्ति, एतेषां सर्वेषां रोगाणां चिकित्सार्थं वेदे यज्ञस्य विधानं विद्यते। यत्र वेदेन सामान्यरूपेण चिकित्सायाः उपदेशो दतः, तत्र विशेषैः होमद्रव्यैः रोगविशिष्टानां चिकित्सानामपि संकेताः कृताः। यथा येन गुग्गुलस्योत्तमोगन्धः प्राप्तो भवति तस्य राजयक्ष्मादि संक्रामकरोगाः न भवन्ति। द्रष्टव्यम् -

**न तं यक्ष्मा अरून्धते नैनं शपथो अश्नुते।**
**य भेषजस्य गुल्गुलोः सुरभिर्गन्धो अश्नुते।।**

**यज्ञेन व्याधिवारणस्य प्रक्रिया**

**1. प्रक्रिया -** मन्त्रपाठपूर्वकं यदा यज्ञारम्भो भवति तथ एकैकेन मन्त्रेण सह स्वाहापूर्वकं अग्नौ हवि प्रदीयते। याज्ञिकैः। मन्त्रस्य एकैकः शब्दः प्रभाव करोति रोगिणः हृदि। अल्पकालात् पश्चात् प्रत्येकेन स्वाहाकारेण सह अग्नेः हविर्धूमो जायते, श्वासवायुना सह रोगिणः अन्तस्तलं स्पृशन् रोगं दूरीकरोति।

**2. प्रक्रिया -** यज्ञाग्नौ यदा घृतानामन्नानां रोगनाशकानां चौषधीनाम् आहुतिः प्रदीयन्ते तदा तेषां रोगनिवारकः गन्धः वायुमण्डले विस्तारमाप्नोति। स वायुः नासिकाद्वारेण श्वासेन प्रविश्य वक्षः स्थले फुफुसयोः प्रविशति। फुफुसयोर्मध्ये लघवः वायुकोशाः विद्यमानाः सन्ति। तेषु स वायु व्याप्तो भवति रोगनिवारको गन्धयुक्तो वायुः फुफुसयोः प्रविश्य वायुकोशान्तर्गतमशुद्धं भागं शुद्धं करोति। इत्थं यज्ञस्य वायुमण्डले मुहुः दीर्घेण श्वासप्रश्वासेन वायुकोशः शुद्धाः भवन्ति। यज्ञस्य द्रव्यगन्धः तान् न केवलं शुद्धः अपितु पुष्टमपि करोति। पुनष्च तत्र रोगकीटानां नाशमपि सम्पादयति येन आरोग्यलाभो भवति।

**3. प्रक्रिया -** यदा रोगनिवारको गन्धयुक्तो वायुः श्वासेन फुफुसयोः पूर्यते। तदा वायोः रक्तेन सम्पर्को भवति। स वायुः विद्यमान-रोगनिवारक-परमाणून् रक्तधमनिषु प्रेषयति। तदुपरान्तं रक्ते ये रोगकृमयः भवन्ति, ते मृताः जायन्ते। रक्तस्य बहवः दोषाः वायौ आगच्छन्ति। यदा वायुः प्रश्वासमाध्यमेनबहिर्निस्सरति तदा तेन सह ते

दोषारपि शरीरात् बहिर्भवन्ति। इत्थं यज्ञस्य संस्कृतवायौ भूयोभूयः श्वासग्रहणात् रोगिणः शनैः शनैः स्वस्थाः भवन्ति। अस्याद्भुता रोगनिवारणस्य प्रक्रियायाः वर्णनं वेद इत्थं विद्यते-

**द्वाविमौ वातौ वात आ सिन्धोरा परावतः। दक्षं ते अन्य आ बातु परज्ञन्यो वातु यद् रपः।।**

**आ वात वाहि भेषजं वि वात वाहि यदृ रपः। त्वं हि विश्वभेषजा देवानां दूत ईयसे।।**

**व्याधेरुत्पादकाः कृमय :-**

रोगात्पादकानां कृमीणां वर्णनम् अथर्ववेदे 1.2.31, 32, 4. 34, 5, 23, 29 तमेषु मन्त्रेषु विद्यते। तत्र ते यातुधान् क्रव्याद्-पिशाच-रक्ष इत्यादिभिः नामभिः आह्वयन्ते। ये श्वासवायु-भोजन-जलादिभिः सह मानवशरीरेषु प्रविशन्ति तेषु शरीरेषु च रोगोत्पादनं कृत्वा प्राणिभिः यातनां ददति, यज्ञद्वारा अग्नौ कृमिविनाषकानाम् ओषधीनां आहुतिं दत्वा रोगकृमीणां विनाशं कृत्वा रोगेभ्यः प्राणिनः त्रायन्ते एभ्यः रोगेभ्यः प्राणिनां रक्षणं आवश्यकं, अत ते 'रक्ष' इति नाम्ना प्रसिद्धाः।

अथर्ववेदे। तमे मन्त्रे वर्णितमस्ति यत् अग्नौ प्रस्ताहुतिः यातुधानान् नदीफेनमिव अवहत् -

**इदं हविर्यातुधानानाम् नदीफेनमिवावहत्।**
**य इदं स्त्री पुमानकरिह स स्तुवतां जनः।।**

अग्रेषु मन्त्रेषु तोषां विकाशकथा मनोरंजिका प्राप्यतेऽस्माभिः। तत्र वर्णिता यत् आम्रे, सुपक्वे, शबले, विपक्वे, क्षीरे मन्थे, अकृष्टपच्ये, अशने, धान्ये, जले, शयने, दिवसे रात्रौ एभिः कृमिभिः हानिर्कृताः तैः सन्ततिभिः सह विनष्टाः संजाताः यज्ञाग्निभिः **द्रष्ट्व्या मन्त्राः-**

**आम्रे सुपक्वे शबले विपक्वे यो मा पिशाचो अशने ददम्भ।**
**तदात्मना प्रजया पिशाचा वियातयन्तामगदोऽयमस्तु।।6।।**
**क्षीरे मा मन्थे यतमो ददम्भः अकृष्टपच्ये अशने धान्ये यः।।**
**अषां मा पाने यतमो ददम्भः। क्रव्यायातूनां शयने शयानम्।।7।।**
**दिवामा नक्तं यतमो ददम्भः क्रव्याद्यातूनां शयने शयानम्।**
**तदात्मना प्रजया पिशाचा विपातयन्ता मगदोऽयमस्तु।।9।।**

**वेदेशु विभिन्नाः चिकित्साः-**

**1. ज्वरचिकित्सा -**

यज्ञाग्निना ज्वर-कास-शिरःपीडादयोरपि दूरीभवितुमर्हन्ति अथर्ववेदीयैः सूक्तै ज्ञातमस्ति यत् हे ज्वर! अंगांगे तापेन सह व्याप्तं सन् तव प्रतिकारं वयं हविषा कुर्मः। अथर्ववेदे तत्सम्बन्धिनोऽनेकोः। मन्त्रज्ञाः दृश्यन्ते यथा-

**अंगे अंगे शोचिषा शिश्रियाणं नमस्यन्तस्त्वा हविषा विधेम।**
**अंकान्त्समंकान् हविषा विधेम यो अग्रभीत पर्वस्याग्रभीता।।**
**मुंच शीर्षक्त्या उत कास एनं पुरूषपरूराविदेशा यो अस्य।**
**यो अभ्रजा वातजा यश्च युष्मोवनस्पतीन्त्सचतां पर्वतांच ।।**
**अग्निस्तक्मानमपबाधमितः सोमो ग्रावा वरूणः पूतदक्षाः।**
**वेदवीर्हि समिधः शोशुचानपा अपद्वेषांस्युभया भवन्तु।।**
**अयं यो विश्वान् हरितान् कृपोषि उच्छोचयनन्नगिरिवाभिदुन्वन्।**
**अधा हि तक्मन्नरसो हि भूया अधान्यंगधरांगवा परेहि ।।**

उपर्युक्तेषु मन्त्रेषु ओषधिविशेषज्ञैऋषिभिः महत्त्वपूर्णं तथ्यमुद्घाटितम् अस्ति यत्- हे आहवनीयाग्ने! इतः ज्वर दूरी कुरू (पलायतु)। सोम-ग्रावा-यज्ञवेदिकुश समिधः इत्यादयः एभ्यः स्थानेभ्यः रुग्णशरीरेभ्यः वा ज्वारजन्योपद्रवान् दूरी कुरू। तिर्यग्रोमकूपेभ्यः स्वेदादिभिः मलमूत्रादिभिर्वा शरीरात् अघस्तात् बहिर्गच्छ। आयुर्वेदीय ग्रन्थेऽपि विषमज्वरनाशाय वर्णनं आप्यते। यत्-

**निम्बपत्रं वचाकुष्ठ पथ्या सिद्धार्थकं घृतम्।**
**विषमज्वरनाशाय गुग्गुलश्चेति धूपनम्।।**

**(बृहन्निघण्टुरत्नाकरः)**

डॉ. टाटलिरमहोदयेन भणितं यत् द्राक्षादीनिशुष्कानि फलानि भस्मयित्वा तैर्धूपनैः टाईफाईडज्वरस्य कीटाः होरार्धे अन्येषां रोगाणाम् च कीटाः होराद्वये मृताः जायन्ते।

विशेष सामग्रीरूपे अजवायनेन ज्वरं दूरी भवति। (मुनक्का) शुष्कफलेन ज्वरस्य सहकारिकाः नजला-शिरःपीडादयः नष्टाः भवन्ति।

**2. क्षयरोगचिकित्सा -**

क्षयरोगः तपेदिकं राजयक्ष्मा वाऽपि कथ्यते। यज्ञमाध्यमेन राजयक्ष्मायाः चिकित्सा सुष्ठुप्रकारेण संभवाऽस्ति। राजयक्ष्मायाः कीटाः अतिसूक्ष्माः भवन्ति,

मध्यम प्र.तेः कीटारपि एकस्यां षंकत्यां तिष्ठन्ति, तेषां निवारणार्थं यज्ञमेव श्रेष्ठा चिकित्सा भवितुमर्हति। राजयक्ष्मा पक्षीणः उडयन् वितरति। तदेकेन द्वितीये प्रविशति। नूतने-पुरातने रोग कृतेऽपि राजयक्ष्माया औषधिः यज्ञियहविः। अथर्ववेदे इत्थं वर्णनं विद्यते-

**पक्षी जायान्यः पतति स आविशति पुरुषम्।**
**तदक्षितस्य भेषजमुभयोः सुक्षितस्य च।।**

क्षयरोगचिकित्सासन्दर्भे अथर्ववेदऋग्वेदयोः केचित् मन्त्रा, विशेषाः द्रष्टुमर्हाः विद्यन्ते। यज्ञचिकित्सकः वैद्यः कथयति यत् हे रोगिन्! यज्ञीयहविषा सुखेन जेतुमहं तुभ्यमज्ञातरोगात् तपेदिकरोगात् वा मुंचामि, येन त्वं चिरकालपर्य्यन्तं जयेत् (जीवनं धारयेत्) मन्त्रो विद्यते -

**मुंचामि त्वा हविषा जीवनायकमज्ञातयक्ष्मादुत राजयक्ष्मात्।**
**ग्राहिर्जग्राह यद्येतदेन तस्या इन्द्राग्नी प्रमुमुक्तमेनम्।।**

निराशासाध्यरोगस्य स्थितावपि यज्ञेन लाभं मिलत्येव अतएव ओजपूर्वकं वैद्यः पुनर्कथयति- यदि अस्य आयुक्षीणोऽभवत्, यदि निराशमभवत्, यदि अयं मृत्युसमीपे आगच्छत् तर्हि हविचिकित्सया अहमिम् मृत्युमुखात् मुंचामि। एनं मया शतशारदाय जीवनाय बलं प्रदत्तम् मन्त्रोऽस्ति-

**यदि क्षितायुर्यदि वा परेतो यदि मृत्योरन्तिकं नीत एव।**
**तमाहरामि निर्ऋतेरूपस्थादूस्पार्षमेनं शतशारदाय।।**
**सहस्त्राक्षेण शतशारदेन शतयुषा हविषाऽऽहार्यमेनम्**
**शतं यक्षेमं शरदो नयाति इन्द्रो विश्वस्त दुरितस्य पारम्।।**

एभ्यः मन्त्रेभ्यः स्पष्टमस्ति यत् राजयक्ष्मा प्रथमावस्थायाम् अन्तिमावस्थायां वा स्यात् तदपि यज्ञचिकित्सया रोगी स्वस्थोभूत्वा शतवर्षपर्यन्तं जीवितुमर्हति।

**3. उन्माद-चिकित्सा-**

अथर्ववेदे यज्ञाग्निना उन्मादचिकित्सा वर्णिता विद्यते। तत्र वर्णितम् अस्ति यत् हे यज्ञाग्ने! अयं यो उन्मत्तपुरुषः रज्जुबद्धः सन् सुनियन्त्रितमसम्बद्धप्रलापं करोति, इमं पुरूषम् उन्मादरोगात् विमुक्तं कुरू। स्वस्थोपरान्तं अयं पुरूषः तस्मै हविर्भागं प्रदास्यति, यस्मात् भविष्येकालेऽपि उन्मादरहितं भवतु। मन्त्राः द्रष्टव्याः -

**इमं मे अग्ने पुरूषं मुमुग्ध्ययं यो बद्धः सुयतो लालपीति।**
**अतोऽधि ते कृणवद् भागधेयं यथा नुन्मदितोऽसति।।**
**अग्निष्टे निशयन्तु यदि ते मन उद्युतम्।**
**कृणोमि विद्वान् भेषजं यथानुन्मदितोऽससि ।।**

अमेरिकादेशस्थः मनोवैज्ञानिकः श्रीबेरीराथनेरमहाभागः यो सम्प्रति पूनाविश्वविद्यालये ''अग्निहोत्रस्य मानसिकप्रभावः'' विषये शोधकार्यं करोति। तेन भणितं यत् अग्निहोत्रकर्मणा गृहचिकित्सया बालकानां मृगीरोगाः नष्टाः संजाताः मानसिक रूपाणांचाविकसितानां बालकानां बुद्धिरपि विकसिता भवति

**4. गर्भदोष- चिकित्सा-**

ऋग्वेदे 10.162 तमे सूक्ते यज्ञाग्निना गर्भदोष-चिकित्सा वर्णिताऽस्ति। प्रकरणमिदं समागतमथर्ववेदेऽपि तत्र कथितं यत् हे नारि! योऽष्लीलनामरोगः रोग कृमिर्वा तव गर्भे योनौ वा प्रविष्टः संजातः। तं वेदमन्त्रयुक्तः कृमिविनाशकः यज्ञाग्निः इतः दूरी कुर्यात्।

हे नारि! यो रोगः तव गर्भाशये गच्छन् वीर्योत्पादकां शक्तिं नाशयति, यो स्थितं गर्भ गर्भाशयात् बहिरागच्छन्तं चंचलं गर्भं वा विनाशयति। तवोत्पत्तेः शिशोः जिघांसति तमितो यज्ञाग्निना नाशयति-

**ब्रह्मणाग्नि संविदानी रक्षोहा बाधतामितः।**
**अमीवा यस्ते गर्भ दुर्णामा योनिमाशयो।।**
**यस्ते गर्भममीवा दुर्णावा योनिमाशये।**
**अग्निष्टं ब्रह्मणा सह निष्क्रव्यादमनीनशत्।।**
**यस्ते हन्ति पतयन्तं निषत्स्नु यः सरीसृपम्।**
**जतं पस्ते जिघांसति तमितो नाशयामसि ।।**

एभिर्मन्त्रैः द्योतितमिदं यत् यज्ञाग्नेः हविषा गर्भदोषाः विनष्टाः जायन्ते। वैदिकचिकित्सायां सूर्यस्य निम्नगुणानां प्रभावः-

(क) अंधकारस्यनाशः (ख) दुखानां रोगाणां च नाशः (ग) नेत्रज्योतिर्वृद्धिः (घ) आयुषः वृद्धिः

निम्नलेखे भुवनभास्करस्य एतेषां गुणानां सम्बन्धे वेदमंत्रैः विचारः क्रियते -

**(क) अन्धकारस्यनाषः**

अभितपा सौयऋषेः प्रार्थनास्ति- 'येन सूर्यज्योतिषा बाधते तमो जगच्च विश्वमुदियर्षि भानुना। तेनास्मद विश्वामनिरामनाहुतिमपा भीवामय दुष्षवप्न्यं सुवा।।

अर्थात् हे सूर्य! भवान् येन ज्योतिष। अन्धकारं नाशयति तथा प्रकाशेन समस्त संसारे स्फूर्तिं जनयति, तेनैव अस्माकं समग्रं अननाभावं, यज्ञाभावं तथा कुस्वधाभावं दूरं करोतु।

**(ख) रोगाणां नाशः**

प्रस्तुतमंत्रेण विदित भवति यत् सूर्यस्य प्रकाशः पीलिया रोगे तथा हृदयरोगे विशेष लाभप्रदं आसीत्। प्रस्कण्व ऋषेः सूर्यदेवं प्रति प्रार्थनाऽस्ति यत्-

**उद्यन्नद्य मित्रमह आरोहन्नुत्तरां दिशम्।**
**हृदरोगं ममं सूर्य हरिमाणं च नाशय।।**

हे हितकारी तेजस्वी सूर्य! अद्य भवान् उदिते भवन् तथा उन्नताकाशे गमनकाले मम हृदयरोगं पाण्डुरोगं च विनाशयतु।

**(ग) नेत्रज्योतिर्वृद्धिः**

अथर्ववेदे-

**'सूर्यङ्गाक्षुषामधिपतिः समामवतु'**

**एवमेव पुनः -** चित्रं देवानामुदगादनी कं चक्षुर्मित्रस्य वरुणस्याग्नेः।

**पुनश्च अथर्ववेदे -** 'सूर्योमे चक्षुर्वातः प्राणोऽन्तरिक्षमात्मा पृथिवी शरीरम्।

वैदिकऋषीणां प्रगदानुभूतिरासीत् यत् अस्मिन् विशाले विश्वे सूर्यस्य तदेव स्थानमस्ति, यच्च शरीरे आत्मनः। सूर्यः सर्वजडचेतनपदार्थानामात्मा उक्तः। **'सूर्य आत्मा जगतस्तस्थुश्च।**

**(घ) आयुर्वर्धकत्वेन यजुर्वेदे यथा-**

**तच्चक्षुर्देवहितंपरस्ताच्छुक्रमुच्चरत्।**
**पश्येम शरदः शतं जीवेम शरदः शतम्।**

ऋग्वेदे यथा- विभ्राजीविश्वतिषा स्वरगच्छो रोचनं दिवः। येनेमा विश्वा भुवनान्यामृता विश्वकर्मणा विश्वदेव्यता। एवमत्र वेदेभ्यः विषयानादाय सूर्यचिकित्सा वर्णनं मया कृतम्।

**निष्कर्षः-**

निस्सदेहं वैदिकपरम्परायां यज्ञचिकित्सया सर्वेषाम् रोगाणां योग्यतमा चिकित्सा सम्भवतीत्यस्मिन् विषये नास्त्यत्र कश्चिदविसंवादः। वर्तमानेऽस्मिन् वैज्ञानिकयुगेऽपि यदि वयं विवेकपूर्णया वैज्ञानिकदृशा संसारस्याध्ययनं सूक्ष्मरीत्या सम्पादयेम, तदा तथ्यस्यास्य पूर्णतया ज्ञानं भवति यद् वैदिकचिकित्सया एव सर्वेऽपि प्राणिनः निरामयाः भवितुमर्हन्ति।

**सन्दर्भग्रन्थाः -**


1. *अथर्ववेदे, 1/8/11*
2. *चरकसंहिता*
3. *सुश्रुतसंहिता*
4. *ऋग्वेद*
5. *यजुर्वेदे*

# 9

# समकालिककवितासु चाय-प्रशंसा

*डॉ. तारेशकुमारः शर्मा*

संस्कृत-काव्यस्य क्षेत्रे अधुनापि विद्वद्भिः बहुविधमौलिककृतीनां रचनाः क्रियन्ते यासु सुप्रतिष्ठितविचाराः सिद्धान्ताश्च पूर्वाचार्यैः कमपि दृष्ट्या न्यूनं कृत्वा न आकलयितुं शक्यन्ते। संस्कृत-भाषायाः रचनातत्त्वज्ञैः नवकविभिः द्वारा प्राचीनमानदण्डेषु अवघटितानां कृतीनां अद्यापि अविरलरूपेण प्रकाशनं जायते। यत्र काव्ये चित्रितानि प्राचीनमूल्यानि अविश्रान्तरूपेण तत्रैव आधुनिकसंस्कृतकवितायां प्रतिबिम्बितमस्ति अद्यत्य समाजस्य यथार्थरूपम्।

साम्प्रतिक-संस्कृतकाव्ये दृष्टिपातं कुर्वन्ति तु अस्माभिः सामाजिक - राजनैतिक-सांस्कृतिक-धार्मिकलेखनानि प्रभूतेन द्रष्टानि। सामाजिकविषयेषु यत्र शिक्षा-कलिप्रभाव-मानवेतरजीव-जीवेतरपदार्थ-चलचित्रादिगततत्त्वानां विषयाः विद्यमानाः ते सन्ति वर्तमानकालिककवितानां केन्द्रबिन्दवः। यत्र हास्य-व्यंग्यपरकरचनानां काव्यरचनाकर्तृभिः सृजनं कृतं तत्रैव तासु कवितासु जीवेतरपदार्थेषु ''चायम्'' इति तत्त्वाधारितकवितानां परिचयः दीयते। अद्यतनसमाजे 'चायम्'' इदं पेयपदार्थं वर्तते, येन विना कोऽपि जनः कर्तुं न शक्यते कार्यस्यारम्भः।

मानवस्य दैनिक-दिनचर्या चायेनैव प्रारम्भयति समापनमपि च चायेनैव भवति। गृहेऽऽगतोऽतिथेः सम्मानः ढाबे-होटले इति भवितापरिचर्चा, कविसंगोष्ठी, अन्या कोऽपि वार्ता वा चायस्यास्वादनेन विना न सम्पूरिता। अस्य पेयपदार्थस्य प्रतिपादनं कुर्वन्ती डॉ. श्रीमती सुधा सहायः ''चाय-काव्यम्'' इत्यलिखत्। काश्चित् पंक्त्यः दर्शनीयाः-

**चायः कर्म च धर्मश्च चायश्च परमं सुखम्।**
**नास्ति यस्य गृहे चायः, जीवनं तस्य निष्फलम्।।**

सोमपानान्मधुपानात् जलकैम्पापानयोरपि अस्मिन् जगति हे लोकाः?चायपानं विशिष्यते।।

कविर्भवेत् नर्तको वा संगीतज्ञस्तथापि च। परिश्रान्तः क्षुधार्तो वा चायमाश्रयते सदा।।

धियो जाड्य प्रहरति देहं स्फूर्त्यास्तु सिञ्चति। चित्तं प्रसादयेन्नित्यं चायः किन्न करोति वै।।

यथानारीमण्डनैश्च पुरुषः सुगुणैर्यथा। तथाल्पाहारफलकं चायेनैव सुशोभते।।

प्रातश्चायस्तथा सायं मध्यान्हेऽपि च वाञ्छितः। रात्रौ च भोजनान्तेऽपि चायपानं प्रशस्यते।।

यथा ह्यकेने चक्रेण रथस्य न गतिर्भवेत्। तथाहि चायपानेन विना कार्यं न सिद्धयति।।

यथा पुराणाः कवयः चिन्तयित्वा लिखन् पुरा। तथा अद्यतनालोकाश्चायं पीत्वा लिखन्ति हि।।

'च' चमत्कारसंयुक्तः 'आ' तु आयाति द्योतकः। 'य' तु यन्त्रमिव स्फूर्तिदाता चायः प्रभाषितः।।[1]

'चायः' इति विषये व्यंग्यं कुर्वन् श्रीरामेश्वरशास्त्री-महोदयेन स्वकीयकवितायां लिखितम् -

**वृद्धा युवानः शिशवोऽबला वा त्वामेव पूर्वं नितरामुपासते।**
**नो त्वदृते ते चलितुं समर्थाः हे चायदेव्यद्य तव प्रभुत्वम्।।**
**गृहागताया॰तिथये न यावत् तवोपहारः प्रथमं प्रदेयः।**
**स आतिथेयं बहुधा विनिन्देत् रे चायदेव्यद्य तवाधिपत्यम्।।**
**कण्डूयते॰सौ पिबति जनो यः शूलार्दितः कोऽपि च पामपीड़ी।**
**वैद्योपकारिन्! बलशक्तिहारिन्। रे चाय कं शास्ति तव स्तुतिः का।।**[2]

श्रीकपिलदेवमहाभागेन चायदेव्याः महिमायाः वर्णनं मुक्तकण्ठेन कृतम् - सकलदुःखचिन्तोभयशोकामर्षाधिव्याधिप्रतिकूलवेदनीयव्यथामूलोन्मूलनकुशलायाः, शक्त्युत्साहधैर्यशौर्य-माधुर्यौदार्य-गाम्भीर्यचातुर्य प्रदायिन्याः, प्रसन्नतोल्लासजनयियाश्चायदेव्याः परमपुनीता, सर्वत्रोपस्कृता, जेगीयमाना कीर्तिः कस्य श्रोत्रशष्कुल्यौ नास्पृशत्।

अस्माकं सत्पुरुषाः, ऋषयो मुनयश्च मुक्तकण्ठं चायदेवीं प्रशंशसुः। वेदशास्त्रेषु च तेषां कथनोद्धरणानि समुपलभ्यन्ते। अत्र वेदेभ्य आरम्भं कृत्वा अद्यतनीयघटनाचित्रपर्यन्तं साहित्येषु लिखितानां प्रबन्धानां प्रत्यक्षञ्चानु भूतानु श्रुतचायगुण गणना चित्रणां दिङमात्रमुदाह्रियते। तथा च ऋग्वेदस्य चतुर्थाध्याये -

**''न पिबति नरो, नित्यं चायं दिव्यसुधारसम्।**
**जीवन् स गर्दभान्दो मृतः श्वा इव बुक्कति।।''**

यजुषि च-

**''खाद्येषु दुर्लभं क्षीरं लेह्येषु तु प्रपाणकम्।**
**सुफलेषु चाम्रं भोक्तं चाया पेयेषु दुर्लभा।।''**

अथर्वणि चापि-

**''यः नरः प्रातरुत्थाय चायां पिबति नित्यशः।**
**दिने दिने स वर्द्धते शुक्लपक्षे यथा शशी।।''**

सामसहितायां च-

**''चायदेव्या तु माहात्म्यं ज्ञातुं वा केन शक्यते।**
**पीत्वा सद्यः सुखं भुक्त्वा परत्र मोक्षमाप्नुयात्।।''**

एवं चतुर्षु वेदेषु विगलितवेद्यान्तराखण्डचिन्मयानिर्वचनीयस्य चायरसानन्दस्य महद् वर्णनं वर्तते।

मण्डूकोपनिषदि च -

**''मृषा वदति लोकोऽयं ताम्बूलं मुखभूषणम्।**
**मुखस्य भूषणं चायां, नारदो मुनिरब्रवीत्।।''**

याज्ञवल्क्ये धर्मशास्त्रे च-

**''पीत्वा पीत्वा पुनः पीत्वा पुनः पिबेदतन्द्रितः। पुनः पुनः प्रपानाच्च पुनर्जन्म न विद्यते।।**

धर्मशास्त्रेषु तत्रापि मनौ-

**''कृते पीयूषवर्षिणी, त्रेतायान्तु सञ्जीवनी। द्वापरे सोमरसश्चेति, कलौ चाया प्रकीर्तिता।।''**

बृहत्पाराशरीयोऽपि-

**''आहारा विविधा भुक्ताः पीता नानाविधा रसाः। चायप्रपानानन्दस्य नार्हन्ति षोड्शीं कलाम्।।''**

श्रीव्यासश्च पुराणेषु तत्रापि भागवते महापुराणे-

''श्रूयते पुरा कश्चिद् युधिष्ठिरो नाम भूपतिः। चायपानबलादेव ललङ्घेऽसौ हिमालयम्।।

श्री व्यासो महाभारतेऽपि-

''नाकपृष्ठं समारुह्य युधिष्ठिरो जुघोष वै। चायपानबलादेव सदेहोऽहं दिवं गतः।।''

अपि च-

सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः। चायामपचद् भीमः पपौ चार्थं धनुर्धरः।।''

इदानीञ्चापि नीतिनिपुणा नो राष्ट्रनेतारोऽपि चायदेव्यां श्रद्धां निष्ठां च दधते। किञ्च-

''ये चापि राष्ट्रनेतारो नेहर्वादयो विश्रुताः। चायपाने त्ववकाशं न कुर्वन्ति कदाचन।।

प्रदद्यु प्रीतिभोजेषु दातारो दशधाऽपि वा। न नकारस्तथाप्येषां लोकोपकारकारिणाम्।।''

एवञ्च सर्वत्र ईश्वरादपि विपुलं चायदेव्या आदरं वरीवर्तते जनजीवने। ईश्वराच्चाधिको महिमा वेदशास्त्रोपनिषद्-दर्शनपुराणेतिहासलोकसाहित्येषु। सकलमानसमनोरमायाश्चायदेव्याः पानमेव विश्वविश्वस्य सकलमानवेषु समतां तनोति।

उत्तरं दक्षिणेन, पूर्वश्च पश्चिमेन नान्येन केनापि कार्येण साम्यं वहति केवलमस्याः स्वीकरण एव साम्यम्। अतएवेयं देवी समतासूत्रं व्यपदिश्यते।

आस्यागुणौद्याः कतिपयशब्दैः वर्णयितुं कथं नु शक्येरन् न कदाचन।[3] श्रीरमेशचन्द्रवर्येण प्रातः काले खट्वाङ्गे आगतस्य चायस्य संवादं स्वकीयकवितायां क्रियते-

**प्रातः स्मरामि भवभूतिहरं दुरीशं**
**गन्धाधरं वृकविलासमरालकेशम्।**
**खट्वा स्थितं 'चुरुट-टी-कप' हस्तमीषद्**
**शृङ्गाररोगधर 'मफ्सर' मद्वितीयम्।।**

अथापि च-

**प्रातर्न्यूजप्रसङ्गेन मध्याह्ने 'टी' प्रसङ्गतः।**

**रात्रै ''फिल्म'' प्रसङ्गेन कालो गच्छति बाबूनाम्।।''**[4]

त्रिपाठी डॉ. रुद्रदेवेन स्वकीये ''विनोदनी''[5] इति सङ्कलनकाव्ये स्थितायां चाय- कथायां स्फुटरूपेण लेखनकार्यं कृतम्। त्रिपाठीमहोदस्य ''चाय-कथायां प्रथमोऽध्यायः'' चायस्य महत्त्वं प्रतिपादयति। तत्र केटमुखं कथयति-

**चायपानात्भवेत्किं वा किं वा बिस्कुटभक्षणात्।**

**किमर्थं भक्षयते सर्वं डबलरोटी च प्रेमतः।।**

**तत्सर्वं श्रोतुमिच्छामि कृपास्ति यदि ते मयि।**

**कार्यमस्ति महद्रम्यं स्वर्गे गर्त्ये च दुर्लभम्।।**[6]

अस्यां कवितायां चायस्यातिरिक्तं ताम्बूल-सिगरेट-कॉफीपान-इत्यादीनां आधुनिकफैशनव्यवस्थायाः उपरि तीक्ष्णव्यंग्य कृतम्।

''चाय'' इत्याधारीकृत्य विश्वनाथकेशवेन ''चाय-प्रशास्तिः'' कविता लिखिता। यस्याः एकमशं प्रस्तुतम्-

**सखे भोश्चायस्त्वं प्रियससदूदमी खलु नृणाम्।**

**विनात्वाभारब्धुं दिनमपि न शक्वं त्वगणितैः।।**

**मुखं प्रक्षातथारावपुसि तव पान प्रपठता**

**न वा वार्ताः पत्रादिति तु जनवरीतिः प्रचलिताः।।**[7]

चायमेवाधृत्य डॉ. जीतरामभट्टेनापि ''चायसम्मेलनम्'' इति हास्य-कवितायाः माध्यमेन चायस्य गुणगानं कृतम्। यथोक्तम्-

एकदा केनचिद् मूर्ध्ना चायविपणिना खलु। चायसम्मेलनं दिल्लीमायोजिन्तु राष्ट्रियम्।।

भारतस्य विभिन्नेभ्यः प्रान्तेभ्यस्तेन वै तदा। सम्मेलने समाहूता ज्ञानिनस्तत्त्वदर्शिनः।।

श्रोतुं चायस्म माहात्म्यं जनाः समाजसेविनः। सम्मिलिताश्च तत्रसन् विविधाश्चायसाधकाः।।

सज्जा मञ्चस्य तत्राऽऽसीद्धरितैश्चायपादपैः। कृष्णैश्च चायपत्रैस्तु तत्रासीच्चित्रकारिता।।

आयोजकेन चातिथ्ये चायस्य चषकेण तु। चायपत्रहारेण तदीयं स्वागतं कृतम्।।

मुख्यातिथिना तत्र दीपप्रज्ज्वालनं कृतम्। चायस्तुत्याऽभवत्तत्र मङ्गलाचरणं शुभम्।।

चायस्य महिमानन्तु सोद्धरणं सुभाषया। मुख्यातिथिस्तदोवाच समुद्घाटनभाषणे।।

भो भोश्चायोपभाक्तारश्चायस्य समुपासकाः। लोके लोकप्रियत्वेन चायममृतमुच्यते।।

ऋषिणाथर्ववेदोक्त्यां यच् 'चयित्वा प्रजाः प्रति सर्वा नन्दति' सूक्तेऽस्मिन् चायानन्दश्च वर्णितः।।

चायपूजायामितिभ्वादेर्धातोरण् प्रत्यये कृते। चायं शब्दस्तु निष्पन्नो नपुंसके तु संस्कृते।।

श्रीकृष्णेनापि गीतायामुपदिष्टोऽर्जुनो हि यत्। 'यदा संहरते चायं... तस्य प्रज्ञाप्रतिष्ठिता।।

'चाय की' 'यस्य चायान' इति पाणिनीसूत्रयोः। अष्टाध्याय्याञ्च विख्याता चायस्य वर्तते।।

उक्त्वा वार्तिकमेकं समाहारे चायमिष्यते।' इति कात्यायनेनापि श्रेयश्चायस्य वर्णितः।।

इत्थं वेदोक्तसूक्तानां वाक्यानां विदुषाञ्च वै। कृत्वाऽनुसरणं सर्वे चायं पिबन्तु सर्वदा।।

समाहारे सभायाञ्च सङ्घे सम्मेलनेऽस्त्यतः। चायमावश्यकं पेयं सर्वे पिबन्तु सर्वदा।।

इत्थं मुख्यातिथेर्वाचः श्रुत्वा सम्मेलने तदा। वृष्टिस्तु चायपत्राणामभवच्च जयध्वनिः।।

तदारभ्यैव लोकेऽस्मिन् ग्रामेषु नगरेषु च। सर्वत्र चायपानन्तु मुख्यपेयत्वमाप्तवान्।।[8]

तदतिरिक्तं चायमपि एव आलम्बनं कृत्वा कृष्णकुमार महोदयेन ''चायं व पीयते कै :''[9] इति रचनायां तीक्ष्णव्यंग्यं कृतम्-

''रक्तं पिपासका ये चायं न पीयते तैः।''

कौमुदीसंस्कृतपत्रिकायां प्रकाशिता प्रो. नारायणदासस्य चायम्'' इति रचना अतीवहास्यकारी अस्ति- अधुना 'चायम्'[10] प्रति कीदृशे प्रेमास्ति, कथं तं

प्रत्याकुलता, विना धूम्रपानेन सोऽप्यास्वादरहितः इत्यादि-विषया हास्योद्बोधानुकूलरीत्या रचनायां प्रकाशिताः।[11]

''उच्छृंखलम्'' पत्रे सम्पादकीयपृष्ठे 'प्रथमचषकः', 'प्रथमपानम्' इत्यादयः कविताः चायमालम्बनं कृत्वा यथासमय- प्रकाशिताः।[12]

''मधुरवाणी'' पत्रिकायां प्रकाशिता पं. क. वे. कृष्णमूर्तिमहोदयेन रचिता 'कॉफीपानविडम्बनम्' अतीवहास्यकारी रचना वर्तते।[13] ''ज्योतिष्मती'' पत्रिकायाः सर्वेषु-अङ्केषु विनोद-बिन्दवः प्रकाशिताः। येषु 'चायस्तोत्रम्' प्रमुखत्वेन गणनीयमस्ति।[14] ''मञ्जूषा'' संस्कृतपत्रिकायामपि प्रकाशिता पी. शर्मा-महोदयेन ''चाहोपानोपनिषद्'' इति हास्यकृतिः चायमाधारीकृत्य लिखिता।[15] पं. श्री राम दवे-महाभागस्य हास्यकृतिषु ''चायचषकम्'' अतीवप्रसिद्धा कविता विद्यते। 'चायचषकम्' इति कवितायां चायं प्रातः स्मरणीयदेव्याः उपाधि प्रदत्ता।[16] श्रीरङ्गवेङ्कटेश्वरस्य ''कॉफीशतकम्'' बीसवीशताब्द्याः एकं व्यङ्ग्यप्रधानं काव्यमस्ति। व्यंग्यस्य एकं रूपं इत्थम् -

**यानि कानि च पापानि जन्मान्तरकृतानि च।**
**तानि सर्वाणि नश्यन्ति कॉफीपानात्पदे पदे।।**[17]

चाय-पान-सिगरेट-कॉफी इत्यादिषु अवलम्बितासु कवितासु 'कॉफीलाभः' इति रचना प्रमुखत्वेन अर्हणीया या सूर्यनारायणेन भट्टेन रचिता।[18]

इत्थं वयं निष्कर्षतः कथयितुं शक्नुमः यत् चायेन विना कमपि सम्मेलन-गोष्ठी-कविता इत्यादयः सम्यक्रूपेण न भवितुं शक्नुवन्ति। प्रातः कालात् आरब्ध्वा दैनिन्दनी-क्रियाकलापपर्यन्तं चायेनैव सर्वाणि कार्याणि सम्पादितानि। अतः हास्यकवितासु लेखने एव न अपितु सार्थकरचनाधर्मितायामपि चायतत्त्वस्य प्रमुखता वर्तते।

**सन्दर्भग्रन्थाः -**


1. *'दिव्यज्योतिः', 31/9 (जून-1987), पृष्ठ 26*
2. *तत्रैव, 4/5 (फरवरी-1960), पृष्ठ 22*
3. *तत्रैव, 4/7 (अप्रैल-1960), पृष्ठ 22-24*
4. *तत्रैव, 5/12 (सितम्बर-1961), पृष्ठ 23*

5. डॉ. रुद्रदेवत्रिपाठीकृतः ग्रन्थः, मालव-मयूर, प्रकाशनकार्यालयः मन्दसौरतः (म.प्र.) प्रकाशितम्।
6. 'विनोदिनी'- मन्दसौर, पृष्ठ 24-25
7. 'साप्ताहिक-गाण्डीवम्', 5/11 (अप्रैल-1983)
8. 'संस्कृतमञ्जरी', 9/1, पृष्ठ 50-51
9. 'सर्वगन्धा', फरवरी-1985
10. 'कौमुदी', 2/1
11. सागरिका, 3/1-4, पृष्ठ 103
12. तत्रैव, पृष्ठ 88
13. तत्रैव, 2/3 (संवत्-2020), पृष्ठ 212
14. तत्रैव, 2/4, पृष्ठ 345
15. 'मञ्जूषा', 13/11
16. 'दृक्' 21, पृष्ठ 78
17. 'देववाणी-सुवास'- पञ्चमप्रसरः, पृष्ठ 143
18. लोकसंस्कृतम्, श्रावण 2096

# 10

# ब्राह्मणभागस्य वेदकत्वम्

*डॉ. दानपतिः तिवारी*

तत्र तावत् अस्मत्प्राचीनतमा महर्षयः कल्पसूत्रादिकारास्तीर्थकृतश्च मन्त्रब्राह्मणयोरुभयोरपि वेदत्वं निःसंशयमभिदधति। भगवता बौधायनेन **'मन्त्रब्राह्मणमित्याहुः'**[1] इति स्वकीये धर्मसूत्रे, **'आम्नायः पुनर्मन्त्राश्च ब्राह्मणानि'**[2] इति कौशिकेन, आपस्तम्बकात्यायनाभ्यां च **'मन्त्रब्राह्मणयोर्वेदनामधेयम्'**[3] इत्युभयोरपि भागयोर्वेदत्वमभ्युपगतम्। अतिगहने दुरधिगमानेकमार्गगभीरे अपरिमेयान्तःसारे वेदकान्तारे स्वच्छन्दं विहरता जैमिनिकेसरिणाऽप्ययमेवाशयः साधु सङ्घटितः स्वकीये मीमांसादर्शने। एतदुपोद्बलकानि कानि च न तदीयानि सूत्राण्युदाह्रियन्ते-अपौरुषेयत्वाधिकरणे तावत् वेदभागस्य प्रामाण्यनिश्चायके- **'वेदांश्चैके सन्निकर्षं पुरुषाख्याः'**[4] इति प्रथमं सूत्रम्। एके नैयायिकादयो वेदान् सन्निकृष्टकालकृतान् मन्यन्ते। यतस्ते पुरुषाणां कठकलापादीनां नाम्ना व्यवह्रियते इति तदर्थः। तत्र वेदभागस्य सर्वस्यापि पुरुषकृतत्वं पूर्वपक्षितम्। अनन्तरम्-'अनित्यदर्शनात्'[5] इत्यपरं सूत्रम्। अनित्यानां जरामरणवतां बबरादीनां पुरुषाणां दर्शनादपि वेदानामनित्यत्वमिति तदर्थः। अनेन सूत्रेण **''बबरः प्रावाहणिरकामयत**[6]'', **''कुसुरुबिन्द औद्दालकिरकामयत**[7]'' इत्यादीनि ब्राह्मणवाक्यान्येवाभिसंहितानीत्यवगम्यते। तथैव चोदाहृतं भाष्यकारादिभिः सर्वैरपि।

यदि पूर्वसूत्रे जैमिनिर्भगवान् मन्त्रभागस्यैव वेदकत्वममंस्यत कथं सूत्रमिदं ब्राह्मणभाग सङ्ग्राहकमारचयिष्यत। **'वेदसंयोगात्'**[8] इति सूत्रेणापि **'तस्मात्सुवर्णं हिरण्यं भार्यंदुर्वर्णोऽस्य भ्रातृव्यो भवति'** इति वाक्यविहितस्य सुवर्णधारणस्य वेदेन सह संयोगोऽभिधीयते। अत्र हि सुवर्णधारणस्य पुरुषार्थत्वम्[9] उत क्रत्वर्थत्वम्[10] इति

सन्दिह्य वेदे 'आध्वर्यवम्' इति समाख्याते[11] वेदभागे संयोगात् = सम्बन्धात् तस्य चाग्निहोत्रादिधर्मविधायकत्वात् तादृशकर्मधर्म एवेदं सुवर्णधारणमिति पूर्वपक्षाशयः। यदि ब्राह्मणभागस्य वेदत्वं नाभविष्यत् तादृशब्राह्मणवाक्यविहितस्य सुवर्णधारणस्य कथं वेदसंयोग उपापत्स्यत। एवं **'वेदो वा प्रायदर्शनात्'**[12] **'वेदसंयोगान्न प्रकरणेन बाध्यते[13]', 'वेदोपदेशात्पूर्ववद्वेदान्यत्वे यथोपदेशं स्युः[14],** 'संस्कारास्तु पुरुषसामर्थ्ये यथावेदं कर्मवद् व्यवतिष्ठेरन्[15]' इत्यादिनि सूत्राणि-ब्राह्मणभागस्यापि वेदत्वं परिपोषयन्ति। एतेषामर्थो नात्र विस्तरभयाल्लिख्यते। स च शाबरभाष्यादिमीमांसाग्रन्थतोऽवगन्तव्यः। एवं सर्वैरपि सूत्रकारैर्महर्षिभिर्मन्त्र-ब्राह्मणयोरुभयोरपि वेदत्वं निःशङ्कमभ्युपगतम्।

अत्र केचिदेवं प्रत्यवतिष्ठन्ते-बौधायन-कात्यायनापस्तम्बादिमहर्षीणां तावत् मन्त्रब्राह्मणयोरुभयत्रापि वेदत्वमभिमतमासीत्, तन्मतानुयायिभिश्च सायणादिभिराचार्यैरपि तदेवोररीकृतम्। परन्तु केचिदाधुनिका ब्राह्मणग्रन्थेष्वेव **'य एवं वेद'**[16] इति बहुत्र दर्शनाद् ब्राह्मणग्रन्थानामेव प्रथमं वेदपदाभिधेयता उपक्रान्ता। ततो गच्छति महति काले मन्त्रेष्वपि वेदशब्दः प्रयोक्तुमुपक्रान्तः। अस्माभिस्तु मन्त्रभागस्यैव पुराऽऽसीद्वेदपदवाच्यता। ततश्चिराय ब्राह्मणेऽपि सं प्रयुक्त आसीत, यतो हि वेदशब्दो विद्यापरपर्यायः। मन्त्रभाग एव च सर्वासां विद्यानां निदानमासीत्। अतश्च कारणाद् विद्याऽपरपर्यायवेदशब्दवाच्यत्वं मन्त्राणामेवाभिप्रेयते। सूत्रकाले परं मन्त्रब्राह्मणयोरुभयत्रापि वेदशब्दः प्रयुक्त आसीत्-इति। तत्र च ददति च बहूनि प्रमाणानि **'वेदेन रूपे व्यपिबत्सुतासुतौ'**[17], 'यस्मिन्वेदा निहिता विश्वरूपाः[18], **'त्रयो वेदा अजायन्त अग्नेर्ऋग्वेदो वायोर्यजुर्वेदः, सामवेद आदित्यात्[19]'**, 'वेदा वा एते, अनन्ता वै वेदाः[20], **''स होवाच ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमप्याथर्वणं चतुर्थम्[21]''** इत्यादीनि। एवमुदाहृतेषु श्रूयमाणो वेदशब्दस्त्रयीमन्त्रपरकः। अतश्च अय्यपरपर्यायो वेदशब्दो मन्त्रभागमेवाभिधत्ते, न ब्राह्मणभागमिति तेषामभिसंहितम्।

अत्रेदं विचार्यते-प्रथमं तावदिदंवादिन एवं पृच्छामः-त्रयीशब्दो मन्त्रमात्रपरक इति कथमेभिरवगतमिति। यान्येभिरुदाहृतानि वाक्यानि **'त्रयो वेदा अजायन्त'** इत्यादीनि, तेषु वेदशब्दो मन्त्रब्राह्मणोभयपरको नेत्यत्र किं प्रमाणम्। इमान्येव वाक्यान्युदाहृत्य जैमिनिना द्वितीयाध्याये तृतीये पादे प्रथमाधिकरणे विचारितम्- **'उच्चैर्ऋचा क्रियत, उपांशु यजुषा, उच्चैः साम्ना'**[22] इत्यादिवाक्य

विहितानामुच्चस्त्वादीनां अङ्गमात्रधर्मत्वम्, उत ऋग्वेदादिविहितकर्मधर्मता? इति। तत्र ऋगादिशब्दानामपि ऋग्वेदपरत्वं बहुत्र श्रुतमिति भाष्यकारेणोदाहृतं यथा'ऋगादयः शब्दाः शक्नुवन्ति वेदमभिवदितुमिति 'ऋग्भिः पूर्वाह्णे देव ईयते, यजुर्वेदे तिष्ठति मध्य अहनः, सामवेदेनास्तमये महीयते, वेदैरशून्यस्त्रिभिरेति सूर्यः[23] इति द्वौ वेदौ सङ्कीर्त्य ऋक्शब्दं च त्रिषु पादेषु, चतुर्थे पादे उपसंहरति बहुवचनेन, वेदैरशून्यस्त्रिभिरेति सूर्य इति।[24]

अस्मिन्मन्त्रे प्रथमत 'ऋग्भिः पूर्वाक्' इति ऋछाःशब्देनोपक्रम्य अनन्तरमुभयत्र वेद शब्दं पठित्वा उपसंहारे च **'वेदैरशून्यस्त्रिभिः'** इति वेदत्रयप्रतिपादनात् ऋक्शब्दस्यापि वेदपरकत्वमेवेति भाष्याभिप्रायः। एवं **'त्रयी विद्याख्या च तद्विद्धि[25]** इति सूत्रस्थेन 'यस्त्रीन् वेदानधीते स त्रयीविद्यः। ऋक्सामयजूंषि इति त्रयो वेदा उच्यन्ते। तद्विद्धि त्रयीविद्याख्या युज्यते' इति भाष्येण ऋगादिपदानां मन्त्रब्राह्मणात्मकवेदपरत्वं, त्रयीशब्दस्यापि च तत्परत्वमेवेति सुस्पष्टमवगम्यते। यदि त्रयीशब्दस्य मन्त्रमात्रपरत्वं 'त्रयो वेदा अजायन्त[26] इति ब्राह्मणवाक्यस्थवेदशब्दस्य च भवदभिप्रेतमन्त्रात्मकत्रिमात्रपरत्वं सूत्रकारेण भाष्यकारेण वाऽभिप्रेतं स्यात्, तर्हि सिद्धान्ते ऋग्वेदाविहितकर्म-मात्राङ्गत्वमुच्चैस्त्वादीनामिति कथं ताभ्यां सिद्धान्तितं सङ्गच्छेत।

किं च यतो भाष्यकारेणोदाहृतमिदम् - 'ऋग्भिः पूर्वाह्णे' इति, सोऽयमनुवाकः 'ऋचां प्राची महती दिगुच्यत इत्यारभ्यते, तत्र इयमानुपूर्वी दृश्यते- "**ऋचां प्राची महती दिगुच्यते।**[27] दक्षिणमाहुर्यजुषामपाराम्। अथर्वणामङ्गिरसां प्रतीची। साम्नामुदीची महती दिगुच्यते। ऋग्भिः पूर्वाह्णे दिवि देव ईयते। यजुर्वेदे तिष्ठति मध्य अहनः। सामवेदेनास्तमये महीयते। वेदैरशून्यस्त्रिभिरेति सूर्यः। ऋग्भ्यो जातं वैश्यं वर्णमाहुः। यजुर्वेदे क्षत्रियस्याहुर्योनिम्। सामवेदो ब्राह्मणानां प्रसूतिः"[28] इति।

तत्र प्रथमतः 'ऋचाम्' 'यजुषाम्' 'साम्नाम्' इति ऋगादिशब्दान् प्रयुज्य 'तत ऋग्भिः', 'यजुर्वेदे' 'सामवेदे' इति वेदशब्दसंयुक्ततया पठित्वा अन्ते 'वेदैरशून्यस्त्रिभिरिति वेदशब्दसंवलिततयैवोपसंहृतम्। तत्र पूर्वोत्तरसन्दर्भ-पर्यालोचनया यजुर्वेदशब्दस्येव ऋग्यजुरादिशब्दानामपि तत्तद्वेदपरत्वमेवेत्यका-मेनाप्यभ्युपगन्तव्यं भवति। अत ऋगादिशब्दा ऋग्वेदपरका इत्यत्र इतः परं किमधिकमन्वेष्टव्यं प्रमाणम्। वेदशब्दश्च मन्त्रब्राह्मणोभयपरक इति च

निरूपितमधस्तात्। मन्त्रश्चायं वेदत्रयसहचारितत्वं वेदत्रयात्मकत्वं वा भगवतः सूर्यस्यावेदयति इति निर्विवादम्। तैत्तिरीयान्तर्गतः ‘आदित्यो वा एष एतन्मण्डलं तपति’[29] इत्युपक्रान्तः सर्वोऽप्यनुवाकोऽमुमेवार्थं सुस्पष्टं निरूपयति। अतश्च ‘ऋचां प्राची’ इत्यनुवाकस्य अस्य चानुवाकस्य एकार्थतैव प्रतीयते इति तदनुवाकेन भगवतः सूर्यस्य ऋग्वेदादिसहचरितत्वप्रतिपादनात् अत्रापि तदेव प्रतिपादनीयम्। एतदनुवाकान्तर्गतं च वाक्यमेकं श्रूयते ‘सैषा अय्येव विद्या तपति य एषोऽन्तराऽऽदित्ये हिरण्मयः पुरुषः’[30] इति। वाक्यमिदं पूर्वोक्तार्थस्योपसंहारकम्। अतश्च मन्त्रब्राह्मणात्मकभागमेव त्रयीशब्दोऽप्यभिदधाति न मन्त्रमात्रमिति सुस्पष्टमेतत्प्रमाणेनावगम्यते। एवं बहून्यपि प्रमाणानि वेदादेवोदाहर्तुं शक्यन्ते यद्यपि, तथापि अतिविस्तरभयाद् दिङ्मात्रमिह दर्शितम्। अतो वेदशब्दः, ऋगादिशब्दः, त्रयीशब्दो वा मन्त्रब्राह्मणात्मकस्यैव भागस्याभिधायक इति प्रमाणेन सिद्ध्यति। यानि च तदुदाहृतानि साभिप्रायावष्टम्भकत्वेन प्रमाणानि, तान्यपि तन्मतं पोषयितुं नेशन्त इति केवलस्य मन्त्रभागस्यैव वेदपदवाच्यत्वमभ्युपगच्छतां न किञ्चिदाग्रहादन्यत्प्रमाणं पश्यामः।

**सन्दर्भग्रन्थाः -**


1. *बौ.गृ. 2.62*
2. *कौ.सू. 1.3*
3. *आपल्यज्ञप. 24.1.31*
4. *जै. 1.1.27 5. जै. 1.1.28*
6. *तै.सं. 7.2*
7. *तै.सं. 7.22*
8. *जै. 3.4.22*
9. *पुरुषाभिलषितफलजनकत्वं पुरुषार्थत्वम्।*
10. *क्रत्वपेक्षितोपकारजनकत्वं क्रत्वर्थत्वम्।*
11. *श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्यारूपेषु षट्सु प्रमाणेषु अन्तिमं प्रमाणं समाख्या। सा च यौगिक शब्दरूपाम्।*
12. *जै. 3.3.2*
13. *जै. 3.3.8*
14. *जै. 3.7.50*

15. जै. 3.8.3
16. तब्रा. 3.8.9, शब्रा. 1.6.3.13
17. शुण्य. 19.78
18. अथ. 4.7.6
19. ऐब्रा. 25.7
20. तै.ब्रा. 3.10.11.4
21. छां. 7.1.2
22. ऐब्रा. 5.5.5
23. तै.ब्रा. 3.12.9
24. शा.भा. 3.3.3
25. जै. 3.3.5
26. ऐब्रा. 25.7
27. तै.ब्रा. 3.12.9
28. तै.ब्रा. 3.12.9
29. तै.आ. 10.13
30. तै.आ. 10.13

# 11

# हरिभद्रसूरिणो योगविषयकप्राकृतसाहित्यस्य समीक्षणम्

*डॉ. धर्मचन्द्रः जैनः*

प्राकृतसाहित्यगगने याकिनीमहत्तरासुनूः हरिभद्रसूरिः (700-770) भास्कर इव अद्यापि संराजते। प्राचीनभारतीयसाहित्ये तस्य आसीत् महती गौरवच्छविः। संस्कृते यथा प्रभावकारि लेखनं तेन विहितं तथैव प्राकृतवाचि अवर्तत तस्य प्रभाविका लेखनी। प्रसिद्धोऽयं सूरिः संजातः उत्कृष्टो दार्शनिकः कुशल आगमटीकाकारः, महान् प्राकृत कथारचयिता च। जैनपरम्परायां योगप्ररूपकरूपेणाऽपि वर्तते तस्य प्रसिद्धिः। ईसवीय-अष्टमशताब्यामनेन स्वकीय-प्रतिभायाः परिचयः प्रदत्तः। हरिभद्रसूरिणा संस्कृते 'षड्दर्शनसमुच्चय' नाम्ना भारतीयदर्शननिरूपको ग्रंथः प्रणीतः, यस्योपरि गुणरत्नसूरिणः प्रसिद्धा टीका तस्य मर्म चउदघाटयति। शास्त्रवार्तासमुच्चयः इत्यपरो ग्रन्थस्तस्य दार्शनिकमेधां समन्वयशीलताञ्च प्रकाशयति। एतदुपरि उपाध्याययशोविजयविहता टीका नव्यन्यायशैलीं संवहति। अनेकान्तजयपताका अनेकान्तवादप्रवेशश्च तस्य अनेकान्तवादपोषकौ संस्कृतग्रन्थौ स्तः। षोडशकप्रकरणम्, धर्मबिन्दु- प्रकरणम्, अष्टकप्रकरणम् इत्यादयः संस्कृतग्रन्था अपि तस्य दार्शनिक-धार्मिकनिरूपणवैशिष्ट्यं प्रकटयन्ति। प्रथम-आगमटीकाकाररूपेण तेन दशवैकालिकवृत्तिः, आवश्यकवृत्तिः, नन्दीवृत्तिः, जीवाजीवाभिगमलघुवृत्तिः, चैत्यवन्दनसूत्रवृत्तिः (ललितविस्तरा) प्रज्ञापनापदेशव्याख्या च विहिता, याः तस्य आगमटीकाकौशलं ज्ञापयन्ति।

संस्कृतभाषायां यथा तेन उत्कृष्टाः रचनाः संविहितास्तथैव प्राकृत भाषायामपि प्रचुरं साहित्यं विरचितम् तस्य प्राकृतसाहित्यं त्रिविधं वर्तते-1-आगमिकप्रकरणसाहित्यम्, 2-कथासाहित्यम्, 3- योगविषयकं साहित्यञ्च।

आगमिकप्रकरणसाहित्ये पंचाशकप्रकरणम्, श्रावकप्रज्ञप्तिः, पंचवस्तुकम्, सम्बोधप्रकरणम्, दर्शनसप्ततिका, धर्मसंग्रहणी, विंशतिविंशिका, उपदेशपदमिति अनेककृतयस्तस्य व्यापकज्ञानं, मौलिकचिन्तनं, रचनानैपुण्यञ्च प्रकटयन्ति। कथासाहित्ये समराइच्चकथा, धूर्ताख्यानञ्च तस्य कथाकौशलं ख्यापयतः। योगविषयकौ प्राकृतग्रन्थौ स्तः- 1- योगविंशिका, 2- योगशतकञ्च। संस्कृत भाषायामपि तस्य योगविषयकं ग्रन्थद्वयं वर्तते- 1- योगदृष्टिसमुच्चयः, 2- योगबिन्दुश्च। षोडशकप्रकरणेऽपि चतुर्दश-पञ्चदशप्रकरणयोः योगस्य चर्चाऽवाप्यते। अत्र प्रमुखरूपेण हरिभद्रसूरेः प्राकृतसाहित्ये विरचितयोगविषयकं ग्रन्थद्वयमवलम्ब्य विचारो विधास्यते किन्तु यथावश्यकं संस्कृतभाषायां विरचितयोग- बिन्दुयोगदृष्टिसमुच्चय-षोडशकप्रकरणस्य चापि विषयप्रतिपादनाय उपयोगो विधास्यते।

हरिभद्रसूरिणः प्राकृतसाहित्यस्य वैशिष्ट्यं निम्नांकित-बिन्दुषु प्रकटयितुं शक्यते-

1- आगमानाम् अनन्तरं प्राकृतभाषायां आगमिकप्रकरणानां लेखनेऽसौ श्वेताम्बरपरम्परायां निष्णातो रचयिता आसीत्।
2- आगमेषु जिनपूजाविध्यादिविषयाणां प्रतिपादनं न संजातं, तेषां प्रतिपादनं पंचाशकप्रकरणे, विंशतिविंशिकादि- ग्रन्थेषु तेन कृतम्।
3- प्राकृतभाषायाः कथासाहित्यं समृद्धयता हरिभद्रसूरिणा एकतः 'समराइच्चकथा' इत्यस्य कथाशैल्यां रचनां विधाय कर्मसिद्धान्तस्य मार्मिकं चित्रणं विहितमपरतश्च 'धुत्तक्खाणं'- माध्यमेन रामायण-महाभारत-पुराणादिषु कपोलकल्पितमान्यतानां व्यङ्ग्यशैल्यां खण्डनं विहितम्।
4- योगविषयकसाहित्यस्य प्राकृतभाषायां निर्माणेऽसौ अग्रणीः आचार्यः समभूत् यस्य प्रभावः हेमचन्द्र-यशोविजया-दीनां ग्रन्थेषु दृश्यते। प्राकृतभाषायां योगविद्यायाः निरूपणं विधाय तेन अस्याः विद्यायाः जनसाधारणेभ्यः सुलभता प्रदत्ता।
5- हरिभद्रसूरिणा प्रायः महाराष्ट्रीप्राकृतस्य प्रयोगो विधीयते, यथावसरं देशजशब्दानां अर्धमागधीशब्दानामपि च प्रयोगो विहितः। हरिभद्रसूरेः पूर्वं महर्षि-पतञ्जलिकृतं योगसूत्रं योगविषयकः सर्वाधिकप्रसिद्धो ग्रन्थोऽवर्तत। योगवासिष्ठे भगवदगीतायामपि योगस्य निरूपणमुपलभ्यते। हरिभद्रसूरिणा

गोपेन्द्रस्य[1] कालातीतस्य[2] च योगविद्यायाः उल्लेखः स्वकीययागबिन्दुग्रन्थे विहितः। हरिभद्रसूरिणः योगशतके एकाधिकशतगाथाः, योगविंशिकाग्रन्थे च विंशतिः गाथाः विद्यन्ते। योगदृष्टिसमुच्चयग्रन्थे अष्टाविंशत्यधिक-द्विशतश्लोकाः, योगबिन्दौ च सप्तविंशत्युत्तरपञ्चशतश्लोकाः वर्तन्ते। षोडशकप्रकरणग्रन्थेऽपि चतुर्दशे पञ्चदशे प्रकरणे च योगस्य निरूपणं संजातम्।

जैनागम-परम्परायां तत्त्वार्थसत्रे च मनोवचन-कायानां प्रवृत्तिः योगः[3] इति योगस्य स्वरूपमङ्गीक्रियते। योगस्य शुभता अशुभता च प्रतिपाद्यते। शुभयोगः पुण्यस्य अशुभयोगश्च पापस्य सूचकः।[4] आचार्यहरिभद्रसूरिणा जैनदर्शने योगविद्यायाः प्रवर्तनं कुर्वता योगस्य लक्षणमित्थं विहितम् -

**मोक्खेण जोयणाओ जोगो, सव्वो वि धम्मवावारो।**
**परिसुद्धो विन्नेओ ठाणाइगओ विसेसणं।।**[5]

सर्वोऽपि परिशुद्धो धर्मव्यापारः मोक्षेण योजनाद् योगः इति प्ररूपयति आचार्यो हरिभद्रः। योगसूत्रकार- पतञ्जलिना योगस्य लक्षणं विहितम्- योगश्चित्तवृत्तिनिरोधः।[6] अर्थात् चित्तवृत्तीनां निरोधो योगः इति। चित्तवृत्तिष्वपि क्लिष्टचित्तवृत्तीनां निरोधो योगो मन्यते। क्लिष्टचित्तवृत्तीनां निरोधो हरिभद्रसूरिणा प्रतिपादिते योगेऽपि संजायते। हरिभद्रसूरेः योगलक्षणं पतञ्जलेः योगसूत्र लक्षणापेक्षाया अधिकं व्यापकं संलक्ष्यते। अस्मिन् लक्षणे भगवद्गीतायाः 'समत्वं योग उच्यते'[7], 'योगः कर्मसु कौशलम्'[8] इति लक्षणद्वयमपि समाविशति। यतोहि जैनदर्शनस्य धर्मव्यापारे समतायाः क्रियानिपुणतायाः च समावेशो दृश्यते। जैनदर्शने न केवलं मनोवृत्तीनामपितु वाचो देहस्य चापि वृत्तीनां निरोधो मोक्षाय आवश्यकं मन्यते। अतः पतञ्जलिकृतयोगलक्षणापेक्षया हरिभद्रसूरिणः योगलक्षणं वर्ततेऽधिकं व्यापकम्।

सर्वो धर्मव्यापारो मोक्षाङ्गं न भवति, केवलं परिशुद्धो धर्मव्यापारो भवति मोक्षाङ्गम् शुक्लपक्षे समागतानां जीवानां सम्यग्दृष्टिसम्पन्नानां मनुष्याणाञ्च यो धर्मव्यापारो भवति स एव परिशुद्धो भूत्वा समाविशति योगे। अस्मिन् पंच अणुव्रतानि, पंचमहाव्रतानि पंच समितयः तिस्रो गुप्तयः, द्वादश परीषहाः, क्षमादयो दशविधाः धर्माः, द्वादश तपांसि, द्वादश अनुप्रेक्षादयः सर्वा धर्मप्रवृत्तयो योगलक्षणं व्याख्यापयन्ति। यथा ध्यानेषु शुभध्यानमुपादेयम् अशुभध्यानञ्च हेयं भवति,

इत्थमेव शुभयोगः मोक्षेण योजनाद् उपादेयः, अशुभयोगश्च हेय इति कथयितुं शक्यते। अशुभप्रवृत्तेः त्यागेन या प्रवृत्तिः भवति सा योगनिरोधपूर्वं शुभैव भवति।

सर्वोऽपि परिशुद्धो धर्मव्यापारो मोक्षेण योजनाद् योगो भवति, इत्यस्मिन् व्यापके लक्षणे रत्नत्रयस्वरूपो मोक्षमार्गो अन्तर्निहितो वर्तते, एतदेव कारणं यद् हरिभद्रसूरिणा सम्यग्दर्शन-ज्ञान-चारित्राणि निश्चययोगरूपेण, एतेषु सहायककारणानि च व्यवहारयोगरूपेण प्रतिपादितानि यथा -

**निच्छयओ इहजोगो सन्नाणाईण तिण्ह संबंधो।**
**मोक्खेण जोयणाओ निद्दिट्ठो जोगिनाहेहिं।।**[9]

आचार्यो हेमचन्द्रसूरिरपि योगं मोक्षस्य कारणमङ्गीकृत्य तं सम्यग्ज्ञान-श्रद्धा-चारित्रस्वरूपं प्रतिपादयति -

**चतुर्वर्गोऽगणीर्मोक्षो योगस्तस्य च कारणम्।**
**ज्ञानश्रद्धानचारित्ररूपं रत्नत्रयं च सः।।**[10]

धर्म-अर्थ-काम-मोक्षस्वरूपेषु चतुवर्गेषु मोक्षोऽग्रणीर्वर्तते। तस्य साधनं योगोऽस्ति स योगश्च सम्यग्दर्शन- सम्यग्ज्ञान-सम्यक्चारित्रस्वरूपो भवति। इत्थं योगस्य व्यापकं स्वरूपं प्रस्तुतीकृत्यापि योगस्य नवीनरीत्या भेदप्रतिपादनं विवेचनं च विधीयते जैनाचार्यैः।

हरिभद्रसूरिणः अनन्तरं शुभचन्द्रः, हेमचन्द्रः, अमितगतिः, सोमदेव सूरिः, उपाध्याय-यशोविजयः इत्यनेके योगविवेचकाः जैनदर्शनस्य योगनिरूपणे योगदानं कृतवन्तः, किन्तु हरिभद्रसूरिः सर्वेषां अग्रणीः नायकः समभूत् तमेवाधारीकृत्य उत्तरवर्तिभिः आचार्यैः योगस्य प्रतिपादनं कृतम्। अत्र हरिभद्रसूरिणः योगदानमाश्रित्य तस्य केचन विचाराः प्रस्तूयन्ते।

## योगस्य भेदाः

हरिभद्रसूरिणा विभिन्नग्रन्थेषु विविधप्रकारेण योगस्य भेदानां निरूपणं विहितम् योगबिन्दुग्रन्थेऽसौ योगस्य पंचविधत्वं निरूपयति-

**अध्यात्मं भावना ध्यानं समता वृत्तिसंक्षयः।**
**मोक्षेण योजनाद् योग एष श्रेष्ठो यथोत्तरम्।।**[11]

1- अध्यात्मम्, 2- भावना, 3- ध्यानम्, 4- समता, 5- वृत्तिसंक्षयश्चेति पंचविधो योगः। एषु अध्यात्मयोगाद् भावनायोगः, भावनायोगाद् ध्यानयोगः, ध्यानयोगात् समतायोगः समतायोगाच्च वृतिसंक्षयो योगः यथोत्तरं श्रेष्ठो भवति।

**1- अध्यात्मयोगः-** यदा कश्चित् जीवः देशचारित्रं सर्वचारित्रं वाऽङ्गीकरोति तदा तस्य अध्यात्मयोगः प्रारभते। अस्मिन अध्यात्मयोगे जिनागमानुरूपं जीवादितत्त्वानां चिन्तनं भवति। मैत्री-करुणा-प्रमोद-माध्यस्थभावैः जीवो संपृक्तो जायते।[12] अनेन अध्यात्मयोगेन ज्ञानावरणादिपापकर्मणां क्षयः क्षयोपशमो वा संजायते, सत्त्वस्य शीलस्य, ज्ञानस्य च उत्कर्षो भवति। स्वानुभवरूपामृतस्य च आस्वादनं भवति।[13]

**2- भावनायोगः-** अध्यात्मयोगस्य प्रत्यहं वृद्धिंगतोऽभ्यासः यदा पौनःपुन्येन मनःसमाधिसंयुक्तो भवति तदाऽसौ भावनायोगः कथ्यते।[14] अनेन भावनायोगेन अशुभाद् निवृत्तिः शुभे च वृद्धिर्जायते। इत्थं सुचित्तवृद्धिः अनुभूयते[15] चित्ते पवित्रतायाश्च अनुभवो जायते।

**3- ध्यानयोगः-** शुभैकालम्बनं चित्तं ध्यानमिति। तद् ध्यानं स्थिरप्रदीप-सदृशं निश्चलं सूक्ष्माभोगसमन्वितं च भवति।[16] अत्र हरिभद्रसूरिणा धर्मध्यान-शुक्लध्यानमभिलक्ष्य, तल्लक्षणं कृतमिति प्रतीयते। यतोहि अत्र शुभालम्बनस्य उल्लेखो विहितः। षोडशकप्रकरणग्रन्थे चित्तस्य अष्टौ दोषा निरूपिताः ये ध्यानयोगे बाधां जनयन्ति, ते सन्ति-1-खेदः, 2- उद्वेगः, 3- क्षेपः, 4- उत्थानम् 5- भ्रान्तिः, 6- अन्यमुदः, 7- रोगः, 8- आसङ्गश्च।[17] चित्तस्य श्रान्तता खेदः, कष्टसाध्यता-ज्ञान-जनितमालस्यम उद्वेगः, अन्तराऽन्तरा अन्यत्र चित्तन्यासः क्षेपः, चित्तस्यप्रशान्तवाहिता उत्थानम्, अतस्मिंस्तदग्रहरूपा भ्रान्तिः, रोगः पीड़ा भङ्गो वा रुग अभिष्वङ्ग आसङ्ग। प्रणिधाने ध्याने योगे वा चित्तस्य एते दोषा बाधका भवन्ति।[18] मतिमता, ते दोषा परिहर्तव्याः। ध्यानयोगस्य कि फलमिति संलक्ष्य उक्तम् यद्अनेन आत्मवशित्वं, भावानां स्थैर्यं, संसारानुबन्धस्य व्यवच्छेदश्च संजायते।[19]

**4- समतायोगः-** अविद्याकल्पितेषु इष्टानिष्टवस्तुषु यथार्थबोधत्वेन व्युदासपूर्वकं समतारक्षणं समतायोग उच्यते।[20] मोक्षसाधकेभ्यः समतायोगस्य साधना दुःखमुक्त्यै कर्मक्षयाय च अत्यन्तमावश्यकी। समतायोगस्य फलानि सन्ति-1- प्राप्त-ऋद्धीनामप्रयोगः, 2- सूक्ष्मकर्मणामपि क्षयः, 3- अपेक्षाणां समापनम् च।[21]

**5- वृत्तिसंक्षययोगः-** अन्यसंयोगजन्यानां वृत्तीनाम् अपुनर्भावरूपेण यो निरोधो भवति स वृत्तिसंक्षयः उच्यते।[22] उपाध्यायो यशोविजयः अष्टादश-द्वात्रिंशिकायां वृत्तिसंक्षयं निरूपयनं कथयति- मनसि जायमानविकल्पानां शारीरिकस्पन्दानाञ्च= पूर्णनिरोधो संजायते।[23] परिस्पन्दात्मवृत्तेः निरोधो योगनिरोधसमये जायते।

'वृत्तिसंक्षयः' शब्दोऽत्रादर्शयति यदेतासां वृत्तीनां पुनर्भावो न घटते। वृत्तिसंक्षयेण केवलज्ञानं, शैलेषी-अवस्था, निराबाधा मोक्षप्राप्तिश्च भवति।[24] मनोविकल्पवृत्तेः क्षयेण केवलज्ञानं, मनोवाक्कायपरिस्पन्दात्मकवृत्तेः क्षयेण च शैलेशी अवस्था तथा चैतयोः द्वयोः परम्पराफलरूपेण मोक्ष-समवाप्तिश्च जायते। एतेषु पञ्चयोगेषु अपुनर्बन्धकस्य सम्यग्दृष्टेश्च अध्यात्मयोगः भावनायोगश्च व्यवहारेण जायेते, निश्चयेन तु एतौ चारित्रिणः भवतः। ध्यानयोगः समतायोगः वृत्तिसंक्षययोगश्च तात्त्विकरूपेण चारित्रिणः एव भवन्ति।[25]

## योगस्य अन्ये पञ्च प्रकाराः

योगविंशिकायां हरिभद्रसूरिः येषां पञ्चयोगानां निरूपणं करोति ते सन्ति- 1- स्थानम्, 2- ऊर्णः/वर्णः, 3- अर्थः, 4- आलम्बनम्, 5- अनालम्बनम् च।[26] एतेषु स्थानं वर्णश्च कर्मयोगे, अर्थः आलम्बनमनालम्बनञ्च ज्ञानयोगे समाविशन्ति। ध्यान-कायोत्सर्गादिकरणे आसन-मुद्रारूपं भवति स्थानम् योगाभ्यासक्रियायां सूत्रादीनामुच्चारणं वर्णः[27] कथ्यते। आगम-वाक्यानां भावार्थज्ञानमेव 'अर्थः'। आलम्बनं द्विविधं भवति-रूपि अरूपि च। जिनमुद्रादीनां आलम्बनं पिण्डस्थ-पदस्थ-रूपस्थध्यानं च रूप्यालम्बनं भवति। अर्हतसिद्धानां गुणानामालम्बनम् अरूपि कथ्यते। आलम्बनरहिता धारावाहि-प्रशान्तवाहिता यदा सहजतया भवति तदा अनालम्बनयोगो मन्यते।[28]

पञ्चविधात्मकोऽयं योगः, नियमेन चारित्रशीलस्यैव भवति, अन्यस्य तु बीजमात्रमिष्यते।[29] एतेषु प्रत्येकयोगस्य इच्छा-प्रवृत्ति-स्थिरता-सिद्धिभेदैः चतुःप्रकाराः प्रवर्तन्ते।[30] योगयुक्तसाधकानां चर्चायां प्रीतिः सङ्गत्यागे अन्तःउल्लासः 'इच्छा' योगः। सर्वत्र उपशमभावपूर्वकं सम्यग्दर्शनादियोगस्य पालनं 'प्रवृत्तिः', तत्रैव बाधकानां चिन्तारहितो निरतिचारोऽभ्यासः 'स्थिरता', योगेन यत्किमपि लब्धं तत्सर्वं परमार्थसहायकं भवेदिति 'सिद्धिः'।[31] एतेषां इच्छा-प्रवृत्ति-स्थिरता-सिद्धिभेदानां क्रमशः अनुकम्पा, निर्वेदः, संवेगः, प्रशमः इति अनुभावा भवन्ति।[32] इच्छायाः अनुभावः अनुकम्पा, प्रवृत्तेः अनुभावः निर्वेदः, स्थिरतायाः अनुभावः संवेगः, सिद्धेः अनुभावः प्रशमो भवति।

योगस्य सदनुष्ठानाय प्रीतिः, भक्तिः, आगमानुसारिता, असङ्गता च अवलम्बनीया।[33] योगे अतिशया प्रीतिः आदरपूर्वकं भक्तिः, आगमानुकूलमाचरणं, असंगता च समाचरणीया।

## योगस्य भेदत्रयम्

योगदृष्टिसमुच्चये इच्छायोगः, शास्त्रयोगः, सामर्थ्ययोगश्चेति योगस्य त्रयः प्रकाराः निरूपिताः। श्रुतस्य अर्थं ज्ञातुमिच्छा इच्छायोगो भवति। प्रमादकारणात् ज्ञानिनोऽपि अयं योगः विकलोऽसम्पूर्णो वा भवति।[34] श्रमणयुक्तस्य यथाशक्ति अप्रमादिनः जनस्य शास्त्रार्थस्य तीव्रबोधेन शास्त्रयोगः सम्पद्यते।[35] शास्त्रनिर्दिष्टोपायज्ञः पूर्णसामर्थ्येन यदा अतिक्रान्तविषयेऽपि प्रवर्तते तदा सामर्थ्ययोगः प्रकटीभवति।[36] शास्त्रयोगः योगशतके आज्ञायोगनाम्ना वर्णितः।[37] सामर्थ्ययोगस्य प्रकारद्वयं वर्तते- 1- धर्मसंन्यासः, 2- योगसंन्यासश्च। धर्मसंन्यासः क्षयनिष्पन्नः उपशमनिष्पन्नश्च भवति, कायादिकर्मसंन्यासस्तु योगसंन्यासो भवति।[38] धर्मसंन्यासस्वरूपो सामर्थ्ययोगः अष्टमगुणस्थाने द्वितीयापूर्वकरण- समये ग्रन्थिभेदसमये वा प्रवर्तते। योगसंन्यासस्तु मनोवाक्कायप्रवृत्ति-निरोधसमये भवति।[39] अयं योगसंन्यासस्वरूप-योगो परमयोगो भवति, यतोह्ययं मोक्षेण साक्षात् योजयति।

## अष्टविधाः योगदृष्टयः

योगदृष्टिसमुच्चये अष्टौ योगदृष्टयः प्रतिपादिताः सन्ति- 1- मित्र, 2- तारा, 3- बला, 4- दीप्रा, 5- स्थिरा, 6- कान्ता, 7- प्रभा, 8- परा।[40] एताः योगदृष्टयः पातञ्जलयोगसूत्रे प्रतिपादितेन अष्टाङ्गयोगेन समतां वहति। यमेन सह मित्रादृष्टेः, नियमेन सह तारादृष्टेः आसनेन सह बलादृष्टेः, प्राणायामेन सह दीप्रादृष्टेः, प्रत्याहारेण सह स्थिरादृष्टेः, धारणया सह कान्तादृष्टेः, ध्यानेन सह प्रभादृष्टेः, समाधिना सह परादृष्टेः, तुलना क्रियते। एतासु अष्टदृष्टिषु यो भेदो विद्यते तस्य प्रकटीकरणं तृण-गोमय-काष्ठ-दीप-रत्न-तारा-सूर्य-चन्द्राणां प्रभाभेदेन विधीयते।[41] तृणाग्न्यपेक्षया गोमयाग्नेः, गोमयाग्नेरपेक्षया काष्ठाग्नेः, तदपेक्षया दीपप्रभायाः, तदपेक्षया रत्नप्रभायाः, रत्नप्रभापेक्षया ताराप्रभायाः, ताराप्रभापेक्षया सूर्यप्रभायाः, सूर्यप्रभापेक्षया च चन्द्रप्रभायाः वैशिष्ट्यं वर्तते, इत्थमेव एतासु अष्टदृष्टिषु वैशिष्ट्यं ज्ञातव्यम् सत्श्रद्धायुक्तो बोध एवात्र दृष्टिनाम्ना संज्ञितः। अनेन बोधेन असत्प्रवृत्तेः परिहारः, सत्प्रवृत्तौ च गतिर्भवति।[42] कर्मावरणभेदापेक्षया सामान्यतः अष्टदृष्टीनां प्रतिपादनं विधीयते, सूक्ष्मरूपेण यदि चिन्तनं क्रियेत तर्हि भूयांसः भेदाः भवितुमर्हन्ति। एतासु प्रथमाः चतस्रो दृष्टयः प्रतिपातयुक्ता भवितुमर्हन्ति, किन्तु स्थिरादयः अन्तिमाः चतस्रो दृष्टयः प्रतिपातरहिता भवन्ति।[43]

अर्थात् प्रथमा चतस्रः दृष्टीः प्राप्याऽपि कश्चित् साधकः ततः पतितुं शक्नोति, किन्तु अन्तिमा चतस्रः दृष्टीः सम्प्राप्य प्रतिपातं भ्रंशं वा न प्राप्नोति। मित्रादृष्टौ देवकार्यादौ अद्वेषः, योगबीजानाञ्च उपादानं भवति। चरमे पुदगलावर्ते एषा दृष्टिः शुद्धा भवति। तारादृष्टौ बोधः मित्रादृष्ट्यपेक्षया स्पष्टं भवति। आत्महितकारिप्रवृत्तौ अनुद्वेगो, तत्त्वविषये जिज्ञासा च भवति। बलादृष्टौ सुखासनं भवति बोधश्च दृढो संजायते, तत्त्वजिज्ञासा उत्कृष्टा भवति, चित्ते क्षेपदोषो न दृश्यते। असत्-पदार्थान् प्रति तृष्णा न प्रवर्तते। दीप्रादृष्टिः प्राणायामवती, तत्त्वश्रवणसंयुक्ता, सूक्ष्मबोधरहिता चित्तस्य उत्थानदोषरहिता च भवति। प्राणेभ्योऽपि धर्मः गुरुतरः प्रतिभाति।[44] स्थिरायां दृष्टौ बोधो नित्यो भवति, कृत कार्यमपि अभ्रान्तं, निर्दोषं सूक्ष्मबोध-समन्वितञ्च भवति।[45] कान्तादृष्टौ योगी श्रुतधर्मनिष्ठो, अनुद्विग्नमनाः, आचारविशुद्धो च भूत्वा भूतानां प्रियो भवति।[46] प्रभादृष्टिसम्पन्नो योगी ध्यानप्रियो भवति, तत्त्वप्रतिपत्तियुतो जितमन्मथो, ध्यानजसुखानुभवी च भवति।[47] परादृष्टिः समाधिनिष्ठा आसक्तिविवर्जिता, अतिचाररहिता च भवति।[48] अस्यां घातिकर्मणां क्षयानन्तरं केवलज्ञानं प्रकटीभवति।[49] एताः अष्टौ दृष्टयः पातञ्जलयोगसूत्रे प्रतिपादित-अष्टाङ्गयोगैः[50] क्रमिकसादृश्यं संवहन्ति।

## योगस्य अधिकारिणः

मोक्षहेतोः योगस्य अधिकारिणः चतुर्विधा भवन्ति- 1- अपुनर्बन्धकाः, 2- सम्यग्दृष्टिनः, 3- देशविरतयः, 4- सर्वविरतयश्च।[51]

योगस्य प्रारम्भो जीवस्य चरमपुदगलावर्ते एव सम्भवः। तत्पूर्वं योगस्य नास्ति शुभारम्भः। चरमपुदगलावर्तस्य तात्पर्यं वर्तते यदसौ जीवः शुक्लपक्षी संजातः, तेन संसारपरिभ्रमणं सीमितं विहितम्।[52] तस्मिन् जीवे धर्मरुचिः संजायते। एषो जीवः अपुनर्बन्धकोऽपि कथ्यते। तेन पुनः मोहकर्मणः उत्कृष्टबंधो न क्रियते। अपुनर्बन्धकाद् विपरीतो जीवो भवाभिनन्दी कथ्यते। भवाभिनन्दिनः स्वरूपं प्रकटयता आचार्यहरिभद्रसूरिणा प्रोक्तम् -

**भवाभिनन्दिनः प्रायस्त्रिसंज्ञा एव दुःखिताः।**
**केचिद्धर्मकृतोऽपि स्युर्लोकपक्तिकृतादराः।।**[53]

भवाभिनन्दिनः प्राणिनः प्रायः आहार-भय-मैथुनसंज्ञासु अवलिप्ता दुःखिनश्च भवन्ति। तेषु केचिदधर्मक्रियामपि यदि कुर्वन्ति तर्हि ते लोकव्यवहारायैव

कुर्वन्ति। भवानन्दी जीवः क्षुद्रो, स्वार्थरतः, दीनो, मत्सरी, भययुक्तः शठः अज्ञोः, निरर्थककार्येषु च सम्पृक्तो भवति।[54] भवाभिनन्दिनः भोग्संक्लेशवर्जितायां मुक्तौ प्रायः द्विषन्ति।[55]

अपुनर्बन्धकस्य लक्षणं विदधता आचार्येण निगदितम् -

भवाभिनन्दिदोषाणां प्रतिपक्षगुणैर्युतः। वर्धमानगुणप्रायो अपुनर्बन्धको मतः।।[56] भवे संसारे एव आनन्दं मन्यमानः भवाभिनन्दी। तस्य प्रतिपक्षिगुणैर्युक्तो भवति अपुनर्बन्धकः। तस्मिन् गुणानामुत्तरोत्तरा वृद्धिर्जायते। अयम् अपुनर्बन्धको जीवः योगस्य प्रथमोऽधिकारी भवति।

योगशतके तस्य वैशिष्टयम् इत्थं निरूपितम् -

**पावं न तिव्वभावा कुणइ न बहु मन्नइ भवं घोरं।**
**उचियट्ठिइं च सेवइ सव्वत्थ वि अपुणबंधोत्ति।।**[57]

अपुनर्बन्धको जीवः तीव्रभावेन पापं न करोति, संसारं न बहु मन्यते, उचितां स्थितिं च सेवते। सम्यग्दृष्टियुक्तः, देशविरतिसम्पन्नो, सर्वविरतिसम्पन्नश्च जीवस्तु योगस्य अधिकारी भवितुमर्हत्येव । तत्र नास्ति सन्देहः। सम्यग्दृष्टिजीवः को भवतीत्यस्य लिङ्गानि योगशतके इत्थं प्रदर्शितानि--

**सूस्सूया धम्मराओ गुरुदेवाणं जहासमाही।**
**वेयावच्चे नियमो सम्मदिट्ठिस्स लिंगाइं।।**[58]

शुश्रूषा, धर्मरागः यथासमाधि गुरुदेवानां वैयावृत्त्यम्, नियमधारणमित्यादीनि लिङ्गानि भवन्ति सम्यग्दृष्टिसम्पन्नजीवस्य।

देशविरतिचारित्रसम्पन्नस्य सर्वविरतिचारित्रसम्पन्नस्य च लक्षणानि वर्णयता हरिभद्रसूरिणा प्रोक्तम् -

**मग्गणाणुसारी सद्धो पन्नवणिज्जो कियावरो चेव।**
**गुणरागी सक्कारंभसंगओ तह य चारित्ती।।**[59]

मार्गानुसारिणः श्रावकस्य न्यायसम्पन्नविभवादीनि पञ्चत्रिंशत् लक्षणानि प्रतिपाद्यन्ते। यो जनः तेषामनुसरणं करोत्यसौ, श्रद्धावान्, धर्मोपदेशयोग्यः, क्रियाशीलः, गुणानुरागी, सत्कार्यारम्भसङ्गतः चारित्री च भवति।

सर्वविरतिचारित्रशीलः सामायिकशुद्धिभेदतोऽनेकविधः ज्ञातव्यः। भगवदाज्ञापरिणतिभेदादप्यसौ अनेकविधो भवति अन्ते च वीतरागतां प्राप्नोति।[60]

सामायिकस्य शुद्ध्यशुद्धिं निरूपयता आचार्यहरिभद्रेण प्रतिपादितं यत् प्रतिषिद्धविषयेषु द्वेषेण, विहितविषयेषु च रागेण सामायिकम् अशुद्धं भवति, सामायिकस्य शुद्धता तु द्वयोरपि विषययोः समत्वरक्षणेनैव जायते।[61] सामायिक-चारित्रशीलस्य मुनेः सम्बन्धे निगदितम् -

**वासीचंदणकप्पो समसुहदुक्खो मुणी समक्खाओ।**
**भवमोक्खापडिबद्धो अओ य पाएण सत्थेसु।।[62]**

यथा येन परशुना चन्दनं छिद्यते स परशुरपि चन्दनेन सुगन्धितः क्रियते, तथैव दुःखदव्यवहारकर्तृषु अपि मुनिः समभाव-सम्पन्नो भवति। अनुकूलता भवेत् प्रतिकूलता वा, तस्य सर्वत्र समभावो दृश्यते। असौ संसारे मोक्षो च अप्रतिबद्धो अनासक्तो वा भवति।

इत्थं अपुनर्बन्धकता-सम्यग्दृष्टि-चारित्रसम्पन्नादिभूमिकासु यथायथं योगः सम्पद्यते। अपुनर्बन्धकता-स्वरूपायां प्रथमभूमिकायां परपीडावर्जनं गुरुपूजा, देवपूजा अतिथिपूजा, दीनजनेभ्यो दानं- इत्यादि करणीयानि कार्याणि भवन्ति।[63] पथभ्रष्टजनस्य कृते यदि अयं मार्गोऽपि सन्दर्शित : तर्हि असौ अनेन लोकधर्मेणापि अध्यात्ममार्गं सम्प्राप्नोति।[64] द्वितीयभूमिकायां लोकोत्तरधर्मः प्रारभते। अस्याम् अणुव्रतानि स्वीक्रियन्ते। गृहस्थसाधकस्य धर्मचरणमपि योग एव। तेन धर्मानुकूला आजीविका, सुविशुद्धं दानं, जिनपूजां विधाय भोजनं, सन्ध्याकालीनसाधना, चैत्त्यवन्दनं यतिभ्यः विश्रामस्थलप्रदानं, तेभ्यो धर्मश्रवणमित्यादि धर्माचरणं करणीयम्[65] अनित्यादिभावनानामपि अभ्यासस्तेन करणीयः। तृतीयभूमिकायां मुनेः पंचमहाव्रतसंयुक्तं समिति-गुप्ति-रक्षितं धर्मप्रवणजीवनं समायाति। निर्दोष-संयमपालनं, विशुद्धा भिक्षावृत्तिः, यथाविधि स्वाध्यायः, कष्टेषु समत्वं, पुरुषार्थप्रयोक्ते अनिगूह ता-इत्यादीनि बहूनि कर्त्तव्यानि सन्ति चारित्रशीलस्य यतेः।[66]

योगस्य उपदेशः पात्रतां निरीक्ष्य एवं कर्तव्यः। अयोग्येभ्यो योगस्य उपदेशः कदाचिद् हानिकारकोऽपि भवति, यथा च कथयति हरिभद्रः -

**गुरुणो अजोगिजोगो अच्चंतविवागदारुणो नेओ।**
**जोगिगुणहीलणा-नट्ठनासणा-धम्मलाघवओ।।[67]**

गुरुणा अयोग्यजनेभ्यो यदि योगस्य शिक्षा दीयते तदा अत्यन्तदारुणविपाको दृश्यते- योगिनः गुणानाम् अवहेलना भवति, अपात्रो स्वस्य नाशं विधाय अपरेषामपि नाशं विदधाति धर्मस्य च गौरवं नश्यति।

## योगाय प्रयत्नाः

हरिभद्रसूरिः योगसाधनायै उपायान दर्शयति। असौ कथयति यत्पूर्वं निजस्वभावस्य अवलोकनं करणीयं, जनवादश्च ज्ञातव्यः, प्रवृत्तेः औचित्यञ्च ज्ञात्वा निमित्तानुसारं मनो-वाक्कायानां प्रयोगो विधेयः।[68] यतनापूर्वकं गमनादिक्रियाभिः कायस्य, निरवद्यवचनैः वाचः, शुभचिन्तनैश्च मनसः शुद्धिः करणीया।[69] अधिकगुणसम्पन्नैः तुल्यगुणैश्च सार्धं सदा सहवासः करणीयः। जागरितिपूर्वकं च गुणस्थानसमरूपा क्रिया करणीया।[70] भयाक्रान्ताय गुरुरेव शरणं, कर्मरोगनिवारणाय तप एव शरणं, मोहस्य विषनाशाय च स्वाध्याय एव श्रेष्ठोपायो वर्तते।[71] एतैः उपायैः क्रमेण पापस्य हानिर्भवति, साधनायाञ्च विघ्नविनाशो भवति। आत्मनः उन्नत्यै निरन्तरं अर्हत-सिद्ध-गुरु-धर्माणां शरणं, दुष्कृतस्य गर्हा सुकृतस्यानुमोदना च करणीया।[72] चरमपुदगलावर्ते संस्थितानां जीवानां कृते योगोपायं वर्णयता हरिभद्रसूरिणा प्रोक्तम् -

**भावणसुयपाढो तित्थसवणमसयं तयत्थजाणम्मि।**
**तत्तो य आयपेहणमइनिउणं दोसवेक्खा।।**[73]

भावनानामभ्यासः, श्रुतपाठः, अनेकवारं तीर्थवाण्याः श्रवणं, तस्या अर्थज्ञानं तदनन्तरञ्च आत्मप्रेक्षणमतिना निजदोषप्रेक्षा करणीया। अनन्तरञ्च राग-द्वेषादि-आत्मदोषाणां परिहारं विधाय आत्मशक्तेः संवर्धनं विधेयम् तत्त्वज्ञानेन असत्प्रवृत्तेः निवारणं, चित्ते स्थैर्यं इहलोक-परलोकयोः हितञ्च साध्यते।[74] तस्य सर्वेषु सत्त्वेषु मैत्री, गुणाधिकेषु प्रमोदः, क्लिश्यमानेषु करुणा, अविनीतेषु च माध्यस्थभावः आचर्यते -

**सत्तेसु ताव मेत्तिं तहा पमोयं गुणाहिएसुं ति।**
**करुणामज्झयत्थे किलिस्समाणाविणीएसु।।**[75]

साधकस्य आहारः शुष्कः भवति सर्वसम्पत्करीभिक्षावृत्त्या च स जीवनं संचालयति।

## योगस्य लाभाः

योगबिन्दुग्रन्थे योगस्य लाभानां गणना विहिता यथा- योगी अतीन्द्रियविषयाण्यपि प्रत्यक्षं जानाति। यद् अज्ञानिनां कृते परोक्षं भवति तद् योगिभिः प्रत्यक्षं ज्ञायते। योगेन स्थिरता, धीरता, श्रद्धा, मैत्री, जनप्रियत्वं, प्रतिभा, तत्त्वप्रकाशत्वं, आग्रहनिवृत्तिः, द्वन्द्वसहिष्णुता, द्वन्द्वानामभावः, इष्टलाभः, सन्तोषः

क्षमाशीलत्वं, आदेयत्वं, गुरुत्वं, समत्वम् इत्यादय अनेके लाभा अपि अनुभूयन्ते। इत्थं जीवनस्य आत्मिकविकासे महत्त्वपूर्णं योगदानं समुपलभ्यते।

योगशतके योगलब्धीनाम् उल्लेखः प्राप्यते। तत्र प्रोक्तम्- 1- योगानुभावतः पापकर्मणां बन्धो न भवति, आत्मशोधनस्य च लाभो भवति।[76] यदा योगसाधनायाः वृद्धिर्भवति तदा रत्नत्रयस्य संवृद्धिर्जायते। अणिमादि-अष्टसिद्धीनामपि प्राप्तिर्भवति। अणिमा, महिमा, लघिमा, प्राप्तिः, प्राकाम्यम्, ईशित्वं वशित्वञ्चेति अष्टसिद्धयः प्रसिद्धाः वर्तन्ते। आमोस हि-विप्पोस हि-खेलोस हि-जल्लोस हि-आदि-लब्धयोऽपि वर्ण्यन्ते।[77] एतासु लब्धिषु योगिनः स्पर्शमात्रेणापि रोगाः दूरीभवन्ति। योगिनः मल-मूत्र-कफ-देहमलादयोऽपि औषधिरूपेण कार्यं कुर्वन्ति।

हरिभद्रसूरिणः योगसाहित्यस्य अध्ययनेन ज्ञायते यद् -

1- प्राचीनयोगपरम्परायाः अध्ययनं विधाय जैनदर्शने नूतनयोगसाहित्यस्य रचनाकाररूपेण हरिभद्रसूरेः वर्तते महत्त्वपूर्णं योगदानम्।

2- 'मोक्षेण योजनाद् योगः' इति योगस्य लक्षणं प्रदाय जैनदर्शने योगस्य नूतनैव उद्भावना विहिता। यस्यां सर्वविधमोक्षसाधनायाः समावेशो जायते। अन्येषां जैनाचार्याणां कृते अनेन नूतनो मार्गः प्रस्तुतीकृतः।

3- योगस्य विविधप्रकारेण भेदाः विहिताः- 'अध्यात्मं भावना ध्यानं समता वृत्तिसंक्षयः' इति एको विभागः पञ्चयोगानाम्ः स्थानं, वर्णः, अर्थः, आलम्बनम्, अनालम्बनमिति अन्यः पञ्चविधात्मको योगविभागः, इच्छायोगः, शास्त्रयोगः सामर्थ्ययोगः इति अन्यो वर्तते त्रिविधयोगानां योगविभागः। इत्थमेव असौ निश्चय-व्यवहारभेदेन, तात्त्विक-अतात्त्विकभेदेन, आस्रव-अनास्रव भेदेनापि योगस्य निरूपणं करोति। अनेन तस्य प्रतिभायाः अनुमानं कर्तुं शक्यते।

4- केचन नवीना शब्दाः अपि तेन उटटङ्किताः, यथा- अपुनर्बन्धकता, वृत्तिसंक्षयः, स्थानम्, पूर्वसेवा-इत्यादयः।

5- जैनदर्शने आचार्यहेमचन्द्रेण, उपाध्याययशोविजयेन च तस्य अनुसरणं विधीयते।

6- तेन योगस्य यत्प्रतिपादनं विहितं तत पूर्ववर्तियोगविषयकपरम्पराणां अध्ययनं विधाय युक्तिभिः प्रतिपादितम् पतञ्जलि- गोपेश- कालातीतादीनां योगविद्यायाः ज्ञानं तेन विहितमिति तस्य साहित्येन अवगम्यते।

**सन्दर्भग्रन्थाः -**


1. *तथा चान्यैरपि ह्येतद् योगमार्गकृतश्रमैः। संगीतमुक्तिभेदेन यत् गोपेन्द्रमिदं वचः।। - योगबिन्दुः, 100*
2. *माध्यस्थ्यमवलम्ब्यैवमैदम्पर्यव्यपेक्षया। तत्त्वं निरूपणीयं स्यात् कालातीतोऽप्य-दोऽब्रवीत्। - योगबिन्दुः, 300*
3. *कायवाङ्मनःकर्म योगः। -तत्त्वार्थसूत्रम्, 6-1*
4. *शुभः पुण्यस्य। अशुभः पापस्य। -तत्त्वार्थसूत्रम्, 6-3-4*
5. *योगविशिंका, गाथा 1*
6. *योगसूत्रम्, 1-2*
7. *भगवद्गीता, 2-48*
8. *भगवद्गीता, 2-50*
9. *योगशतकम्, 2*
10. *योगशास्त्रम्, 1-15*
11. *योगबिन्दुः, 31*
12. *औचित्याद् वृत्तयुक्तस्य वचनात् तत्त्वचिन्तनम् मैत्रयादिसारमत्यन्तमध्यात्मं तद्विदो विदुः।। - योगबिन्दुः 358*
13. *योगबिन्दुः, 359*
14. *अभ्यासोऽस्यैव विज्ञेयः प्रत्यहं वृद्धिसंगतः। मनःसमाधिसंयुक्तः पौनः पुन्येन भावना।। - योगबिन्दुः, 360*
15. *निवृत्तिरशुभाभ्यासाच्छुभाभ्यासानुकूलता। तथा सुचित्तवृद्धिश्च भावनायाः फलं मतम्। - योगबिन्दुः, 361*
16. *शुभैकालम्बनं चित्तं ध्यानमाहुर्मनीषिणः। स्थिरप्रदीपसदृशं सूक्ष्माभोग- समन्वितम्। - योगबिन्दुः, 362*
17. *खेदोद्वेगक्षेपोत्थान भ्रान्त्यन्यमुद्रुगासङ्गैः। युक्तानि हि चित्रानि प्रबन्धतो वर्जयेत् मतिमान्। - षोडशकप्रकरणम्, 14-3*
18. *द्रष्टव्यम्, योगदीपिका विवरणम् च, षोडशकप्रकरणे वृत्तिद्वयम्, पार्श्वनाथ-विद्यापीठम्, वाराणसी, 2007, 14-3, पृष्ठ 174*
19. *वशिता चैव सर्वत्र भावस्तैमित्यमेव च। अनुबन्धव्यवच्छेद उदकोऽस्येति तद्विदः।। -योगबिन्दुः, 363*
20. *योगबिन्दुः, 364*

21. ऋद्ध्‌यप्रवर्तनं चैव सूक्ष्मकर्मक्षयस्तथा। अपेक्षातन्तुविच्छेदः फलमस्याः प्रचक्षते।।-योगबिन्दुः, 365
22. अन्यसंयोगवृत्तीनां यो निरोधस्तथा तथा। अपुनर्भावरूपेण स तु तत्संक्षयो मतः।।-योगबिन्दुः, 366
23. विकल्पस्पन्दरूपाणां वृत्तीनामन्यजन्मनाम् अपुनर्भावता रोधः प्रोच्यते वृत्तिसङ्‌क्षयः।। - द्वात्रिंशिका, 18-25
24. अतोऽपि केवलज्ञानं शैलेशीसंपरिग्रहः। मोक्षप्राप्तिरनाबाधा सदानन्दविधायिनी।। - योगबिन्दुः, 367
25. द्रष्टव्यः, योगबिन्दुः, 369 एवं 371
26. ठाणुन्नत्थालंबण-रहिओ तन्तम्मि पंचहा एसो। दुगमित्थकम्मजोगो तहा तियं नाणजोगो उ।। - योगविंशिका, 2
27. योगाष्टके वर्णः इति शब्दः प्रयुक्तः, यथा- विशिष्यस्थानव-र्णार्थाऽऽलम्बनैकाग्रय-गोचरः। - अभिधानराजेन्द्रकोशः, चतुर्थभागः पृ- 1625
28. स एव, पृ- 1626
29. देसे सव्वे य तहा नियमेणेसो चरित्तिणो होइ। इयरस्स बीयमित्तं इइ च्चिय केइ इच्छंति।।-योगविंशिका, 3
30. इक्किको य चउद्धा इत्थं पुण तत्तओ मुणेयव्वो। इच्छा पवित्तिथिरसि)भेयओ समयनीई।।-योगविंशिका, 4
31. योगविंशिका, 5-6
32. अणुकंपा निव्वेओ संवेगो होइ तह य पसमुत्ति। एएसिं अणुभावा इच्छाईणं जहासंखं।।-योगविंशिका, 8 9
33. एयं च पीइभत्तागमाणुगं तह असंगया जुत्तं। नेयं चउव्विहं खलु एसो चरमो इवइ जोगो।।-योगविंशिका, 18
34. योगदृष्टिसमुच्चयः, 3
35. शास्त्रयोगस्त्विह ज्ञेयो यथाशक्त्यप्रमादिनः। श्राद्धस्य तीव्रबोधेन वचसाऽविकलस्तथा।।-योगदृष्टिसमुच्चयः, 4
36. योगदृष्टिसमुच्चयः, 5
37. आणाजोगा पुव्वाणुवेहओ चेव नवरंति। - योगशतकम्, 19
38. द्विधाऽयं धर्मसंन्यास-योगसंन्याससंज्ञितः। क्षयोपशमिकाधर्मा योगाः कायादिकर्म तु।। - योगदृष्टिसमुच्चयः, 9

39. योगदृष्टिसमुच्चयः, 10
40. मित्र तारा बला दीप्रा, स्थिरा कान्ता प्रभा परा। योगदृष्टय उच्यन्त अष्टौ सामान्यतस्तु ताः।। - योगदृष्टिसमुच्चयः, 12
41. योगदृष्टिसमुच्चयः, 15
42. योगदृष्टिसमुच्चयः, 17
43. योगदृष्टिसमुच्चयः, 19
44. योगदृष्टिसमुच्चयः, 21-22, 41, 49, 57-58
45. योगदृष्टिसमुच्चयः, 154
46. योगदृष्टिसमुच्चयः, 162-164
47. योगदृष्टिसमुच्चयः, 170-171
48. योगदृष्टिसमुच्चयः, 178-179
49. योगदृष्टिसमुच्चयः, 184
50. यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधय इत्यष्टाङ्गानि।
51. हिंसादिपापेभ्यो देशतः विरतिं कुर्वन्तः देशविरतयः, सर्वतः विरतिं कुर्वन्तश्च सर्वविरतयो भवन्ति।
52. योगबिन्दुः, 72
53. योगबिन्दुः, 86 54- क्षुद्रो लाभरतिर्दीनो मत्सरी भयवान शठः। अज्ञो भवाभिनन्दी स्यान्निष्फलारम्भसंगतः।। - योगबिन्दुः, 87
55. योगबिन्दुः, 136 56- योगबिन्दुः, 178
57. योगशतकम्, 13
58. योगशतकम्, 14
59. योगशतकम्, 15
60. एसो सामाइयसुद्धिभेयओऽणेगहा मुणेयव्वो। आणापरिणइभेया अंते य वीयरागो त्ति।। - योगशतकम्, 16
61. योगशतकम्, 17
62. योगशतकम्, 20
63. योगशतकम्, 25
64. योगशतकम्, 26
65. योगशतकम्, 27, 30-31
66. योगशतकम्, 29, 33-35

*67. योगशतकम्, 37*

*68. योगशतकम्, 39*

*69. योगशतकम्, 40*

*70. योगशतकम्, 44*

*71. योगशतकम्, 48*

*72. योगशतकम्, 50*

*73. योगशतकम्, 52*

*74. योगशतकम्, 66*

*75. योगशतकम्, 79*

*76. योगशतकम्, 83*

*77. योगशतकम्, 84*

# 12

# कालिकापुराणे ब्रह्मचर्यस्य निर्देशः कामस्य निन्दा च

*डॉ. विवेक शर्मा*

पौराणिकवाङ्मये कालिकापुराणस्य विशिष्टं स्थानमस्ति। कालिकापुराणस्य अन्तर्भावः उपपुराणसाहित्ये भवति। उपपुराणमिदं ज्ञानराशिर्वर्तते। कालिकापुराणं शाक्तानां महत्त्वपूर्णः प्रतिनिधिग्रन्थो वर्तते। नीलाचले स्थिता या कामाख्या देवी, सैवाऽत्र पुराणेऽस्मिन् शक्तेः प्रतीकरूपेण वर्णिताऽस्ति। कालिकापुराणस्य विविधाः हस्तलिपयो देशस्य विविधेषु ग्रन्थालयेषूपलभ्यन्ते। डॉ. विश्वनारायणशास्त्रिणा एतस्य विंशतेः हस्तलिपीनामुल्लेखः कृतः।[1] कूर्मपुराणोक्तोपपुराणानां या सूची वर्तते तस्यां सूच्यां कालिकापुराणस्य क्रमः द्वादशे क्रमाङ्के वर्तते।[2] एवमेव देवीभागवते कालिकापुराणस्य क्रमः दशमः[3]।

कालिकापुराणे विविधदार्शनिकतत्त्वानामुपस्थापनमस्ति, येषु योगदर्शनं मुख्यतया प्रतिपादितोऽस्ति। पात्ञ्जलयोगदर्शने अष्टाङ्गानि वर्तन्ते, येषु अष्टाङ्गेषु यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधीनां ग्रहणमस्ति।[4] एतेषामष्टाङ्गानां विवरणं कालिकापुराणे उपलभ्यते। अष्टाङ्गेषु प्रथमाङ्गं भवति यमः, यस्योपाङ्गानि भवन्ति अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाः।[5] येषु ब्रह्मचर्यं प्रमुखमस्ति।

उपपुराणेऽस्मिन् ब्रह्मचर्यस्य निर्देशः सविस्तरमस्ति। वस्तुतस्तु पञ्चसु यमेषु ब्रह्मचर्यस्य महत्त्वपूर्णं स्थानमस्ति। मनसा वाचा कर्मणा मैथुनत्यागमेव ब्रह्मचर्यमस्ति।[6] कालिकापुराणे ब्रह्मचर्यस्य पर्याप्तोल्लेखरुपलभ्यते, यथा द्वाविंशेऽध्याये वर्णितं यत् महर्षिः वशिष्ठः ब्रह्मचर्ययुक्त आसीत्।[7] वर्णितञ्च पुराणेस्मिन् यत् ब्रह्मचर्यमनुसृत्य सम्भोगरहितः शम्भुः तपश्चर्यामाचरत्।[8]

कालिकापुराणानुसारं ब्रह्मचर्येण वीर्यलाभो भवति।[9] ब्रह्मचर्ये वीर्यरक्षणं मुख्यं भवति अतः वीर्यशब्दस्योपलब्धिः कालिकापुराणेऽपि भवति।[10] पातञ्जलयोगप्रदीपे स्पष्टेन वाक्येन कथितं यत् ''मरणं बिन्दुपातेन, जीवनं बिन्दुधारणम्''[11]। तैत्तिरीयोपनिषद्यपि निर्दिष्टं यत् ब्रह्मचारिणः इन्द्रियाणि दमयन्तु शमयन्तु च, इत्युक्ते इन्द्रियनिग्रहं कुर्वन्त्विति।[12]

एवमेव ब्रह्मचर्यस्य पालने कालिकापुराणस्यापि सम्मतिर्वर्तते। अत एवास्मिन् विषये कथितं कालिकापुराणे यत् वीर्यक्षयकारकपदार्थाः त्यक्तव्याः।[13] सनातनहिन्दुसंस्कृतेराधारग्रन्थो वर्तते मनुस्मृतिः। मनुस्मृतावपि कामभावस्य पर्याप्तनिन्दा कृताऽस्ति।[14] भावोऽयं वर्तते यद्योगिनः रेतसः (वीर्यस्य) अधोगमनं स्खलनं वा न भवेदिति, अपितु ऊर्ध्वगमनं भवेदेव। अत एवोपपुराणेऽस्मिन्नपि योगिनाङ्कृते ऊर्ध्वरेतसः इति विशेषणं प्रयुक्तम्।[15] अथ चान्यस्मिन् स्थले साक्षाद्योगिमहादेवाय ऊर्ध्वरेतेत्यस्य विशेषणस्य प्रयोगः विहितः।[16]

ब्रह्मचर्यस्य पालनेन, इन्द्रियविकारेण, कामभावेन वा वीर्यनाशो भवति। मनुनाऽप्युक्तं यत् साधकः वीर्यं कदापि न क्षरेत् एवञ्च कामेन वीर्यस्य ह्रासो भवति।[17] वीर्यनाशस्य कारणमिदं कालिकापुराणेऽपि वर्णितमस्ति। ऐन्द्रियविकारस्योल्लेखः कालिकापुराणे बहुत्रोपलभ्यते। कामभावस्य प्रादुर्भावस्य प्रमुखं कारणं वर्तते इन्द्रियविकारः। वर्णितञ्चोपपुराणेऽस्मिन् यत् कामस्य प्रभावेन चन्द्रशेखरस्येन्द्रियाणि विकारग्रस्तान्यभवन्, यस्मात् सः गिरिजां सकाममपश्यत्।[18] अपि च सन्ध्यायाः अलौकिकसौन्दर्यं दृष्ट्वा मरीच्यादयः ऋषयः इन्द्रियविकारमनुभूतवन्तः आसन्।[19] कथितञ्चोपपुराणेऽस्मिन् यद्यदा ब्रह्मा दक्षकन्यां कामदृष्ट्या मुहुर्मुहुः पश्यति, तदा तस्मिन्निन्द्रियविकारस्योत्पत्तिर्भवति।[20] येन ब्रह्मणः वीर्यः भूमावपतत्।[21] अथ च कालिकापुराणे वर्णितं यत् ब्रह्मा सतीं सकाममपश्यत् यस्मात् सः त्यक्ततेजः जातः।[22] कालिकापुराणकारस्य मतमस्ति यत् ऐन्द्रियविकारस्य समस्यायाः निदानं योग एव वर्तते यतो हि योगिनः एव नियतेन्द्रियाः भवन्ति।[23]

यथा योगदर्शने अब्रह्मचर्यस्य कामुकतायाश्च निन्दा कृताऽस्ति, तथा कालिकापुराणेऽपि कामभावस्य घोरनिन्दा कृताऽस्ति। अतः शिवः ब्रह्माणं प्रत्यकथयत् यत् भवति कामभावस्य प्रादुर्भावः नोचितः।[24] अथ चोपपुराणेऽस्मिन् स्पष्टतया निर्दिष्टमस्ति यत् साधकः ब्रह्मचारी जितेन्द्रियश्च भवेत्[25]।

कालिकापुराणस्याभिमते मनसि कामभावस्योत्पत्तिः नोचिता। अत एव अरुन्धती विवाहवर्णनमित्यस्मिन्नध्याये यदा दर्शनमात्रेणैवारुन्धतीवशिष्ठयोः परस्परमाकर्षणमुत वा स्पृहा सञ्जाता[26], तदा अरुन्धत्याः मनः मदनेन प्रेरितम्। तस्मिन् समये सा धैर्यमवलम्ब्य मनसः नियन्त्रणमकरोत्[27]। ‘‘एवमेवास्मिन्नेव प्रसङ्गे वशिष्ठोऽपि धैर्यमवलम्ब्य स्वात्मानं धारयामास[28]। ‘एवम्प्रकारेण तौ धैर्येण मनसः आत्मनियन्त्रणमकुरुताम्[29]’’।

द्विचत्वारिंशेऽध्यायेऽपि कामभावनियन्त्रणसम्बद्धाख्यानमुपलभ्यते यस्यानुसारं शम्भवे कामः प्रीतिकरः नाऽसीत्[30]। अत एव कामभावस्योत्पत्तेरनन्तरं सर्वप्रथमं तु महादेवः स्वात्मानं विस्मयेन पृच्छति यत् कथं मया कामः प्रकटितः, किमर्थं च मयि सङ्गमेच्छा उत्पन्ना जाता[31]? स्वस्यैन्द्रियविकारं शम्भुः यदा ज्ञातवान् तदा शम्भुः स्वात्मस्वरूपं स्मरति स्वात्मानञ्च संयमितं करोति, इत्युक्ते विकारग्रस्तेन्द्रियाणां निग्रहं करोति शम्भुः।[32]

अनपेक्षितकामभावो यद् भवति तस्य निन्दायाः प्रसङ्गोऽप्युपलभ्यते कालिकापुराणे, तद्यथा सन्ध्यातपश्चरणमित्यस्मिन्नध्याये सन्ध्या कामविकारस्योत्पत्तिरूपकदोषस्य प्रायश्चित्तार्थं स्वात्मानमग्नौ होमयितुमुद्यता भवति। वस्तुतः सन्ध्या जन्मनः एव कामयुक्ताऽऽसीत् अतः सा कथयति यत् मम शरीरस्य होमात् परं कश्चिदपि जन्मनः सकामः न भविष्यति। एवञ्च स्वदेहहोमेन इह भूतले मर्यादां स्थापयामि[33]। अनेन क्रमेण तपसा विष्णुं प्राप्य सन्ध्या वरमिच्छति यत् न जन्मनः कश्चिदपि सकामो भवतु, अपित्वस्मिन् भूतले जनाः क्रमेणैव सकामाः भवन्तु[34]। अस्मिन्नेव क्रमे सन्ध्या प्रार्थयति यत् मम सकामा दृष्टिः पतिं विहाय कुत्रचिन्न पतेत्[35]। एवञ्चानपेक्षितकामस्य निन्दायां सन्ध्या कथयति यद्यः परपुरुषः मां व्यभिचारदृष्ट्या अथवा सकामं द्रक्ष्यति, तस्य पौरुषं नश्येत्[36]।

**कालिकापुराणे वर्णिताः कामभावस्य दुष्परिणामा :-** कालिकापुराणे कामस्य दुष्परिणामाः विशेषतया स्पष्टतया च प्रतिपादिताः। अत एवोपपुराणेऽस्मिन् शिवेनोक्तं यत् कामस्य दुष्प्रभावस्य विस्मरणं कदापि न करणीयम्[37]। वर्णितञ्चोपुराणेऽस्मिन् यत् कामबाणेन ऋषीणां चित्तं विलोडितं भवति, कामविकारस्योत्पत्तेः कारणात् ब्रह्मणः उपहासः अभवत्। सन्ध्यायाः लज्जायाः कारणमपि काम एवासीत्। वस्तुतः कामः तादृशः भावः यः मुनीन् मुहुर्मुहुर्मोहयति[38]। कामभावस्य दुष्प्रभावं प्रतिपादयति शिवः यदनेन कामेन धैर्यस्य

नाशो भवति[39]। कथितञ्चोपपुराणेऽस्मिन् यद्ये मूढाः नारीषु रमन्ते ते एव द्वन्द्वेन मुह्यन्ते[40]। एकविंशेऽध्याये स्पष्टतया उद्घोषितं यद्यः सदैव (दिवारात्रं सन्ध्यायां च) वनितासु रतो भवति अथवा सुरतसम्भोगौ यः सेवते, तस्मिन् यक्ष्मायाः निवासो भवति इत्युक्ते भोगी जनः क्षयरोगेण ग्रस्तो भवति[41]। वर्णितञ्चोपपुराणेऽस्मिन् यद्यः कश्चित् रोगी सत्यपि सततं मैथुनमाचरति स निश्चयेन क्षयरोगेण पीडितो भवति[42]। रोगस्यास्य प्रभावोऽपि प्रतिपादयति कालिकापुराणकारः यदनेन रोगेण क्षीणताऽऽयाति[43]। अत एव साररूपेण कालिकापुराणे निर्दिष्टं यत् इन्द्रियविकार-स्याभावेनैवामरत्वं प्राप्यते[44]।

**सन्दर्भग्रन्थाः -**


- *कालिकापुराणम्, सम्पादक : आचार्य मृत्युञ्जय त्रिपाठी, नवशक्ति प्रकाशन चौकाघाट, वाराणसी, प्रथम संस्करण 2008*
- *योग-दर्शन, गीताप्रेसगोरखपुरम् संवत् 2067*
- *पातञ्जलयोगप्रदीप, श्रीस्वामी ओमानन्दतीर्थः, गीताप्रेसगोरखपुरम, विक्रमी संवत् 2072*
- *मनुस्मृतिः, डॉ. रामचन्द्रवर्मा, विद्याविहारः, दरियागञ्ज.दिल्ली, 1997*
- *उपनिषत् समुच्चयः, पं. भीमसेन शर्मा, हरियाणा साहित्य संस्थान, गुरुकुल झज्जर, प्रथम संस्करणम् 2000*
- *ईशादि नौ उपनिषद (66), हरिकृष्ण गायेन्दका, गीताप्रेसगोरखपुरम्, विक्रमी संवत् 2008*
- *छान्दोग्योपनिषद् (582), गीता प्रेस गोरखपुरम,विक्रमी संवत् 2069*
- *श्री गरुड़महापुराणम्, नागशरणसिंहः, नाग-पब्लिशर्ज-जवाहरनगरम, दिल्ली, 1985*


1. *उपपुराणदिग्दर्शनम् (डॉ. लीलाधरवियोगी, आई.बी.ए. पब्लिकेशन्स प्रकाशनम्, अम्बाला-छावनी, प्रथमसंस्करणम् 2007), पृष्ठम् 324, पङ्क्तिः 18*
2. *आद्यं सनत्कुमारोक्तं नारसिंहमतः परम्। तृतीयं स्कान्दमुद्दिष्टं कुमारेण तु भाषितम्।।*
   *चतुर्थं शिवधर्माख्यं साक्षान्नन्दीशभाषितम्। दुर्वाससोक्तमाश्चर्यं नारदीयमतः परम्।।*
   *कापिलं वामनञ्चैव तथैवोशनसेरितम्। ब्रह्माण्डं वारुणञ्चैव कालिकाह्ययमेव च।।*
   *माहेश्वरं तथा साम्बं सौरं सर्वार्थसञ्चयम्। पराशरोक्तं मारीचं तथैव भार्गवाहम्।।*
   *कूर्मपुराणम्, 1/17 - 20*

3. तथैवोपपुराणानि शृण्वन्तु ऋषिसत्तमाः । सनत्कुमारं प्रथमं नारसिहं ततः परम् ।। नारदीयं शिवं चौव दौर्वाससमनुत्तमम् । कापिलं मानवं चौव तथा चौशनसंस्मृतम् ।। वारुणं कालिकाख्यं च साम्बं नन्दिकृतं शुभम् । सौरं पाराशरं प्रोक्तमादित्यं चातिविस्तरम् ।। माहेश्वरं भागवतं वासिष्ठं च सविस्तरम् । एतान्युपपुराणानि कथितानि महात्मभिः ।। देवीभागवतपुराणम्, प्रथमः भागः, 3/13-16

4. यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि ।। योगदर्शनम्, साधनपादः 29

5. अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः । योगदर्शनम्, साधनपादः 30

6. कर्मणा मनसा वाचा सर्वावस्थासु सर्वदा ।
सर्वत्र मैथुनत्यागं ब्रह्मचर्य्यं प्रचक्षते ।। गरुडपुराणम्, आचारकाण्डः, 238/6

7. शरीरधृग्ब्रह्मचर्यस शं तं जटाधरम् । कालिकापुराणम्, 22/22

8. शम्भुः सम्भोगरहितो देवमानेन वत्सरान् ।
अयुतानि तपस्तेपे सोऽपि स्थानं न चैक्षत ।। कालिकापुराणम्, 32/18

9. ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः । योगदर्शनम्, साधनपादः 38

10. केचित्तद्वीर्यजातस्य केचिन्मेंऽशभवस्य वै । कालिकापुराणम्, 9/28

11. पातञ्जलयोगप्रदीपः, साधनपादः,सूत्रम् 30,व्याख्याभागः, पृष्ठम् 419, पङ्क्ति : 26

12. दमायन्तु ब्रह्मचारिणः स्वाहा ।
शमायन्तु ब्रह्मचारिणः स्वाहा ।। तैत्तिरीयोपनिषद्, शिक्षावल्ली, चतुर्थोऽनुवाकः 2

13. कांस्य-राजतपात्रस्थं तोयं नद्याश्च वर्धनम् ।
मूत्रवृद्धिकरं वीर्यक्षयकारि विवर्जयेत् ।। कालिकापुराणम्, 88/63

14. न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ।। मनुस्मृतिः, 2/94

15. त्वं विद्या त्वं चोर्ध्वरेतसाम् । कालिकापुराणम्, 41/27

16. तमूर्ध्वरेतसं शम्भुं सैव प्रच्युतरेतसम् । कालिकापुराणम्, 42/88

17. एकः शयीत सर्वत्र न रेतः स्कन्दयेत्क्वचित् ।
कामाद्धि स्कन्दयन्रेतो हिनस्ति व्रतमात्मनः ।। मनुस्मृतिः, 2/180

18. संहिते पुष्पबाणे तु गिरिजां चन्द्रशेखरः ।
जातेन्द्रियविकारः सन् जिघृक्षुः सङ्गमेऽभवत् ।। कालिकापुराणम्, 42/15619.

19. ततस्ते मुनयः सर्वे मरीच्यत्रिमुखा अपि ।
दक्षाद्याश्च द्विजश्रेष्ठाः प्रापुर्वैकारिकेन्द्रियम् ।। कालिकापुराणम्, 2/33
20. मुहुर्मुहुस्तदा ब्रह्मा पश्यति स्म सतीमुखम् ।
तदेन्द्रियविकारञ्च प्राप्तवानवशः पुनः ।। कालिकापुराणम्, 11/28
21. अथ तस्य पपाताशु तेजो भूमौ द्विजोत्तमाः । कालिकापुराणम्, 11/29
22. साभिलाषः कथं ब्रह्मा सतीं समवलोकयत् ।
अभवत्त्यक्ततेजास्तु ततो हन्मि तागसम् ।। कालिकापुराणम्, 11/38
23. सततं चिन्त्यमानस्य योगिभिर्नियतेन्द्रियैः । कालिकापुराणम्, 21/9
24. अहो ब्रह्मन् अत्र कथं कामभावाः समुद्गता ।
दृष्ट्वा स्वतनयां नैतद्योग्यं वेदानुसारिणाम् ।। कालिकापुराणम्, 2/38
25. अष्टम्यां शुक्लपक्षस्य ब्रह्मचारी जितेन्द्रियः ।। कालिकापुराणम्, 75/9
26. तयोर्दर्शनमात्रेण ववृधे हृच्छयो महान् ।
परस्परं तौ स्पृहयाञ्चक्रतुश्च प्रजापते ।। कालिकापुराणम्, 23/83
27. अथ धैर्यं समालम्ब्य तथा मेधातिथेः सुता ।
आत्मानं धारयामास मनश्च मदनेरितम् ।। कालिकापुराणम्, 23/43
28. वशिष्ठोऽपि महातेजा धैर्यमालम्ब्य चात्मनः ।
मनः संस्तम्भयामास मदनोन्मथितं ततः ।। कालिकापुराणम्, 23/44
29. ततो धैर्यात्तु संस्तभ्य मनोजं तौ सुदुःखितौ ।। कालिकापुराणम्, 23/84
30. प्रीतये यस्य न रतिर्न कामो यन्मनोभवः । कालिकापुराणम्, 46/29
31. कथं विकृतकामोऽहमनिच्छन्निव साम्प्रतम् ।
केनापि चाकृष्ट इव चिकीर्षुः सङ्गमोद्भवम् ।। कालिकापुराणम्, 42/161
32. अथ संस्मृत्य संयम्य निगृह्य विकृतिं तदा ।
इन्द्रियस्य महादेवः सहसेदं व्यचिन्तयत् ।। कालिकापुराणम्, 42/158
33. करिष्याम्यस्य पापस्य प्रायश्चित्तमहं स्वयम् ।।
आत्मानमग्नौ होष्यामि वेदमार्गानुसारतः ।
किन्त्वेकां स्थापयिष्यामि मर्यादामिह भूतले ।।
उत्पन्नमात्र न यथा सकामाः स्युः शरीरिणः ।। कालिकापुराणम्, 19/75-76
34. यदि देव प्रसन्नोऽसि तपसा मम साम्प्रतम् । व्रतस्तदायं प्रथमो वरो मम विधीयताम् ।। उत्पन्नमात्र देवेश प्राणिनोऽस्मिन्नभूस्तले । न भवन्तु क्रमेणैव सकामाः सम्भवन्तु वै ।। कालिकापुराणम्, 22/73-74

35. सकामा मम दृष्टिस्तु कुत्रचिन्न पतिष्यति।
ऋते पतिं जगन्नाथ सोऽपि मेऽति सुकृत्तरः।। कालिकापुराणम्, 22/76

36. यो द्रक्ष्यति सकामो मां पुरुषस्तस्य पौरुषम्।
नाशं गमिष्यति तदा स तु क्लीबो भविष्यति।। कालिकापुराणम्, 22/77

37. कथन्तु काममात्रेण तत्ते विस्मारितं विधे।। कालिकापुराणम्, 2/39

38. तस्यां च चलितं चित्तं कामबाणविलोडितम्। ऋषीणां प्रेक्षतां तेषां मानसानां महात्मनाम्।। भर्गस्य वचनं श्रुत्वा सोपहासविधिं प्रति। आत्मानश्चलचित्तत्व-ममर्यादमृषीन् प्रति।। कामस्य तादृशं भावं मुनिमोहकरं मुहुः। दृष्ट्वा सन्ध्या स्वयं तत्र त्रपामायाति दुःखिता।। कालिकापुराणम्, 19/63-65

39. धैर्ये जागरितं ब्रह्मन् समस्तं चतुरानन।
कथं क्षुद्रेण कामेन तत्ते विघटितं विधे।। कालिकापुराणम्, 2/40

40. नारीषु मूढो रमते द्वन्द्वेनापि च मूह्यते। कालिकापुराणम्, 40/141

41. सर्वदा यो दिवारात्रं सन्ध्यायां वनितारतः।
सेवते सुरतं तस्मिन् राजयक्ष्मन् वसिष्यसि।। कालिकापुराणम्, 21/49

42. प्रतिशाय-श्वासकास-संयुक्तो मैथुनं चरेत्।
स ते प्रवेश्यः सततं श्लेष्मणश्च तथाविधः।। कालिकापुराणम्, 21/50

43. क्षीणत्वं भवतः कृत्यं ततस्वं विषयं कुरु। कालिकापुराणम्, 21/52

44. अवश्यममरत्वाय गच्छन्त्यविकलेन्द्रियाः। कालिकापुराणम्, 19/43

# 13

# नाट्यसर्गालोके उत्तररामचरितस्यानुशीलनम्

*डॉ. राघवेन्द्र शर्मा*

सृज्धातुना घञ्प्रत्यययोगेन सर्गः शब्दो निष्पद्यते। तस्य स्वभावस्त्यागो निश्चयो महाकाव्यस्याध्यायः सृष्टिश्चेति पञ्चार्था भवन्ति। तद्यथोक्तम-मरकोशकारेण-

**सर्गः स्वभावनिर्मोक्षनिश्चयाधयायसृष्टिषु।**[1]

सर्गशब्देनात्र सृष्ट्युपत्तेर्वर्णनमभिप्रेतमस्ति। सृष्ट्युत्पत्तेर्मूलं सर्वप्रथमं वैदिकवाङ्मये प्राप्यते। वैदिकवाङ्मये कुत्रचित् हिरण्यगर्भात् सृष्टिरुत्पद्यते। तद्यथा -

**हिरण्यगर्भः समवर्तग्रे भूतस्य जातः पतिरेक आसीत्।**
**स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधम।।**[2]

कुत्रचिद्विराट्पुरुषादेव सृष्टिप्रक्रिया वर्तते।[3] कुत्रचिन्नासदीयसूक्त-माध्यमेन सृष्टिरचना वर्ण्यते वैदिकर्षिभिः।[4] सर्गविमर्शो मुख्यतमो विषयो वर्तते दर्शनशास्त्राणाम्। साङ्ख्यशास्त्रानुसारेण प्रकृतिपुरुषयोः संयोगादेव सर्ग उच्यते। तद्यथा -

**पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य।**
**पङ्ग्वन्धावदुभयोरपि संयोगस्तत्कृतः सर्गः।।**[5]

एवमेवान्येषु वेदान्तादिषु दर्शनशास्त्रेषु सर्गस्य बहुविधविवेचनं प्राप्यते। पुराणस्य पञ्चलक्षणेषु प्रथमस्थानीयो वर्तते सर्गः। तद्यथा-

**सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।**
**वंशानुचरितं चेति पुराणं पञ्चलक्षणम्।।**[6]

अत्रापि सर्गशब्देन सृष्टिप्रक्रियाया एव वर्णनं प्राप्यते। तद्यथा-

**अव्याकृतगुणक्षोभान्महस्त्रिवृतोऽहमः।**
**भूतामात्रेन्द्रियार्थानां सम्भवः सर्ग उच्यते।।**[7]

एतेषु सर्वेषु स्थलेषु पञ्चमहाभूतेभ्यो जायमाना सृष्टिरेव वर्णिता। सृष्टिरियं भौतिक्युच्यते। अस्या उत्पत्तिकर्ता प्रजापतिर्ब्रह्मा वर्तते।

संस्कृतवाङ्मये एका अपरा सृष्टिः स्वीक्रियते आचार्यैः सास्ति काव्यसृष्टिः। अस्या विवेचनं प्रायः प्रमुखैः काव्यशास्त्रिभिः क्रियते। इमां काव्यसृष्टिं वर्णयन् ध्वन्यालोककार आचार्यानन्दवर्धनः अस्याः प्रजापतिं कविं स्वीकरोति। कविः स्वरुच्यनुसारं काव्यलोकं रचयति। तद्यथा -

**अपारे काव्यसंसारे कविरेकः प्रजापतिः।**
**यथास्मै रोचते विश्वं तथेदं परिवर्तते।।**
**शृङ्गारी चेत्कविः काव्ये जातं रसमयं जगत्।**
**स एव वीतरागश्चेन्नीरसं सर्वमेव तत्।।**
**भावानचेतनानपि चेतनवच्चेतनानचेतनवत्।**
**व्यवहारयति यथेष्टं सुकविः काव्ये स्वतन्त्रता।।**[8]

काव्यप्रकाशकारः मम्मटाचार्यः धातुः सृष्टिरपेक्षया कविसृष्टिं श्रेष्ठां मन्यते। तन्मतेन कविसृष्टिर्नियतिकृतनियमरहिता ह्लादैकमयी अनन्यपरतन्त्रा नवरसरुचिरा वर्तते।। तद्यथा -

**नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम्।**
**नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति।।**[9]

अनेन प्रमाणीक्रियते यत् काव्यसर्गः धातुः सर्गात् श्रेष्ठः। काव्यसर्गोऽयं दृश्यश्रव्यभेदाभ्यां द्विधा विभज्यते। तद्योक्तं साहित्यदर्पणकारेण विश्वनाथेन -

**दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम्।।**[10]

नाट्यसर्गः- दृश्यकाव्यमेव नाट्यसर्ग उच्यते। आचार्यभरतमुनिमतेन नाट्यं त्रैलोक्यस्य भावानुकरणं विद्यते। तद्यथा -

**त्रैलोक्यस्यास्य सर्वस्य भावानुकीर्तनम्।**[11]

लोकवृत्तानुकरणेन[12] नाट्यसर्गधातुवद् भवति। किन्तु धातुः सर्गापेक्षया नाट्यं धर्म्यम् अर्थ्यं यशस्यं सोपदेशं ससङ्ग्रहं सर्वकमानुदर्शकं सर्वशास्त्रार्थसम्पन्नं सर्वशिल्पप्रवर्तकं पञ्चमं वेदं[13] हितोपेशजननं धृतक्रीड़ासुखादिकृत्[14] सर्वोपदेशजननं विश्रान्तिजननं लोकोपदेशजननं विनोदकरणादिकं च भवति।[15] अतएवं सर्वेषु काव्यप्रभेदेषु नाटकं सर्वश्रेष्ठं स्वीकियते विद्वद्भिः। तद्यथा -

काव्येषु नाटकं रम्यम्।

संस्कृतसाहित्ये सर्वेषु नाटककारेषु सर्वोपरि स्थानं भवभूतेरस्ति।[16] भवभूतिविरचितान त्रीणि रूपकाणि विश्वप्रसिद्धानि सन्ति। रामस्य महावीरत्वद्योतकं वीररसप्रधानं महावीरचरितं रामस्य उत्तरचरित्रोपस्थापकं करुणरसप्रधानं उत्तररामचरितं लोककथाश्रितं प्रकरणं शृङ्गाररसप्रधानं मालतीमाधवं प्रकरणम्। एतेषु त्रिषु रूपकेषु उत्तररामचरितं सर्वश्रेष्ठम्।[17] अत एवात्र नाट्यसर्गालोके उत्तररामचरितस्यानुशीलनं प्रस्तूयते।

नाट्यसर्गस्य त्रीणि तत्त्वानि प्रमुखानि भवति। वस्तु नेता रसस्तेषां भेदकः।[18] इत्येषामेव मग्रदिशा समीक्षणं विद्यते।

**वस्तुसर्गः -** महाकविभवभूतिः प्रजापतिरिव आदिकविवाल्मीकिविरचितरामायणात् मूलकथां स्वीकृत्य उत्तरामचरिताख्यं नूतनां नाट्यसृष्टिं करोति। प्रजापतिकविरयं मौलिकरामकथायां प्रसङ्गानुकूलं बहुविधं परिवर्तनं कृत्वा नवीनं वस्तु सृजति। तद्यथा -

रामायणस्य दुःखान्तकथां स्वीकृत्य सुखान्तरूपे समुपस्थापनेन प्रथमाङ्के चित्रवीथीकल्पनात्वेन पूर्वकथायाः पुनरावर्तनेन शम्बूककथायां नाट्यानुरूपं परिवर्तनं कृत्वा द्वितीयाङ्के प्रयोगेण तृतीयाङ्के छायासीतायाः सर्गेण चतुर्थाङ्के अरुन्धतीवसिष्ठजनककौशल्यादीनां वाल्मीक्याश्रमे समुपस्थापनेन सप्ताङ्के गर्भाङ्कस्य सृष्ट्यादिभि भवभूतेः वस्तुसर्गविषयकं कौशलं प्रमाणितं भवति।

**पात्रसर्गः-** रामायणस्य दुःखान्तकथां स्वीकृत्य सुखान्तरूपे समुपस्थापनेन प्रथमाङ्के वित्रवीथीकल्पनात्वेन पूर्वकथायाः पुनरावर्तनेन शम्बूककथायां नाट्यानरूपं परिवर्तनं कृत्वा द्वितीयाडके प्रयोगेण तृतीयाडके छायासीतायाः सर्गेण चतुथाङ्के अरुन्धतीवशिष्ठजनककोशल्यादीनां वाल्मीक्याश्रये समुपस्थापनेन सप्तमाडके गर्भाडकस्य सृष्ट्वावदिभिः भवभूतेः वस्तुसर्गविषयकं कौशलं प्रमाणितं भवति।

**स्नेहं दयां च सौख्यं च यदि वा जानकीमपि।**
**आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा।।**[19]

किन्तु महाकवि तृतीयाङ्के पतिरूपरामस्य सृष्टिं करोति। तत्र रामः सीतापरित्यागविषयकं हृदयविदारकम् असह्यं कष्टमनुभूय वासन्तीसंवादमाध्यमेन परिहृदयस्य मनोव्यथां प्रदर्शयति। तद्यथा -

**अनिर्भिन्नो गभीरत्वादन्तर्गूढधनव्यथः।**
**पुटपाकप्रतीकाशो रामस्य करुणो रसः।।**[20]

उत्तररामचरितस्य नायिका सीता स्वीया वर्तते। प्रजापतिब्रह्मणा भौतिकलोके भूतमयी सीता रचिता। किन्तु प्रजापतिमहाकविभवभूतिना उत्तररामचरितनाट्यलोके छायासीतायाः सृष्टिः कृता। अनया सृष्ट्या सीतायाः परित्यागकोशं व्यथितहृदयं शान्तिमधिगच्छति। अनेनैव भवभूतेः उत्तररामचरितस्य पात्रसर्गविषयकं वैशिष्ट्यं प्रमाणितं भवति।

**रससर्गः -** रसोभवति काव्यस्य आत्मा। नाटके श्रृङ्गारो वीरो वा अङ्गीरसो भवेत्। इत्युच्यते दशरूपककारेण आचार्यधनञ्जयेन -

**एको रसोडगी कर्तव्यो वीरः श्रडगार एव वा।**[21]

महाकविभवभूतिः इमां परम्परामतिकम्य उत्तररामचरिते अडगीरसत्वेन करुणस्य सृष्टिं करोति। अयमेव निमित्तभेदाद् भिन्नः पृथक्-पृथक् विवर्तान् आश्रयते। अद्यथा -

**एको रसः करुण एव निमित्तभेदा -**
**द्भिन्नः पृथक्पृथगिवाश्रयते विवर्तान्।**
**आवर्तबुद्बुदतरङ्गविकारान् -**
**नम्भो यथा सलिलमेव हि तत् समस्तम्।।**[22]

अत्र आद्योपान्तं करुणरसस्य परिपाको दृश्यते। तत्र करुणरसप्रसङ्गे वज्रस्य हदयं दलति ग्रावा अपि रोदिति। तद्योक्तं तेन -

**जनस्थाने शून्ये विकलकरणैरार्षचरितै -**
**रपिग्रावा रोदित्यपि दलति वज्रस्य हृदयम्।।**[23]

भवभूतिः करुणरसं मूर्तरूपे सृजति। अथ च सीता करुणस्य मूर्तिः मन्यते। तद्यथोच्यते महाकविना -

**परिपाण्डुदुर्बलकपोलसुन्दरं दधति विलोलकबरीकमाननम्।**
**करुणस्य मूर्तिरथवा शरीरिणी विरहव्यथेव वनमेति जानकी।।**[24]

भवभूतेः करुणरससर्गविषयकं वैशिष्ट्यं गोवर्धनाचार्येण प्रमाणीक्रियते। तद्यथोक्तं तेन -

**भवभूतेः सम्बन्धात् भूधरभूरेव भारती भाति।**
**एतत्कृतकारुण्ये किमन्यथा रोदिति ग्रावा।।**[25]

एवमेव महाकविरसौ संवादयोजनावसरे प्रकृतिचित्रणे आदर्शदाम्पत्य-निरूपणे नूतनप्रयोगम् अभिनवचिन्तनं अहर्निशं प्रस्तौति। इत्यादिभिः प्रसङ्गे उत्तररामचरिते सर्गविषयकं वैशिष्ट्यमत्र विमृश्यते।

**सन्दर्भग्रन्थाः -**


1. *अमरकोशः 3.3.22*
2. *ऋग्वेदः 10.121.1*
3. *ऋग्वेदः 10.90*
4. *ऋग्वेदः 10.129*
5. *सांख्यकारिका 21*
6. *विष्णुपुराणम्*
7. *भागवतपुराणम् 12.7.11*
8. *ध्वन्यालोकः (वृत्ति) 3.43*
9. *काव्यप्रकाशः 1/9*
10. *साहित्यदर्पणम् 6.1*
11. *नाट्यशास्त्रम् 1.107*
12. *तत्रैव 1.112*
13. *तत्रैव 1.14.15*
14. *तत्रैव 1.113*
15. *तत्रैव 1. 114. 115. 116. 123*
16. *कवयः कालिदासाद्या भवभूतिर्महाकविः ।*
17. *उत्तरे रामचरिते भवभूतिर्विशिष्यते ।*
18. *दशरूपमकम्*
19. *उत्तररामचरितम 1.12*
20. *उत्तररामचरितम् 3.1*
21. *दशरूपकम् 3.33*
22. *उत्तररामचरितम् 3.47*
23. *तत्रैव 1.28*
24. *तत्रैव 3.5*
25. *आर्यासप्तशती 1.36*

# 14

# उत्तररामचरिते प्रतिपादितं जीवनदर्शनं : एकमनुशीलनम्

*डॉ. तरुणकुमार शर्मा*

विदधाति संस्कृत साहित्ये अप्रतिमं स्थानं संस्कृतसुरभारत्याः वरदपुत्रः नाट्यकलायाः विशदचित्रकारः करुणरसाचार्यः महाकवि भवभूतिः। सः त्रीणि नाटकानि अलिखत् मालतीमाधवं, महावीरचरितं उत्तररामचरितञ्च। त्रिषु नाटकेषु 'उत्तररामचरितम्' भवभूतेः प्रतिभायाः चूडान्तनिदर्शनमस्ति। 'उत्तररामचरितम्' करुणरसप्रधान-नाटकत्वात् सम्पूर्णनाट्यजगति स्वकीयमेकं पृथगेव वैशिष्ट्यपूर्णं स्थानं विदधाति। नाटकमेतत् महाकवेः भवभूतेः अक्षयकीर्तेः स्तम्भः विद्यते। सहृदयकविसमीक्षकैस्तु अस्य विषये एतावदपि कथितम् - ''उत्तररामचरिते भवभूतिर्विशिष्यते।''

उत्तररामचरितं नाम भवभूतेर्लोकोत्तरत्वं संस्पृशन्त्या विमलया प्रतिभाया परिरचितं भगवतो रामचन्द्रस्य पुटपाकप्रतीकाशं करुणरसं विदधत् सहृदयहृदयाह्लादिनाट्यरत्नं किञ्चन। जीवनदर्शनं नाम सिद्धान्तव्यवहारयोर्मञ्चे जीवनस्य सर्वविधानुशीलन-पर्यालोचनानुभवपुरस्सरं समुच्छलितं तद्रहस्यविच्छित्या व्यञ्जनावचः सत्यम्। विशिष्टोऽयं संयोगो यद्रूपकेष्वन्यतमेऽस्मिन् रूपकेऽनुपद मभिभासते जीवनदर्शनम्। जीवनं तु सुखदुःखस्वभावं तत्राप्यधिकतरं दुःखातिरेकिद्वन्द्वात्मकं भवति वस्तुतः। तथ्यमिदमुत्तररामचरिते सप्रमाणं पुष्टिमश्नुते सीतारामयोर्जीवनस्पन्दनतः।

प्रकृतेऽस्मिन्नाटके सैद्धान्तिको यशोलोभीगुरुभिर्निर्दिष्टो रामभद्रः समष्टिप्रियतया व्यवहारलोके तस्मिन्नत्यात्मीये व्यष्टिपथे हृदयमर्मच्छिद्भिः संसारभवैः सन्तप्तः सन् स्वयमेव शोकसंवलितं जगन्निर्मापयति सूत्रधारस्येयमुक्तिः 'यदि पुनरियं किंवदन्ती महाराजं प्रति स्यन्देत ततः कष्टं स्यात्' सिद्धिमाप्नोति। रामभद्रः स्वयमेव व्रतं गृहणाति यत् -

**स्नेहं दयाञ्च सौख्यञ्च यदि वा जानकीमपि ।**
**आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा ।।**[1]

तथा च पुनः दुर्मुखमुखादभिज्ञातप्रजाव्याप्तावादः स्वगृहलक्ष्मीं जानकीं त्यजति। तया सहैव समग्रं स्नेहादिकं विजहाति, व्यथामयं जीवनं निधाय प्रथमाङ्कादारभ्य सप्तमाङ्कं यावद् वारं वारं मूर्च्छन् रोदिति। दर्शनीयेयं रामभद्रस्योक्ति -

**दुःख संवेदनायैव रामे चैतन्यागतम्। मर्मोपिघातिभिः प्राणैर्वज्रकीलायितं हृदि ।।**[2]

अत्रसीतानिर्वासनजन्यदुःखस्य न कश्चिदपि प्रतीकारः प्रतीकारस्तु केवलं मृत्युः, किन्तु प्राणाः हृदि वज्रकीलवत्त्रयस्ता सन्तो नहि बहिरायान्ति। कीदृशीयं पराकाष्ठा दुःखानुभूत्या रामभद्रस्य। इमामेवानुचिन्त्यावस्थां मुरला रामस्य करुणरसं पुटपाकसदृशं निरूपयति -

**अनिर्भिन्नो गभीरत्वादन्तर्गूढघनव्यथः ।**
**पुटपाकप्रतीकाशो रामस्य करुणो रसः ।।**[3]

पुटपाकात्समुचिततरं न किमप्युपमानं भवितुं शक्नोति काव्यजगति राघवस्य करुणरस्य। किन्तु परित्यक्तायां जानक्यां अपि दशमवलोक्य तस्या अपि दुःख भारस्यानुमानंकृत्वा न कश्चिदपि प्राणी तटस्थो भवितुं शक्नोति। तमसा तु तां करुणस्य मूर्तिं किं वा शरीरधारिणीं विरहव्यथामिव पश्यति -

**परिपाण्डुक्षामकपोलसुन्दरं दधती विलोलकबरीकमाननम् ।**
**करुणस्य मूर्तिरथवा शरीरिणी विरहव्यथेव वनमेति जानकी ।।**[4]

तृतीयाङ्के तु सीतायै निरन्तरं विलपन्तं रामभद्रं वीक्ष्य तथा च स्वदुःखादपि अधिकतरं रामभ्रद्रदुःखमवलोक्य दुःखितां छायासीतामवेक्ष्य तयोस्तां तां दशामहर्निशं दर्शं दर्शं महत्कष्टाकुलाविग्रहां वासन्तीमवेक्ष्य तमसा साश्चर्यमुक्तवतीयद्-अहो संविधानकम्-

**एको रसः करुण एव निमित्त भेदाद् भिन्नः पृथक् पृथगिवाश्रयते विवर्तान् ।**
**आवर्तबुद्बुद्तरङ्गमयान् विकरान् अम्भो यथा सलिलमेव हि तत्समस्तम् ।।**[5]

अत्र न केवलं तमसैव आश्चर्यमनुभवति अपितु भवभूतिरपि आश्चर्यचकितः सर्वसाधरणः सामाजिकोऽपि साश्चर्य एव। वस्तुतस्तमसाया एतस्मिन् वचः प्रादुर्भावे त्रिषु स्थानेषु कारुण्यदर्शनं कारणतामेति। प्रथमस्थानं, यत्र रामे वर्तते गभीरा सीतारमणं सर्वात्मना निश्चित्य स शोकमहोदधौ निमज्जति।

द्वितीयं स्थानं यत्र सीतायां समुज्जृम्भते महती करुणा किन्तु सा कुत्रचिद् भिन्ना। यतो हि साऽऽनन्दिताऽपि बहुकालानन्तरं रामभद्रमवलोक्य दुःखिताऽपि तस्येन्द्रियवैकल्यमनुपदं मूर्च्छां वीक्ष्य स्वीयविरहात्। अत्र हर्षोऽपि विषादोऽपि। रतिरपि शोकोऽपि। आत्मानं प्रति रामस्य अगाधं प्रेम सीतां सान्त्वयति, यत्र तत्रैव पीडयत्यपित स्य शोकशरीरकार्श्यम्। अतः यत्र रामस्य करुणा आवर्तसदृशी तत्र सीतायाः करुणाः तरङ्गसदृशी। सा नित्यं स्पन्दते किन्तु नैवावर्तवद् गभीरा। तृतीयं स्थानमत्र वासन्त्यां करुणा, यस्या आधारः सीता परित्यागः, यद् विषये तामात्रेयी सूचयति। सा न जानाति यत्परित्यागानन्तरं सीतायाः किमभवत्-यथा-वासन्त्योक्ति-

**अयि कठोर यशः किल ते प्रियं किमयशो ननु घोरमतः परम्।**
**किमभवद्विपिने हरिणीदृशः कथय नाथ कथं वत मन्यसे।।**[6]

तथा च -

**त्वं जीवितं त्वमसि मे हृदयं द्वितीयं त्वं कौमुदी नयनयोरमृतं त्वमङ्गे।**
**इत्यादिभिः प्रियशतैरनुरुद्ध्य मुग्धां तामेव शान्तमथवा किमतः परेण।।**[7]

किन्तु रामस्यानुमानाश्रितेनसीतामृत्युविषयकविश्वासने साऽपि सीतां मृतां स्वीकृतवती नैवम्। अतः सीताविषयं स्वीयमनिश्चयं रामस्य निश्चयं परिवीक्ष्य वासन्त्याः करुणा जलबुद्बुद्सदृशी अस्थिरा सञ्जाता। अनेन प्रकारेणावर्तबुद्बुद्तरग्ररूपेषु प्रतीयमाना इमा धारा इष्टनाशानिष्टाप्तिविषयिण्याः करुणाया मूलधारायामेवान्तर्निलीना भवन्ति, न ताः पृथक्वर्तिन्यो धारा भवितुं शक्नुवन्ति कदाचिदपि इति तमसा प्रत्यक्षं पश्यति। रामे स्थितरा सीताविनाशजन्यकरुणा करुणस्य एव। सीतायामपि तन्निश्चितविनाशानुभूति समुद्गता रामस्यदयनीयदशजन्यकरुणा करुणरस एव। तथा च वासन्त्यामपि सीतारामयोरीदृग्विधं जीवनमवलोक्य समुत्थिता करुणा करुणरस एव। कुत्रचिद् हृदयमर्मच्छिदः संसारभावास्तु कुत्रचिद् हृदयमर्मच्छिदः कथोद्धाताः।

अतः जीवनस्य मूलतः द्वन्द्वात्मकत्म्, जीवलोकस्य कारुण्यप्रधानत्वम् उत्तररामचरितस्य प्रथमं जीवनदर्शनम्। अस्य मञ्चः सिद्धान्तः, हेतुः समष्टिः, नायकमुखेन कविरेव मन्त्रयते इत्यनेन सिद्धान्तवाक्येन तु रामभद्रस्य सर्वाण्यपि वाग्वजृम्भणानि उत्तररामचरितकारस्य भवभूतेर्जीवननिकषरहस्याणि सन्ति तथापि तमसामाध्यमेन, वासन्तीमाध्यमेन तथा च लवमाध्यमेनाऽपि किमप्यस्ति विशिष्टं समुद्गिरन्तमुत्तररामचरितकारमहं पश्यामि।

दाम्पत्यप्रेम्णो महती प्रतिष्ठा उत्तरामचरिते कृता वर्तते। दाम्पत्यस्य आदर्शोऽत्र समुपस्थापितः। तद् विवाहादारभ्य मृत्युपर्यन्तं परिपक्वे प्रेमसारेस्थितं सुखदुःखयोरेकरूपं भवति। तस्मिन् रसो जरसा न हार्यः तस्मिन् हृदयस्य विश्रान्तिः। तत्प्राप्तिर्महता पुण्येन सम्भवति, अवलोकनीयेयं रामभद्रस्योक्तिः-

अद्वैतं सुखदुःखयोरनुगतं सर्वास्ववस्थासु यद् विश्रामो हृदयस्य यत्र जरसा अस्मिन्नहार्यो रसः।

कालेनावरणात्ययात्परिणते यत्प्रेमसारे स्थितं भद्रं तस्य समुमानुशस्य कथमप्येकं हि तत्प्राप्यते।।[8]

स्त्रियः स्थितिः पुरुषस्य जीवने कीदृशी, यथाऽयं श्लोकः प्रतिपादयति-

इयं गेहे लक्ष्मीरियममृतं वर्तिर्नयनयोः रसावस्याः स्पर्शो वपुषि बहुलश्चन्दनरसः।

अयं बाहुः कण्ठे शिशिरमसृणो मौक्तिकसरः किमस्या न प्रेयो यदि परमसह्यस्तु विरहः।।[9]

स्त्रीपुरुषयोरान्तरसम्बन्धभूतस्य पवित्रप्रेमपरीतस्य दाम्पत्यस्यास्य सौभाग्यपराकाष्ठाभवति तत्सन्ततिः। सन्ततिरेवानन्दग्रन्थिर्दम्पत्योरन्तः करणतत्त्वस्य, यथा-

प्रसवः खलु प्रकृष्टपर्यन्तः स्नेहस्य, परं चैतदन्योन्यसंश्लेषणं पित्रोः।

अन्तःकरणतत्त्वस्य दम्पत्योः स्नेहसंश्रयात्, आनन्दग्रन्थिरेकोऽयम-पत्यमिति पठ्यते।।[10]

उत्तररामचरिते रामभद्रः सुखदुःखयोरद्वैतं दाम्यत्यं तथा च तत्प्रसवमानन्दग्रन्थिरूपमं द्वयमपि स्वयमेव खण्डितवान्। यस्मात् कारणात्समग्रमपि तज्जीवनमश्रुगाथा बभूवः। स्व—तकर्मपश्चात्तापवह्नौ सर्वथैकलोऽयं रामभद्रः सन्तप्तः सन् तमेव लोकं निन्दति, यो रामभद्रस्य सर्वस्वं विलुण्ठ्य स्वयं तु सुखं स्वपिति। 'कुतो रामस्य निद्रेति' रामभद्रोक्ति- स्तद्विगतसर्वसुखं सुष्ठु अभिव्यनक्ति।

वसुन्धरा-भागीरथी-गोदावरी साहाय्यं विना सीताया जीवनस्य का नाम भवितुं शक्नोति कल्पना। दाम्पत्यसृष्ट्याः सुखमपि सुरक्षिते दाम्पत्यसुखे हि अनुभूतिविषयः, यथा सीताया उक्ति रामभद्रं वीक्ष्य -

किं वा मया प्रसूतया। येनैतादृशं मम पुत्रकयोरीषद्विरलधवलदशन-कुडमलोज्जवलमनुबद्धं मुग्धकाकलीविहसितं नित्योज्ज्वलं मुखपुण्डरीकयुगल न परिचुम्बितमार्यपुत्रेण। पुनश्च,

भगवति तमसे ! एतेनापत्यसंस्मरणेनोच्छवासितप्रस्नुतस्तनी इदानीं वत्सयोः पितुः सन्निधानेन क्षणमात्रं संसारिणी संवृत्ताऽस्मि।। वस्तुतः स्त्रीपुरुषयोर्मध्ये विश्वासो भूयात् इत्यपि तथ्यं जीवदर्शनरूपेण ग्रन्थेऽस्मिन् समुच्छलति। यथा सीतां प्रति रामभद्रस्य विश्वासः। तस्योक्ति-

**त्वया जगन्ति पुण्यानि त्वय्यपुण्या जनोक्तयः।**
**नाथवन्तस्त्वया लोकास्त्वमनाथा विपत्स्यसे।।**[11]

अनेनैव प्रकारेण सीताया रामभद्रं प्रति विश्वासः यथा-तस्या उक्ति-

'सखि वासन्ति ! किं त्वमेवंवादिनी भवसि, पूजार्हः सर्वस्यार्यपुत्रः। अथवा, हा दैव। एष मया विना अहमप्येतेन विना केन सम्भावितमासीत्। तन्मुहूर्त्तमात्रं जन्मान्तरादपि दुर्लभदर्शनं वाष्पसलिलान्तरेषु पश्यामि तावद्वत्सलमार्यपुत्रम्।'

परित्यागे लोकस्यैव कारणत्वं, रामस्य राजधर्मनिर्वहनविवशतां, सीता सुष्ठु अनुभवति। अतस्मादेव कारणात् तस्या धवलमधुरमुग्धा दृष्टिः, दुग्धकुल्येव आसीत् तमसा तयैव स्नेहनिस्यन्दिन्या दृष्टया हृदयेशं स्नापयितुं तां प्रार्थयते-यथा-

विलुलितमतिपूरैर्वाष्पमानन्दशोकप्रभवमवसृजन्तीपक्ष्मलोत्तानदीर्घा।
स्नपयति हृदयेशं स्नेहनिष्यन्दिनी ते धवलमधुरमुग्धा दुग्धकुल्येव दृष्टिः।।[12]

वस्तुतः सीताया हृदयं तु रामभद्रस्य करुणालापदशं वीक्ष्य प्रेम्णा द्रवीभूतमेव सञ्जातम्। तमसा तस्या स्थितिं पूर्वमेव एतादृशीं पश्यति-

तटस्थं नैराश्यादपि च कलुषं विप्रियवशाद् वियोगे दीर्घेऽस्मिञ्झटिति घटनात्स्तम्भितमिव। प्रसन्नं सौजन्याद्दयितकरुणैर्गाढकरुणं द्रवीभूतं प्रेम्णा तव हृदयमस्मिन् क्षण इव।।[13]

यज्ञार्थं स्वकीयां हिरण्मयीं प्रतिकृतिं विज्ञाय सीताया हृदये तिलमात्रमपि कालुष्यं न स्थानं समवाप, सा स्वयमेव उक्तवती आर्यपुत्र! इदानीमसि त्वम् ! अहो उत्खातितमिदानीं मे परित्यागशल्यमार्यपुत्रेण।।

उत्तररामचरितकारस्तु प्रतिपादयति यत् कस्यचन प्रियस्य कश्चिदपि प्रियः किमप्यकुर्वन्नपि तस्य दुःखानि नाशयति,

यथा -

**न किञ्चिदपि कुर्वाणः सौख्यैर्दुःखान्यपोहति।**
**तत्तस्य किमपि द्रव्यं यो हि यस्य प्रियो जनः।।**[14]

चिरन्तनवियोगदुःखेष्वेकान्तप्रान्त—तविलापोद्गतैरश्रुभिः कष्टकणिकाब हिरायान्ति, सस्माच्चितं किमपि शान्तिमनुभवति। विलपन्तं रामभद्रमवलोक्य सीताया असहजचिन्तनमनुभूय तमसामुखाद् एतज्जीवदर्शनं समुद्गिरति-

**पूरोत्पीडे तटाकस्य परीवाहः प्रतिक्रिया।**
**शोकक्षोभे च हृदयं प्रलापैरेव धार्यते।।**[15]

षाषटे तु दर्शनमेकं विशेषेणाभिव्यक्तिं लभते, यत्स्वल्पमस्ति, सन्ततिव्यक्तित्वे तत्पितुस्तन्मातुश्च छवेरवलोकनम्। 'आत्मा वै जायते पुत्रः' अथवा अङ्गादङ्गादभवसि, अङ्गादधिजायसे। आत्मा त्वं पुत्रनामासि इत्यादिभिः श्रुतिपङिक्तभिर्यत्सत्यमुदघाट्यते तस्य प्रयोगपुरस्सरं समुपस्थापनमत्र द्रष्टुं शक्यते। विना केनापि सङ्केतेन वा पूर्वानुमानेन युद्धाय गृहीतव्रतं बालकं लवं धनुर्धरल्पेऽवलोक्य बलात् सुमन्त्रस्तत्रपुरा विश्वामित्रयज्ञरक्षणे बद्धपरिकरं बालकरूपं रामभद्रं स्मरति,

**अतिशयितसुरासुरप्रभावं शिशुमवलोक्य तथैव तुल्यरूपम्।**
**कुशिकसुतमखद्विषां प्रमाथे धृतधनुषं रघुनन्दनं स्मरामि।।**[16]

वस्तुतः नवमासं यावद् यस्या गर्भे तद्रसरक्तशक्तिसञ्चयेन स्वं विकसितीकृत्य कश्चित् शिशुः समुद्भवति लोके, स तस्या स्वजनन्या विग्रहं तद्रूपसम्पत्या विविधमङ्गिम्नामुद्भासमानङ्गसाम्यं निसर्गतो बिभर्ति। रामभद्रः कुशलवयोः शुक्लाच्छदन्तच्छवि सुन्दरीमोष्ठमुद्रां, कर्णपाशं नेत्रयुगलं सर्वं सीतायाः सदृशमेव पश्यति, शुक्लाच्छन्तच्छविसुन्दरीयं सैवोष्ठमुद्रा स च कर्णपाशः। नेत्रे पुनर्यद्यपि रक्तनीले तथाऽपि सौभाग्यगुणः स एव।।[17]

जीवनसाङ्गिन्या विनाशे पुरुषस्य जीवने सुखकणिकानां तु कल्पनैव नास्ति। तस्मिन्काले तत्कृते जगदिदं जीर्णारण्यं भवति विशेषस्थित्यां तु तद् हृदयं रामभद्रवत् कुकूलानां राशौ पच्यते इव। इत्यपि एतस्य नाटकस्य परिस्फुटाभाति जीवनदर्शनम्। रामायणगायकः कुशो रामभद्रस्याश्रुमयं मुखमण्डलं वीक्ष्य चकितं स्वानुजं लवं दर्शनेनानेनावबोधयति,

विना सीतां देव्या किमिव हि न दुःखं रघुपतेः प्रियानाशे कृत्स्नं किल जगदरण्यं हि भवति। न च स्नेहस्तावानयमपि वियोगो निरवधिः किमेवं त्वं पृच्छस्यनधिगत रामायण इव।।[18]

संक्षेपेण कथ्यते यत् भवभूतेः उत्तररामचरिते जीवनदर्शनविषये प्रतिपादितम् उक्तिम् पदे पदे परिलक्षितम्। अतएव सहृदयकविसमीक्षकैः अस्य विषये एतावदपि कथितम् उत्तररामचरिते भवभूतिर्विशिष्यते।

**सन्दर्भग्रन्थाः -**


1. *उत्तररामचरितम् 1/12*
2. *उत्तरतत्रैव 1/47*
3. *उत्तरतत्रैव 3/1*
4. *उत्तरतत्रैव 3/4*
5. *उत्तरतत्रैव 3/47*
6. *उत्तरतत्रैव 3/27*
7. *उत्तरतत्रैव 3/26*
8. *उत्तरतत्रैव 1/39*
9. *उत्तरतत्रैव 1/38*
10. *उत्तरतत्रैव 3/17*
11. *उत्तरतत्रैव 1/43*
12. *उत्तरतत्रैव 3/23*
13. *उत्तरतत्रैव 3/13*
14. *उत्तरतत्रैव 6/5*
15. *उत्तरतत्रैव 3/29*
16. *उत्तरतत्रैव 5/4*
17. *उत्तरतत्रैव 6/27*
18. *उत्तरतत्रैव 6/30*

# 15

## जानकीहरणमहाकाव्यस्य साहित्यविमर्शः

*नीलकण्ठकरुआँ*

तत्र कविकुलगुरुणा कालिदासेन रामायणकथामाधारीकृत्य रघुवंशमहाकाव्यं प्रणीतं तथैव कुमारदासमहाकविरपि जानकीहरणमिति महाकाव्यं प्रणीतवान्।

जानकीहरणं कर्तुं रघुवंशे स्थिते भुवि।
कविः कुमारदासश्च रावणश्च यदि क्षम।। इति।।

पद्ये राजशेखरः कविमिमं प्रशंसते। जानकीहरणं पञ्चविंशतिसर्गेषु विभक्तं महाकाव्यम्। किन्त्वस्य पञ्चदशसर्गपर्यन्तमेव मुद्रिता प्रतिर्लभ्यते। कथ्यते हि अस्यैका हस्तलिपि विंशतिसर्गव्यापिनी लभ्यते। सम्पूर्णग्रन्थस्तु सिंहलीभाषायामनूदित एव लभ्यते। ग्रन्थेऽस्मिन् रामायण कथा निबद्धाऽस्ति ततोऽपि चमत्कारितया। काव्यमिदं वैदभीरीतेः क्रीडाभूमिः। अस्य हि यमकानुप्रासप्रयोगो विलक्षणः। सर्वतोभावेन कालिदासमनुवर्तमानः कविरसौ यत्र कुत्र तु स्वं कालिदासरूपेणावोपस्थापयति। चारुतैवाऽस्य विशिष्टो गुणः। अस्यापि व्याकरणप्रियत्वं भाषापाण्डित्यञ्च स्पष्टमेव परिलक्ष्यते।

वाल्मीकिमहर्षिप्रणीतं श्रीमद्रामायणं प्रपञ्चसाहित्ये प्रमुखं स्थानमलङ्करोति। बह्वीषु भारतीयभाषासु आङ्ग्लादिवैदेशिकभाषासु च अनूदितमिदं प्रचुरं प्रचारं प्रापत। मानवहृदयानामुत्कर्षमाधायकमिदं काव्यं मनोहरं भासते। स्थूलरूपेणापि रामायणकथायाः अनभिज्ञः पुरुषो वा अनभिज्ञा महिला वा भारतदेशे नास्तीत्येषा स्वभावोक्तिः।

रामायणपठनेन कस्य वा हृदयं नोत्तेजितं भवति? केन वा कष्टसहिष्णुता नाद्रियते? अत एव रामराज्यं श्रेयस्सुखदायकराज्यस्य पर्यायपदमभूत। रामायणं

प्रजानां पारायणग्रन्थः अभवत्। रामायण- कथामाधारीकृत्य कुमारदासः जानकीहरणं नाम महाकाव्यं प्रणीतवान्।

**कुमारदासस्य पदप्रयोगवैचित्री**

महाकविः अयं कुमारदासः भाषा-भाव-सौन्दर्य-रससिद्धिवर्णनाचातुरी-शास्त्रीय-पाण्डित्यादि-विविधपक्षाणामेकाश्रयः इति। तस्य हि भावानुसारी शब्दप्रयोगः, अर्थगौरवं, उदात्तकल्पना च त कविषु श्रेष्ठं भावयन्ति। स हि सर्वानेव रसान् साधु साधयति विविधानि छन्दांसि च। तस्य भाषायां माधुर्यप्रौढतयोरपूर्वः समन्वयो–दृश्यते। भावपक्षं न तथोपेक्षमाणोऽपि कविरसौ प्राधान्येन कलापक्षधरः। कुमारदासः कुत्रचित् सभायां तस्य शब्दविलासकौशलं प्रदर्शितवानिति श्रूयते। तत्र कतिपये श्लोका एकाक्षरिणः सन्ति। यथा –

**न नोननुन्नोऽनुन्नेनो न ना नानानना ननु।**
**नुन्नोऽनुन्नो न नुन्नेनो नानेनानुन्ननुन्न नुत्।।**[2]

**तथैव –**

**ससासिः सासुसूः सासो येया येया ययाययः।**
**ललौ लीलां ललोऽलोलः शशीशशिशुशी शशन्।।**[3]

**द्वयक्षरं यथा –**

**चारचुञ्चुश्चिरारेची चञ्चच्चीररुचा रुचः।**
**चचार रुचिरश्चारु चारैराचारचञ्चुरः।।**[4]

चित्रकाव्यप्रणयनस्य त्वयं प्रवर्तक एव। अमुमेवानुवृत्य पश्चाद्वर्तिनो माघरत्नाकराद्याः कवयः तथा प्रावर्तयन्त काव्यस्य चित्रत्वम।

एवमेव कुमारदासः प्रसिद्धकविभिः कालिदासादिभिः प्रसिद्धार्थेषु अप्रयुक्तपदानि जानकीहरणकाव्ये प्रयुक्तवान्। तत्पदं तदर्थं बोधयति चेदपि तस्मिन् अर्थे न प्रसिद्धम् इत्येव। यदप्रयुक्तं कविभिः अप्रयुक्तं तदुच्यते इति आलङ्कारिकलक्षणानुसारं काव्यदोषः भवितुमर्हति। जानकीहरणकाव्ये पञ्चमसर्गपर्यन्तं नूतनानि अप्रसिद्धार्थकपदानि प्रयुक्तवान्। यमार्थे कीनाशः इति पदम्–ढवस्त्रार्थे चीरी इति पदम्, मयूरार्थे कृकवाकुः इति पदम्, अग्निरूपार्थे वृषाकपिः इति पदम्, निद्रारूपार्थे शायिका इति पदम्, प्रणामरूपार्थे नमस्या इति पदम्, इत्यादीनि बहूनि अप्रसिद्धानि पदानि प्रयुक्तवान्। उदाहरणार्थं केचन श्लोकाः दीयन्ते।

**जानकीहरणं महाकाव्यलक्षणानि**

आदिकाव्यत्वेन रामायणम् आदिकवित्वेन च वाल्मीकिः भारतीयसाहित्ये महतीं प्रसिद्धिं प्राप। कविताकलाविलासभासुरमिदमादिकाव्यं सकलकाव्योत्तमं भवति। वाल्मीकेः कविताकल्पना, भावना च कविप्रपञ्चस्य उत्तेजन-सामग्रीमकल्पयताम्। तेन महाकविना नैकविधा आदर्शाः कविताचमत्काराः, रसाः, बहवो जीविततत्वविशेषाः समुपदर्शिताः। प्रायशो रामायणाविर्भावानन्तरमेव महाकाव्यं निरुक्तमिति मे मतिः, यदत्र महाकाव्यलक्षणानि लाक्षणिकोक्तानि प्रथमं दृश्यन्ते। तानि आदर्शीकृत्य कालिदास-कुमारदासादयः कवयो महाकाव्यानि व्यरचयन्।

केचन प्राञ्चः महाकाव्यं सर्गबन्धमिति व्यवहृतवन्तः। इतिहासकथासंजातं, अथवा सदाश्रयमितरद् वा चतुर्वर्गफलायत्तं चतुरोदात्तनायकं महाकाव्यं सर्गबन्ध इत्युच्यते। स चाशिषा वा नमस्क्रियया वा वस्तुनिर्देशमुखेन वा प्रारभ्यते। नगर-सागर-पर्वत-ऋतु-चन्द्र-सूर्योदय-उद्यान-जलक्रीडा-मधुपान-रतोत्सव-विप्रलम्भ-विवाह-पुत्रोदय-मन्त्र-द्यूत-प्रयाण-रण-नायकभ्युदयास्तत्र वर्ण्यन्ते तथा भिन्नवृत्तान्तसहितं, लोकरञ्जकं, सदलङ्कृति, रसभावनिरन्तरं, अनतिविस्तीर्णसर्गैः समन्वितम्। ईदृशं काव्यं कल्पान्तरस्थायि भवति। इति दण्डिना महाकाव्यलक्षणं सविशेषमात्मनः काव्यादर्शे निरुपितम्।

विद्यानाथेन प्रतापरुद्रीये अष्टादशवर्णनासहितं महाकाव्यमिति तत्र कैश्चिदूनमपि इष्यतइतिस्थूलरूपेण महाकाव्यलक्षणमुक्तम्।

**नगरार्णवशैलर्तुचन्द्रार्कोदयवर्णनम्।**
**उद्यानसलिलक्रीडामधुपानरतोत्सवाः।।**[5]

अनन्तरं विश्वनाथकविराजः स्वसाहित्यदर्पणे प्राचीनमतानुसारेण महाकाव्यं लक्षयन् कांश्चित् विशेषान् अकथयत्-''तत्रैको नायकः सुरः, सद्वंशो धीरोदात्तगुणान्वितः क्षत्रियो वाऽपि भवति। एकवंशभवाः कुलजा बहवोऽपि भूपा नायका भवन्ति, श्रृङ्गारवीरशान्तानामेकोऽङ्गीरसो भवति। अन्ये सर्वेऽपि रसाः अङ्गानि भवन्ति। क्वचित् खलादीनां निन्दा, सतां च गुणकीर्तनं भवति। एकवृत्तमयैः अवसाने अन्यवृत्तकैः पद्यैः उपलाक्षिताः नातिस्वन्त्याः नातिदीर्घाः अष्टाधिकाः सर्गाः अस्मिन् महाकाव्ये वर्तन्ते। एवमपि कुत्रापि कश्चन

नानावृत्तमयसर्गो दृश्यते। सर्गान्ते भाविसर्गकथायाः सूचनं भवेत्। परिशिष्टांशाः प्रायशः पूर्वोक्ता एव।

जानकीहरणकाव्ये सर्गबन्धः वर्तते, विंशतिसर्गेषु निबद्धमेतत् काव्यम्। इक्ष्वाकुवंशे जातः श्रीरामः कथानायकः। स च धीरोदात्तः। प्रथमसर्गे आयोध्यानगरवर्णनम्, सूर्यास्तमयवर्णनम्, तृतीयसर्गे दशरथस्य स्वपत्नीभिः सह जलक्रीडावर्णनम्, सूर्योदयवर्णनम्, चतुर्थसर्गे विश्वामित्रस्य सिद्धाश्रमवर्णनम्, इत्यादिमहाकाव्यलक्षणेषु लाक्षणिकैः यानि वर्णनानि उक्तानि तानि सर्वाण्यपि जानकीहरणकाव्ये द्रष्टुं शक्यन्ते। स्वयं सर्गान्ते जानकीहरणमहाकाव्ये प्रथमसर्गः इत्यादिरूपेण कथयति च। अतः जानकीहरणं महाकाव्यमित्यत्र नास्ति संशयः।

**जानकीहरणे इतिवृत्तं प्रख्यातम्**

रामायणकथाप्रभावः भारतीयसाहित्ये विशेषतया संस्कृतसाहित्ये विलक्षणो विलसति। रामायणकथांशानाधिकृत्य कवयो विविधानि श्रव्यानि काव्यानि विरचितानि। रामायणधर्म-प्रबोधाय काव्यं उत्तमसाधनं भवति। संस्कृतवाङ्मये काव्यानां अत्यन्तप्राधान्यं अस्ति।

काव्यमहत्त्वं तत्प्रतिपादितवस्तुमहत्त्वसापेक्षं भवति। प्रतिपाद्यमहिम्ना प्रबन्धाः उत्कृष्टाः भवन्ति। यद्यपि कवेः प्रतिभा काव्यनिर्माणे निदानं भवति। कविकर्मापर-पर्यायस्य काव्यस्य निर्माणे हेतुभूतायाः प्रतिभायाः वस्तुगौरवमपि उत्तेजकं भवति नहि प्रतिभावानपि कविः अनुत्तेजकवस्तुकं काव्यं रचयितुमीहते। स्वस्य भावनया भाषया चेष्टया च लोकं उदात्तपथे प्रवर्तयितुं शक्तः महापुरुषः सत्कवेः काव्यकरणे उत्तेजनाय निदानं भवति।

काव्यानां महत्त्वं प्रतिपाद्यनायकमाश्रित्य वर्तत इति लाक्षणिकाः अभिप्रयन्ति। तत्र भरतः नाट्यशास्रे एवं कथयति। -

**''प्रख्यातवस्तुविषयं प्रख्यातोदात्तनायकं चैव।**[6]

**राजर्षिवंशचरितं तथैव दिव्याश्रयोपेतम्''**।।

यद्यपीदं लक्षणं नाटकमधिकृत्यैव मुनिना प्रोक्तं, तथाऽपि सर्वकाव्यसाधारणमेव।

आचार्यदण्डी ''काव्यवस्तु सदाश्रयं चतुरोदात्तनायकं भवेदिति'' वदन् नायकं प्रथममुपन्यस्य अनन्तरं तेन शत्रूणां निराकरणं समुचितमिति शत्रोरपि

वंशवीर्यश्रुतादीनि वर्णयित्वा तज्जयात् नायकोत्कर्षकथनं आनन्ददायकं भवेदिति कथयति।

एवं बहुभिः आलङ्कारिकैः प्रबन्धेषु प्रतिपाद्यनायकमहत्त्वं बहुधा वर्णितम्। अत्र रुद्रटस्य वचनं विलक्षणमिव दृश्यते यः नायकयशः काव्यायत्तं करोति। वस्तुतः इदं सत्यमिव भाति। यस्य कस्यापि महात्मनः जीवितं काव्यवर्णितमेव चिरस्थायि भवति। स महात्मा स्वजीवनकालो यद्यपि स्वसच्चारित्रेण लोकान् सन्मार्गे प्रवर्तयितुं प्रभवति। कालान्तरे तस्य चारित्रं सत्कविकाव्यनिबद्धं सत् सर्वत्र सर्वदा लोकानां आदर्शप्रायं भवति। सत्कविना अवर्णितं देवभूतस्यापि नायकस्य चारित्रं कालगर्भे विलीनं भवति। तथा च लोकोपदेशाय च न प्रभवति। तस्मात् नायकयशः कविकाव्यायत्तमिति रुद्रटवचनं समुचितमिव दृश्यते। तथाहि रामयुधिष्ठिरादिमहापुरुषान् युगान्तरगतान् वयं साक्षात् न जानीमः, तेषां भावनाः, चेष्टाविशेषाः, सौशील्यादिगुणश्च अस्माभिः नैव दृष्टाः तथाऽपि रामायणभारतादिकाव्य इतिहासपठनेन तेषां चारित्रं विशदीभवति। एवं रामयुधिष्ठिरादीनामपि शाश्वतं यशः कविकाव्यायत्तमेव।

श्रीमद्रामायणं प्रपञ्चसाहित्ये प्रमुखं स्थानमलङ्करोति। बह्वीषु भारतीयभाषासु आङ्ग्लादिवैदेशिकभाषासु च अनूदितमिदं प्रचुरं प्रचारं प्रापत्। मानवहृदयाना मुत्कर्षाधायकमिदं काव्यं मनोहरमनन्यादृशं च भासते। भाषान्तरेष्वपि ईदृशमुत्तमं काव्यं पुराऽधुनाऽपि विरलप्रायमेव यदिदं असाधारणमानवजीवितादर्शान् बोधयति। स्थूलरूपेणोपि रामायणकथायाः अनभिज्ञः पुरुषोवा अनभिज्ञा महिलावा भारतदेशे नास्ति त्येषा स्वाभावोक्तिः।

मानवस्य यत्कर्तव्यं तत्सर्वमपि रामः कृतवान्। यावज्जीवितं येन केनापि कारणेन रामेणानुभूयमानः समुदात्तो व्यथाभारः मानवहृदयेषु मधुरबाधाभरितां गौरवभावनां जनयति। दुःखान्तमपि तस्य जीवितं लोभरहितपर्यवसाय्येव। रामः छद्मनाऽपि वालिवधं कृत्वा सुहृदे सुग्रीवाय प्रतिज्ञातार्थपालनमकरोत्। प्रजाभिप्रायं शिरसि निधाय प्रणसम्मतां सीतां परित्यक्तवान्। परार्थं निन्दां बाधां च सः नाजीगणत। सर्वस्मिन्नपि घट्टे कष्टैर्नष्टैश्च भृशमभिभूतोऽपि सामान्यमानवैः असाध्यमेव कर्मं कृतवान्, कदाचित् साधारणजन इव विचारं कुर्वन्नपि आचरणे आसाधारण एवाभवत्। न केवलं राम एव, रामाश्रिता अपि असाधारणं व्यक्तित्वं प्रादर्शयन्।

लङ्कायां सीतामन्विष्य तामपश्यन् हनूमान् सीतामदृष्ट्वा स्वस्य किष्किन्धाप्रत्यागमने सम्भाव्यमानमनर्थजातमाशङ्क्य --

**विनाशे बहवो दोषा जीवन् प्राप्तोति भद्रकम् ।**

**तस्मात् प्राणान् धरिष्यामिध्रुवो जीवति सङ्ग्रमः ।।**[7]

एवमेवाशोकवनिकायामत्यन्तदुःखनिमग्ना सीता हनूमतो रामकुशलवार्ता-मधिगत्य 'प्रीतिसंहृष्टसर्वाङ्गी' सती --

**कल्याणी बत गाथेयं कौशिकी प्रतिभाति मा ।**

**एति जीवन्तमानन्दो नरं वर्षशतादापि ।।**[8]

गुरुतराण्यपि कष्टान्यनुभूय समुद्दिष्टार्थसाधनं मानवः कुर्यादित्ययमंशः अनेन सन्दर्भेण सूच्यते। एवमत्र महानाशावादः प्रस्तुतोऽभवत्। एतादृशाः सन्देशामहान्तो बहवो रामायणकथया समुपदिश्यन्ते।

**जानकीहरणकाव्ये छन्दोविशेषाः**

महाकविना कुमारदासेन जानकीहरणकाव्ये एकैकस्मिन् सर्गे एकैकं वृत्तं प्रदर्शितम्। प्रति सर्गान्ते विद्यमानानां श्लोकानां अन्यत् वृत्तमाश्रितम्।[9]

**आसीदवन्यामतिभोगभाराद्दिवोऽवतीर्णानगरीव दिव्या ।**

**क्षत्रानलस्थानशमी समृद्धया पुरामयोध्येति पुरी परार्द्ध्या ।।1 ।।**

इति श्लोकेन आरब्धे प्रथमसर्गे उपजातिवृत्तं स्वीकृतं कुमारदासेन। उपजातिवृत्तस्य लक्षणम् –

**अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः ।**[10]

इत्थं किलान्यास्वपि मिश्रितासु वदन्ति जातिष्विदमेव नाम। इति। नाम यत्र प्रथमपादे इन्द्रवज्रा, द्वितीयपादे उपेन्द्रवज्रा भवति, तद्वृत्तम् उपजातिवृत्तमिति कथ्यते। तथा च उपजातिवृत्ते प्रथमपादे त त ज ग ग इति गणाः, द्वितीयपादे ज त ज ग ग इति गणाः भवन्ति तदुपजातिः। प्रथमसर्गान्तपर्यन्तं उपजातिवृत्तमेव अनुसृतं कुमारदासेन। अस्मिन् विषये कुमारदासः कालिदास-मनुसृतवान्। कुमारसंभवकाव्ये कालिदासेन प्रथमसर्गे उपजाति-वृत्तमेव स्वीकृतम्।

**जानकीहरणकाव्ये कुमारदासेन आश्रिता रीतिः**

शब्दार्थोभयशरीरशोभिनी सहृदयहृदयराजिनी, मधुररसभाविनी भामिनीव कविता-कामिनी रम्यालङ्कारविन्यासं विना सामाजिकचेतो हारिणी न जायत इति

कृत्वा सर्वैरेव कविवरैः विविधालङ्कारनिवेशेन भूषिता। सामान्यसंस्कृतभाषातः अपि कविवाणी विलक्षणा बोभवीति सहृदयकर्णकुहरेषु निविष्टा कविवागमृतलहरी हृदयङ्गता सती अलौकिकमानन्दं जनयति।

स च आनन्दः न केवलं शब्दतः जायते। तथात्वे रागवाद्यादि निमित्तेन जातः शब्दोऽपि प्राणिनः आनन्दयति। काव्यजनितानन्दस्तु ब्रह्मानन्द- सब्रह्मचारी। शब्दार्थयोः समप्राधान्यं काव्येषु वरीवर्ति।

लक्षणग्रन्थेषु लाक्षणिकाः अपि शब्दार्थयोः साहित्यमेव अभिप्रयन्ति। ''तददोषौ शब्दार्थौ सगुणावानलङ्कृती पुनः क्वापि ''इति दोषवर्जितौ गुणसहितौ सालङ्कारौ शब्दार्थौ काव्यमिति काव्यसामान्यलक्षणम्।

यद्यपि अलङ्कारशास्त्रे अनेके सम्प्रदायाः सन्ति, अलङ्कारसंप्रदायः, रीतिसंप्रदायः, गुणसंप्रदायः ध्वनिसंप्रदायः, रससंप्रदायः इत्यादिरूपेण। शास्त्रमनुसृत्येव सम्प्रदायाः समुत्पन्नाः। रीत्यादिसिद्धान्ताः रीत्यादिविषये परिनिष्ठिता भवन्ति। रीतिसिद्धान्तः एव अलङ्कारशास्त्रमिति वक्तुं न पार्यते। लक्ष्यभूतस्य काव्यस्य आत्मानमनेकथा अनेके अभिप्रयन्ति।

वामनाचार्यमतानुसारेण गुणालङ्कारसंस्कृतौ शब्दार्थौ काव्यम्। रीतिरात्मा काव्यस्य। काव्यं हि ग्राह्यं भवत्यलङ्कारादेव। अलङ्करणञ्च दोषहानेन गुणालङ्कारादानेन च। तच्च शास्त्रादेव भवति न तु स्वेच्छया। काव्यं हि दृष्टार्थं सद्यः प्रीतिकरत्वात्। तददृष्टार्थञ्च कीर्तिहेतुत्वात्। तेन आनन्दः कीर्तिश्च काव्यप्रयोजनम्। काव्यस्यात्मा रीतिः। रीतिर्नामगुणाश्लिष्टपदसंघटना मता इति रीति लक्षणम्। माधुर्यादिभिः गुणैः संश्लिष्टा पदविन्यासवैचित्री एव रीतिः। रीतिः त्रिविधा वैदर्भी, गौडी पाञ्चाली चेति। तत्र समग्रगुणा वैदर्भी। ओजःकान्तिमती गौडीया। माधुर्यसौकुमार्योपपन्ना पाञ्चाली। गुणसाकल्यात् वैदर्भी ग्राह्या इतरद्वयापेक्षया इति आलङ्कारिकाः। कुमारदासः अपि जानकीहरणकाव्ये प्राधान्येन कालिदासवत् वैदर्भीरीतिमेव आश्रितवान्, तत्रैव समग्रगुणाः दृष्टुं शक्यन्ते। उदाहरणार्थम् एकः श्लोकः प्रदशञ्यते।

**लीला गतेरत्र निसर्गसिद्धा मत्तो न दन्ती मुषितो न हंसः।**
**इतीव जङ्घायुगलं तदीयं चक्रे तुलाकोट्यधिरोहणानि।।**[11]

अत्र कुमारदासेन वैदर्भीरीतिः आश्रिता। कौसल्यायाः जङ्घे वर्णयन् कविः इमं श्लोकं प्रस्तौति। गतेरत्र निसर्गसिद्धा इत्यत्र ओजोगुणविशिष्टा शैली। न

दन्ता मुषितो न हंसः इत्यत्र सरलपदविन्यासमाधुर्यगुणविशिष्टा शैली। तुलाकोट्यधिरोहणानि इत्यत्र प्रसादगुणविशिष्टा पदविन्यासवैचित्री। समग्रगुणविशिष्टत्वात् अत्र वैदर्भी रीतिः।

**एवं द्वितीयसर्गे सर्वं लोकत्रयं यश्च संहृत्य शयनं गतः।**
**दृश्यते सलिलस्कन्धः सान्द्रीभूत इवोदधौ।।**
**इत्यादि विष्णुस्तोत्रपरश्लोकेष्वपि वैदर्भीरीतिमेव आश्रितवान्।**[12]

काव्यशोभायाः कर्तारो धर्मा गुणाः। काव्यशोभातिशयहेतवोऽलङ्काराः। गुणा नित्याः तदभावेन काव्यत्वासिद्धेः।

**जानकीहरणकाव्ये स्वीकृताः काव्यगुणाः**

साहित्यसम्प्रदायविशिष्टैः काव्यज्ञविपश्चिद्भिः गुणानां स्वरूपं बहुधा विमृश्य गुणालङ्कारयोः परस्परं सम्बन्धोऽपि निरूपितः। गुणस्य लक्षणविषये आचार्यभरतो मौनमेव भजते नापि विमृशति अलङ्कारात्तस्य पार्थक्यं। परस्परं शोभाहेतुभूतः स्याद् गुणोऽलङ्कारश्चेति प्रतिपादयताऽऽचार्यभरतेन द्वयोः समाश्रयता प्रतिपादिता।

**अन्योन्यसदृशा यत्र तथा ह्यन्योन्यभूषणा।**
**अलङ्कारा गुणाश्चौव समाः स्युः समता मताः।।**[13]

काव्यशास्त्रे आचार्यमम्मटस्य महनीयमवदानं सर्वविदितमेव। ध्वनिप्रतिष्ठापक-परमाचार्योऽयं विपश्चिद् ध्वन्यालोककारस्य गुणालङ्कारधारणां काव्यप्रकाशे स्वोपज्ञैर्युक्तिभिः सुप्रतिष्ठितां विदधाति। तत्र काव्यलक्षण एव स गुणस्यालङ्कारस्य च स्थितिं स्पष्टीकरोति।

**तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि ।।**[14]

अस्य वृत्तिभागे स स्पष्टमेव प्राह-क्वचित्स्फुटालङ्कारविरहेऽपि न काव्यत्वहानिः। अतो मम्मटमते गुणाः काव्यस्य नियतधर्मा अलङ्कारास्त्वनियतधर्माः।

गुणः काव्यस्य नित्यधर्मा इति काव्ये तेषामभावः सर्वथा अकल्पनीयःच किन्तु सर्वे गुणा एकस्मिन् काव्ये समवेता सम्भावनामपि क्लिष्टतमम्। समग्रगुणोपेता वैदर्भीति वामनः। अतः काव्ये केचिदेव गुणा एकत्र सम्भवन्ति, न तु सर्वे।

विद्यानाथः प्रतापरुद्रीये श्लेषः प्रसादः समता माधुर्यं सुकुमारता इत्यादिरूपेण चतुर्विंशतिकाव्यगुणान् अङ्गीकृतवान्। तत्र सर्वैः आलङ्कारिकैः माधुर्यम्, ओजः प्रसादः इति त्रयः गुणा एव अङ्गीकृताः। अन्ये सर्वे गुणाः तत्रैव अन्तर्भवन्तीति तेषाम् अभिप्रायः। प्रायः आधुनिकैः आलङ्कारिकैः अयमेव अङ्गीकृतः।

प्रकृते कुमारदासेन स्वीये जानकीहरणमहाकाव्ये माधुर्य-ओजः-प्रसादादिगुणानां संनिवेशः सम्यक् कृतः ।

**स्निग्धद्विजालीरुचिरं प्रियङ्गुश्यामद्युतिश्चारुतमालकान्ता।**
**बिभर्ति गन्धाहृतभृङ्गचक्रं सन्माधवीमण्डपमेतदास्यम्।।**[15]

पद्माकरश्च वारि विगाहमानस्य रामानुजस्य नितम्बबिम्बं वीचिकराग्रेण सशब्दं कामीव व्यास्फालयति। कश्चित्तरङ्गो रामाणां पीननितम्बैः दूरमुत्क्षिप्तः अन्यस्याः तनूदरेषु प्रविष्टो हतभाग्यस्ततोऽपि मांसलस्तनैस्ताडितः सुदूरमुत्क्षिप्तः। क्षीणस्य दैवहतस्यात्र दृश्यमेव हृदयमारोहति। कृत्स्न एव तृतीयसर्गः सौन्दर्यकोष इव कविना सहृदयाय समर्पितः। अत्र समासभूयस्त्वात् ओजो गुणः। ओजः समासभूयस्त्वम् इति तल्लक्षणम्। –

**सरोजिनी तत्परिभुक्तमुक्ता मूचर्च्छातुरेव स्तिमिता विरेजे।**
**निद्राहृताम्भोजनिमीलिताक्षी रुग्णं मृणालीवलयं दधाना।।**[16]

भुक्त एवास्य सौन्दर्यमाकलयितुमीष्टे। एवमेव षोडशसर्गे निशाचरयुवतिवृन्दानां हारिविभ्रमविलासा दूतीसम्प्रेषणादिव्यवहाराश्च कवेरनुभूतसौन्दर्योपस्थापनशक्ति-माविष्कुर्वन्ति। युवतीनां सापराधप्रियेषु दण्डप्रकारः। या पृथक्पदता वाक्ये तन्माधुर्यं प्रचक्षते इति लक्षणलक्षितत्वात् पूर्वार्धे माधुर्यगुणः। द्वितीयार्धे तु प्रसादः गुणः। प्रसिद्धार्थपदत्वं यत् स प्रसादो निगद्यते इति प्रसादस्य लक्षणम्।

**जानकीहरणकाव्ये अलङ्कारविशेषाः**

न कान्तमपि निर्भूषं विभाति वनितामुखम् इति अलङ्काराणां प्राधान्यं भामहेन निरूपितम्। काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते इति दण्डिना प्रोक्तम्। भरतमुनिना उपमा, रूपकम्, दीपकम्, यमकं चेति चत्वारः अलङ्काराः निरूपिताः। रुद्रटः काव्यालङ्कारे शास्त्रीयक्रमेण अलङ्कारान् विभजति।

भामहादयः शब्दार्थौ काव्यस्य शरीरम्, तस्य भूषणप्रायाः अलङ्काराः काव्य शरीरसौन्दर्यम् अलङ्कारद्वारैव भवतीति अलङ्कारसंप्रदायिनः अभिप्रयन्ति। भरतेन यद्यपि चत्वारः अलङ्काराः निर्दिष्टाः, ते एव अलङ्काराः कुवलयानन्दादिग्रन्थेषु पञ्चविंशत्यधिकशतसंख्याकाः जाताः। सादृश्यमूलकान् उपमा - अनन्वय - उपमेयोपमा - रूपक - उत्प्रेक्षा - परिणामादीन् अर्थालङ्कारान् कुमारदासः जानकीहरणकाव्ये तत्र तत्र सचमत्कारं सहृदयरञ्जकं कृतवान्।

**प्रथमसर्गे**

**आसीदवन्यामतिभोगभाराद्दिवोऽवतीर्णानगरीव दिव्या।**
**क्षत्रानलस्थानशमीसमृद्ध्या पुरामयोध्येति पुरी परार्ध्या।।**[17]

इति श्लोके दिव्या स्वर्गपुरी अतिभोगभारात् हेतोः अयोध्या नाम्ना भूलोकमवतीर्णा इति सहृदयहृदयरञ्जकम् उप्रेरक्षितवान्। संभावना स्यात् उत्प्रेक्षा वस्तुहेतुफलात्मना इति उत्प्रेक्षालङ्कारस्य लक्षणम्। अयोध्यानगरवर्णनपरेषु दशसु श्लोकेषु उत्प्रेक्षालङ्कारं सम्यक् पोषितवान्।

**प्रवालशीर्षावदनं सुवर्णे मुक्तामयाङ्गावयवा वहन्त्यः।**
**यस्यां युवत्यो विहिताः विधात्र रत्नैरिवापुर्वपुषः प्रकर्षम।।**[18]

इति श्लोके श्लेषालङ्कारं चमत्कारतया पोषितवान्। अत्र अङ्गना वर्णनद्वारा अयोध्यानगरीं वर्णयति। अत्रत्यविशेषणानि स्त्रीरूपार्थं नगररूपार्थं च बोधयन्ति। नानार्थसंश्रयः श्लेषः वर्ण्यावर्ण्योभयाश्रितः इति लक्षणानुसारम् अत्र प्रकृतश्लेषालङ्कारः।

**उपसंहारः**

कुमारदासस्य जानकीहरणमपि संस्कृतसाहित्ये लब्धप्रतिष्ठा कृतिः। अस्य ग्रन्थकर्तुः कालविषये, देशविषये च विमर्शकानां मध्ये ऐकरूप्यं यद्यपि नास्ति, तथापि किंचिदिव ग्रन्थकर्तुः विषये विमर्शकानां हृदयं प्रकाशयितुमिच्छामि। कुमारदासेन प्रायः जानकीहरणे माधुर्य-ओजः-प्रसादगुणभूयिष्ठ-वैदर्भीरीतिरेव आश्रिता। न तु एकः गुणः। ततश्च त्रयः अपि गुणा कविना साधु काव्ये निक्षिप्ता इत्यत्र संशयः नास्ति। ई–शरामायणपठनेन कस्य वा हृदयं नोत्तेजितं भवति केन वा कष्टसहिष्णुता नाद्रियते को वा कण्टकाकीर्णमपि धर्म्यमार्गं नानुसरति। एता–शप्रख्यातेतिहासरमायणकथामधारीकृत्य कुमारदासः जानकीहरणकाव्यं निर्मितवान, ततश्च जानकीहरणकाव्यमपि प्रख्यातं महाकाव्यमिति वक्तुं शक्यते।

**सन्दर्भग्रन्थाः -**


1. *कुमारदास्य जानकीहरण*
2. *किरातार्जुनीयम् -15.14*
3. *किरातार्जुनीयम् -15.5*
4. *किरातार्जुनीयम् -15.38*
5. *प्रतापरुद्रीयम्- 2.69*
6. *साहित्यदर्पणः, नायकप्रकरणम्*
7. *नाट्यशास्त्रम-18.10*
8. *काव्यादर्शः-17*
9. *काव्यालङ्कारः- 3*
10. *रामायणम्-5.13.45*
11. *रामायणम्-5.34.6*
12. *जानकीहरणमहाकाव्य -1.1*
13. *काव्यप्रकाश- 2.4*
14. *जानकीहरण-1.28*
15. *जानकीहरण-2.15*
16. *नाट्यशास्त्रम-16.102*
17. *काव्यप्रकाशः-1.4*
18. *काव्यप्रकाशः-1.4 ( वृत्तिः)*
19. *जानकीहरणम- 3.21*

# 16

# उपनिषत्सु मनोविज्ञानम्

*डॉ. सत्येन्दु शर्मा*

प्राचीनभारतस्य बहुमूल्यानि चिन्तनरत्नानि उपनिषत्सु निगूढानि सन्ति। प्रमुखतयोपनिषदां प्रतिपाद्यं ब्रह्मतत्त्वमस्ति। परमगूढतत्त्वप्रतिपादनादेव एते ग्रन्थाः विश्वप्रसिद्धाः विद्वद्वन्दनीयाश्च। दार्शनिकविचाराणां हीरकमणयः उपनिषदः ज्ञानकोशो मन्यते। एतेषु परमार्थनिरूपणक्रमे प्रसङ्गतः मनोविज्ञानस्यापि विषयो साधुतया विवेचितो–दृश्यते। अत्रोपनिषत्सु निरूपितं मानवमनसः विभिन्नपक्षाणां मनोवैज्ञानिकं चित्रणं विश्लेषयिष्यन्ते -

छान्दोग्योपनिषदनुसारेण[1] द्वादशवर्षाणि वेदानधीत्य गृहमागतः श्वेतकेतुरविनीत इवाचरति स्म। तस्य ज्ञानाभिमानं दृष्ट्वा पित्रारुणेन स पृष्टः- ''पुत्र श्वेतकेतो ! किं त्वया तज्ज्ञानमधिगतं येन ज्ञातेन सर्वमविज्ञातमपि विज्ञातं भवति?'' श्वेतकेतुनोक्तम् ''एतत्तु गुरुणा नोपदिष्टम्। अतोहं न जानामि । तदारुणेन परमार्थज्ञानं प्रदाय पुत्रस्य ज्ञानगर्वज्वरो दूरीकृतः।

अत्र मानवमनसः स्वाभाविकं वर्णनं चित्रितमस्ति। यदा कश्चिन्मनुष्यः कठिनश्रमात् किञ्चित्प्राप्नोति तदा निरन्तरमेवोपलब्धिगौरवात् स्वमद्वितीयमिव प्रदर्शयन् अन्यांश्च जनानतितुच्छानवगच्छति। श्रीमद्भगवद्गीतायाः षोडशेऽध्याये मानवस्य एतादृशं मनोभावं वर्णयता श्रीकृष्णेनोक्तमस्ति 'कोन्योऽस्ति सदृशो मया'। कश्चित्पुरुषः धनाधिक्यात् अहङ्कारग्रस्तो भवति, कश्चिद् बलाधिक्यात्, कश्चिच्च ज्ञानाधिक्यात्। वस्तुतस्तु आधिक्यादहङ्कारो न भवति, अपितु आधिक्यस्य चित्तबोधादहङ्कारो जायते। आरुणिः श्वेतकेतुः द्वादशवर्षाणि वेदानधीत्य ''अहं सर्वज्ञ, नान्यः कश्चित् मा–शः'' इति मत्वा मत्तोभूत् । परन्तु ''मयावाप्तं वेदज्ञानमेव न सर्वम्, ततोप्यधिकं ज्ञानस्य सीमोस्ति'' इति परमार्थज्ञानेन तस्य अद्वितीयसर्वज्ञाताया मनोरोगः दूरीभूतः ।

केनोपनिषदनुसारेण[2] ब्रह्मानुग्रहाद् देवासुरसङ्ग्रामे विजेतारो देवा इन्द्रादयो दर्पाभिभूता अभवन्। ते विजयस्य मिथ्याभिमाने मत्ता आसन्। तत्रैव एको यक्षः प्रादुर्भूतोऽभवत्। तं यक्षरूपं ब्रह्म देवा नाभिज्ञातवन्तः। तमवलोक्याग्निदेवः प्रेषितो देवराजेणेन्द्रेण। अग्निः गत्वा तमपृच्छत् ''भोः ! को भवान्?'' यक्षेण पृष्टम् ''कस्त्वम्?'' अग्निनोक्तम् ''अहमग्निः। पृथिव्यां यदपि वस्तु, तत्सर्वं दग्धुं समर्थोऽहम्।'' तदा तृणमेकं तत्रैव संस्थाप्य यक्षेणोक्तम् ''एतत्तृणं दह।'' अग्निदेवः स्वकीयेन पूर्णसामर्थ्येनापि तत्तृणं दग्धुं नाशक्नोत्। अतः स मौनं विधाय प्रतिनिवृत्तः। इन्द्रेण तदा वायुः प्रेषितः। वायुदेवोऽपि तं समया गत्वाऽवोचत् ''अहं किमपि ग्रहीतुं समर्थः।'' यक्षेण स तृणं ग्रहीतुमुक्तः। परञ्च स्वशक्त्या वायुनापि तत्तृणं चालयितुं न शक्तम्। सोऽपि तूष्णीमेवेन्द्रमुपगतवान्। तदनन्तरमिन्द्रः स्वयमेव तत्र गतवान् किन्तु तावत् स यक्षो ततो विलुप्तोभवत् । तदा इन्द्रो हैमवतीमुमामुपागत्यापृच्छत्। उमा उवाच ''स ब्रह्म। असुरास्तु ब्रह्मणैव विजिताः, यूयं तत्र निमित्तमात्रम्।''

असुरविजयविषये इन्द्रादयो देवा निजं महिमानमनुभूतवन्तः। बलमिदमस्माकमेव, येनास्माभिरसुराः विजिताः इत्येवं तैरवगतम्। अत्र यक्षभूतेन ब्रह्मणावबोधितं यत् वस्तुतस्तु ब्रह्माण्डेस्मिन् सर्वेषु प्राणिषु वस्तुषु वा विद्यमाना ब्रह्मशक्तिरेव चेष्टते। ब्रह्मशक्त्यैव प्राणिनां सर्वाणि चेष्टितानि संभवन्ति, तेन विना तु निमिषमात्रमपि न कर्तुं शक्यते। मनुष्यस्य स्वभावोयं यत् कस्मिन्नपि उद्योगे विफलो भूत्वा देवं दैवं वा कारणं मन्यते किन्तु साफल्यं स्वकीयपुरुषार्थस्य परिणाममङ्गीकरोति। अहंकारस्य स्वाभाविकदोषात् मनुष्यः क्रियमाणेषु कर्मसु स्वकर्तृत्वं मन्यते। यथोक्तं भगवद्गीतायाम् –

**''अहङ्कारविमूढात्मा कर्ताहमिति मन्यते।''**[3]

मानवा इव देवा अपि असुरविजये स्वबलमेव कारणं मत्वा मिथ्याभिमानग्रस्ताः। किन्तु वस्तुतस्तत्र तेषां निजं बललेशमपि नासीत्। अतोहङ्कारमूढैः कर्तृत्वाभिमानिभिः देवैः तृणमपि दग्धुं ग्रहीतुं वा न शक्तम्। परमार्थतः ब्रह्मणः प्रकाशेनैव कोपि प्रकाशवान् भवति। ब्रह्मबलेनैव किमपि बलवद्भवति तद्बलं विना निर्बलमिति विज्ञाय न कदापि केनचिदहङ्कारः कर्तव्यः। एवमत्र यक्षवृत्तान्तेन अहंवृत्त्याः परित्याग उपदिश्यते।

आत्मनः प्रयोजनाय देवः प्रियो भवति, वेदस्य प्रयोजनाय वेदः प्रियो न भवति, अपितु आत्मनः प्रयोजनाय वेदः प्रियो भवति। तथैव जगति किञ्चिदपि अन्यस्मात्कारणात् प्रियं न भवति अपितु आत्मनः कारणात् प्रियं भवति। यथार्थतः न कश्चित् कस्यचित्प्रियम्। यानि सुखसाधनानि तानि सर्वाणि प्रियाणि भवन्ति। सर्वे प्राणिनः अनुकूलत्वात् प्रियाः प्रतीयन्ते, ते एव आत्मनः प्रतिकूलाचरणत्वात् तस्मिन्नेव क्षणेप्रिया भवन्ति। सांसारिकं सर्वं प्रतीयमानं प्रियं नश्वरम्, केवलं कल्याणकारित्वादत्मैव प्रियः, न कश्चिदन्यः। एतस्मादेतदात्मैव ज्ञातव्यः ।

बृहदारण्यकोपनिषदनुसारेण[6] एकदा देवा मनुष्या असुराश्च प्रजापतिसमीपे गत्वा ब्रह्मचर्यमुषितवन्तः । देवाः प्रजापतिमूचुः ''भवान् अस्मान् उपदिशतु।'' प्रजापतिस्तु 'द' इत्येकमक्षरमुक्त्वोपृच्छत् ''किमवगतम्?'' देवा ऊचुः भवता दकाराद् दम उपदिष्टः। प्रजापतिनोक्तम् ''ओम् सम्यग्ज्ञातम्।'' तत्पश्चाद् मनुष्या उपदेशं याचितवन्तः। प्रजापतिस्तु 'द' इत्येकमक्षरमुक्त्वोपृच्छत् ''किमवगतम्?'' मनुष्या ऊचुः ''भवता दकाराद् दानमुपदिष्टम्।'' प्रजापतिनोक्तम् ''ओम् सम्यग्ज्ञातम्।'' तदा असुरा गतवन्तः। प्रजापतिश्च तथैव 'द' इत्येकमक्षरमुक्त्वोपृच्छत् ''किमवगतम्?'' असुरा ऊचुः ''भवता दकाराद् दया उपदिष्टा।'' प्रजापतिनोक्तम् ''ओम् सम्यग्ज्ञातम्।''

भाषिकमनोविज्ञानस्य मनोहरमुदाहरणमेतत्। यथा संभाषणे वक्तुः ज्ञानस्तरं प्रतिबिम्बितं भवति तथैवार्थग्रहणे श्रोतृजनस्य। प्रायशोनेकार्थकशब्दस्यार्थनिर्धारणं सुदुष्करमेव भवति। साहित्यशास्त्रे अभिधामूलं व्यञ्जनाव्यापारं प्रतिपादयद्भिराचार्यैः अनेकार्थशब्दस्यार्थनिर्णयाय संयोगादयः वर्णिताः। परन्तु एकाक्षरस्यार्थनिर्धारणं तुमु-ख्यतः श्रोतृजनमेवापेक्षते। एकस्यैव वचनस्यार्थः श्रोतृभेदात् परिवर्तते। सर्वेषां प्राणिनां मनोवृत्तिः पृथग्भवति। अतः श्रोतारः मनोवृत्त्यनुसारेणैव वाक्यार्थमवगच्छन्ति। पुनश्च, सर्वे प्राणिनः समाचरन्तोऽपि निजदोषपरिचिताः भवन्ति। गुरुजनेभ्यस्तु सर्वे दोषनिवारणस्योपदेशमपेक्षन्ते। अतः ब्रह्मणोक्ताद् दकाराद् सर्वे स्वमनोवृत्त्यनुसारेणार्थं गृहीतवन्तः। देवा इन्द्रियसंयमदुर्बलत्वाद् दमः इति, मनुष्याः सञ्चयस्वभावदोषाद् दानमिति, असुराश्च दयाभावाभावाद् दया इत्यर्थमवगतवन्तः।

छान्दोग्योपनिषदनुसारेण[7] भुक्तमन्नं त्रिधा विभज्यते। अन्नस्य स्थूलतमोंशो पुरीषं भवति, मध्यमोंशो मांसं भवति अणुतमश्च मनो भवति।

कठोपनिषदनुसारेण[4] वाजश्रवसो गौतम एकं बृहद्यज्ञमायोजितवान्। श्रद्धया सोत्साहृच तेन तस्मिन् यज्ञे स्वकीयं धनं दत्तम्, परञ्च दक्षिणाकाले ब्राह्मणेभ्यो वृद्धा दुर्बलाश्च गावः दीयन्ते स्म। पितुरेतत्—पणत्वं संवीक्ष्य नचिकेतसा संबोधितम् ''पितः ! दक्षिणायान्तु स्वकीयं परमं प्रियमेव दीयते, तत्भवतः प्रियोहं पुत्रः कस्मै दातव्यम्?'' भूयोभूयः पृष्टेन क्रुद्धेन पित्रोक्तम् ''त्वां मृत्यवे ददामि।'' एतच्छ्रुत्वा प्रसन्नो नचिकेता यमराजगृहं गन्तुं तत्परोभवत्।

गौतम इव कश्चिन्मनुष्यः किञ्चित्कार्यं सोत्साहमारभते। योजनाकाले तु मनसि महत्त्यागस्य तीव्रसंकल्पो भवति, परन्तु समापनकाले कार्यसाफल्यं सन्निकटमवेक्ष्य नरः शैथिल्यमेत्य कार्पण्यदोषाभिभूतो भवति। यद्यपि मनुष्यः जानन्नपि निन्द्यमाचरतु, परन्तु पुनः पुनः पृष्टे सति निजहीनबोधत्वात् क्रोधाभिभूतो भवति। क्रोधावेशे चा त्यं कृत्वा पश्चात्तापं करोति। अतः लोभात् क्रोधाद्वा ना त्यं कुर्यादित्यत्रोपदिष्टम्।

बृहदारण्यकोपनिषदनुसारेण[5] याज्ञवल्क्यः मैत्रेयीमुवाच ''गृहस्थाश्रमादन्यत्र गन्तुकामोहं युवयोर्भार्ययोः तव कात्यायन्याश्च मध्ये धनविभाजनं कर्तुमिच्छामि।'' मैत्रेयी उवाच ''भगवन्। पृथिव्यां यानि धनानि, तानि सर्वाणि गृहीत्वा किं मयामृतत्वमाप्तुं शक्यते?'' याज्ञवल्क्य उवाच ''न हि। धनेन जीवनं सुखमयं भवितुमर्हति, परञ्चामृतत्वं नैवाप्तुं शक्यम्।'' मैत्रेयी उवाच ''तर्हि किं धनेन? मह्यं तज्ज्ञानमुच्यतां येनाहममृतत्वमाप्नुयाम्।'' तदनन्तरं याज्ञवल्क्येनोक्तम् –

''अरे न हि पत्युः कामाय पतिः प्रियो भवति, आत्मनस्तु कामाय पतिः प्रियो भवति । तथैव न सर्वस्य कामाय सर्वं प्रियं भवति, आत्मनस्तु कामाय सर्वं प्रियं भवति। अतः आत्मैव दृष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः। आत्मनः विज्ञानेनेदं सर्वं विदितं भवति।''

अस्मिन्संसारे सर्वे मनुष्याः धनं कामयन्ते। धनमेव सुखमयजीवनस्य प्रमुखसाधनम्। परन्तु धनाल्लब्धं सुखं जीवनेन सह विनश्यति। पृथिव्याः सर्वाण्युपलब्धानि धनान्यपि आत्मसुखं प्रदातुमक्षमान्येव। धनान्न लभ्यतेमृतत्वम्। अतो विवेकवन्तः आत्मज्ञानमिच्छन्ति यथा मैत्रेय्या जिज्ञासा कृता ।

पुनश्च, लोकस्य प्रयोजनाय लोकः प्रियो न भवति, अपितु आत्मनः प्रयोजनाय लोकः प्रियो भवति, देवस्य प्रयोजनाय देवः प्रियो न भवति, अपितु

अतोन्नमयं हि मनः। खादितेन अन्नेन मनः निर्मितं भवति। यः जनः या–शमन्नं भुङ्क्ते ता–शमेव मनो भवति। मनसा एव मुक्तिरवाप्तुं शक्यते-

# लेखक-परिचयः

| | | |
|---|---|---|
| 1. डॉ. बालकृष्णशर्मा | - | साहित्याविभागाध्यक्षः<br>शासकीय संस्कृतमहाविद्यालयः<br>ग्वालियरम् (म.प्र.) |
| 2. डॉ. कृष्णपददासाधिकारी | - | सहाचार्य अध्यक्षश्च<br>संस्कृतविभागः<br>एस.बी.एस.एस. महाविद्यालयः<br>गोलतोरम्, पश्चिमी मेदिनीपुरम्<br>(पश्चिम बंगालः) |
| 3. डॉ. करुणानन्दमुखोपाध्यायः | - | सहाचार्यः, संस्कृत विभागः<br>काशीहिन्दूविश्वविद्यालयः, वाराणसी (उ.प्र.) |
| 4. डॉ. पूर्णिमा केलकरः | - | सहायकाचार्या<br>संस्कृतविभागः<br>इन्दिरागांधीकलासंगीतविश्वविद्यालयः<br>खैरागढ़म् (छ.ग.) |
| 5. डॉ. सुमनकुमारः झा | - | सहाचार्यः, साहित्यविभागः<br>श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-<br>विद्यापीठम्, नवदेहली |
| 6. डॉ. सितान्शुभूषण पण्डा | - | सहायकाचार्यः, धर्मशास्त्रविभागः<br>राष्ट्रियसंस्कृतविद्यापीठम्, त्रिरूपतिः<br>(आं.प्र.) 517507 |
| 7. डॉ. किरण आर्या | - | सहायकाचार्या, संस्कृतविभागः<br>डॉ.हरीसिंहगौरविश्वविद्यालयः, सागरम् (म.प्र.) |
| 8. डॉ. पूनम सिंह | - | सहायकाचार्या, संस्कृतविभागः<br>डी.ए.वी. पी.जी. कॉलेज, वाराणसी |
| 9. डॉ. तारेशकुमारः शर्मा | - | वरिष्ठसंस्कृताध्यापकः,<br>रा.व.मा.बालविद्यालयः,<br>लिबासपुरम्, दिल्लीनगरम्-110042 |

| | | |
|---|---|---|
| 10. डॉ. दानपतिः तिवारी | - | सहाचार्य अध्यक्षश्च<br>संस्कृतविभागः<br>का.सु. साकेत महाविद्यालयः<br>अयोध्या (उ.प्र.) |
| 11. डॉ. धर्मचन्द्रः जैनः | - | 3 ज्ञ 24-25, कुड़ी भगतासनी<br>हाउसिंग बोर्ड, जोधपुर-342005 (राज.) |
| 12. डॉ. विवेक शर्मा | - | सहायकाचार्यः, संस्कृतविभागः<br>हिमाचलप्रदेशकेन्द्रीयविश्वविद्यालयः,<br>धर्मशाला (हि.प्र.) |
| 13. डॉ. राघवेन्द्र शर्मा | - | संस्कृतसाहित्यविभागाध्यक्षः<br>शास. दू. श्री. वै. स्नातकोत्तर<br>संस्कृतमहाविद्यालयः, रायुपरम् (छ.ग.) |
| 14. डॉ. तरुणकुमार शर्मा | - | सहायकाचार्यः, संस्कृतविभागः<br>अतर्रामहाविद्यालयः, अतर्रा, बाँदा (उ.प्र.) |
| 15. नीलकण्ठकरुआँ | - | पणिडच्चेरीविश्वविद्यालयः |
| 16. डॉ. सत्येन्दु शर्मा | - | संस्कृतविभागाध्यक्षः, शासकीयसंस्कृत-<br>स्नातकोत्तरमहाविद्यालयः, रायपुरम्,(छ.ग.) |

# संस्कृत परिषद्, संस्कृत विभाग
# डॉ. हरीसिंह गौर विश्वविद्यालय, सागर
## उपलब्ध नवीन पुस्तकें

- संस्कृत साहित्य की आधुनिक प्रवृत्तियाँ - सं. कुसुम भूरिया दत्ता, मू. 900/-
- संस्कृत के अभिनव रचनाधर्मी आचार्य राधावल्लभ त्रिपाठी - सं. कुसुम भूरिया दत्ता, मू. 700/-
- दण्डी : समय और साहित्य - सञ्जय कुमार, मू. 350/-
- संस्कृत काव्यशास्त्र : आधुनिक आयाम - सं. आनन्दप्रकाश त्रिपाठी, मू. 500/-
- ग्रन्थ-रत्न - रामरतन पाण्डेय, प्रदीप दुबे, मू. 100/-
- गीतधीवरम् - राधावल्लभ त्रिपाठी, मू. 50/-
- सौन्दर्य लहरी - पुष्पा दीक्षित, मू. 40/-